ISSN: 2249-538X

# वाक्यार्थभारती

नवशृङ्खला

वर्षम् २०१८-१९ अङ्कः - ९

**प्रधानसम्पादकः**

आचार्यः ए. पि. सच्चिदानन्दः

**सम्पादकाः**

डा. वेङ्कटरमणभट्टः
डा. सूर्यनारायण भट्टः
डा. एम्. श्रीनिवासमूर्तिः
डा. आर्. नवीनः

राष्ट्रियसंस्कृतसंस्थानम्

राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७१३९

# वाक्यार्थभारती

## (नवशृङ्खला, अङ्कः – १, वर्षम् – २०१८-१९)

**प्रधानसम्पादकः**

**प्रो. ए. पि. सच्चिदानन्दः**

**सम्पादकाः**

**डा. वेङ्कटरमणभट्टः**

**डा. सूर्यनारायणभट्टः**

**डा. एम्. श्रीनिवासमूर्तिः**

**डा. आर्. नवीनः**


**राष्ट्रियसंस्कृतसंस्थानम्**

**(मानितविश्वविद्यालयः)**

**राजीवगान्धीपरिसरः**

**शृङ्गेरी-577139**

| | | |
|---|---|---|
| Title | : | Vākyārthabhāratī |
| Chief Editor | : | Prof. A.P. Sachidanada |
| Editors | : | Dr. Venkataramana Bhat |
| | | Dr. Suryanarana Bhat |
| | | Dr. R. Naveen |
| | | Dr. M. Srinivasamurthy |

Publisher

Principal
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD, Govt. of India)
RAJIV GANDHI CAMPUS
SRINGERI-577 139 (Karnataka)
www.sringericampus.ac.in

| | | |
|---|---|---|
| E-Mail | : | principal_rgc@hotmail.com |
| Year | : | 2019 |
| ISSN | : | 2249-538X |
| Copies | : | 75 |
| Page & Design | : | Raveesha N. |
| Printed at | : | SRI SIRI ENTERPRISES, Sringeri. |

© All the rights are reserved for Publisher. Provided that contributors are responsible for their respective articles

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC-101/2019-20/58

Date 24.07.2019

## विलसतु वाक्यार्थभारती

"**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते**" इति गीतोक्ताभियुक्तवचसा ज्ञानस्य माहात्म्यं प्रतीयते। तच्च ज्ञानं सन्ततं चिन्तनेनाभ्यासेन तपसा च बोभवीति इति तु विदन्त्येव सर्वे। अपि च "**स्वाध्यायान्माप्रमदः**" इति विधिः सततमध्ययनमेवोपदिशति। यदि निरन्तरप्रयासेन गुरोः असीमानुकम्पया च शास्त्रमात्मसात्कृतं भवति तर्हि चतुर्षु पुरुषार्थेषु तुरीयः परमोत्कृष्टश्च ब्रह्मसाक्षात्काररूपो मोक्षोऽप्यधिगतो भविष्यतीत्यत्र नास्ति संशीतिलेशः। तस्मादेव शास्त्राध्ययनाध्यापनसंरक्षणादिकर्त्तव्येषु निरन्तरं दत्तावधानोऽस्माकं राष्ट्रियसंस्कृतसंस्थानस्य प्रथितयशा उभयेषां जगद्गुरूणां मातुः श्रीशारदाम्बायाश्चासीमानुग्रहेण संवर्धितः शृङ्गेरीस्थराजीवगान्धीपरिसरश्छात्राणां बुद्धिवैशद्याय शास्त्रविषयकान् नानाविधकार्यक्रमानायोजयतीति मेऽन्तःकरणे महान् हर्षप्रकर्षः।

प्रसङ्गेऽस्मिन् जगद्गुरूणां श्री श्री **भारतीतीर्थमहास्वामिनां**, तत्करकमलसञ्जातानां श्री श्री **विधुशेखरभारतीमहास्वामिनाञ्च** पादारविन्दयोः जगदम्बायाः श्रीशारदाम्बायाः चरणारविन्दयोश्च प्रणतिततीः विनिवेदयामि। प्रतिवर्षमिव विशिष्टव्याख्यानमालायाः वाक्यार्थपरिषदश्च व्याख्यानसङ्ग्रहरूपं **वाक्यार्थभारती**नामकं ग्रन्थरत्नं परिसरेणाविष्क्रियत इति प्रशंसार्हो विषयः। हायनेऽस्मिन्नपि प्रकाश्यमानेयं **वाक्यार्थभारती** चिरं सहृदयहृदयमन्दिरे विलसत्वित्याशासे। अनेन कर्मणा समेऽपि विद्वांसः, परिसरस्य प्राध्यापकाः, विद्यार्थिनश्च नूनमुपकृता भवन्तीति नो विश्वसितिः। श्रीजगद्गुरूणां श्रीशारदाम्बायाश्च कृपया परिसरोऽयं समभिवर्धतां, छात्राः समेधन्तां, प्राचार्याः प्राध्यापकाश्च राराज्यन्तामित्याशासे।

विकारि-आषाढासित-सप्तमी
२४/०७/२०१९, बुधवासरः

प ना शास्त्री
**परमेश्वर नारायण शास्त्री**
कुलपतिः

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
['ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन द्वारा मान्यता प्राप्त]

Prof. S. Subrahmanya Sarma
REGISTRAR
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under Ministry of HRD, Govt. of India)
[Accredited with 'A' Grade by NAAC]

## शुभाशंसनम्

सुविदितमेवैतदशेषशेमुषीमतीनां समेषां विदुषां यत् सकललोककाम्यसुखदुःखाभावयोः उपायानुपदिशन्ति महर्षिभिः प्रवर्तितानि शास्त्राण्येवेति । अतः शास्त्रोक्तोपायैः अभीष्टं फलमासादितुं शास्त्राण्यभ्यसनीयानि । शास्त्रज्ञानं त्वध्ययनाध्यापनाभ्यां, तथा गोष्ठ्यादिषु विषयोपस्थापनश्रवणाभ्याञ्च बोभूयते। अतश्छात्राणां शास्त्रार्थाधिगमाय ज्ञानविकासाय च नः संस्थानस्य राजीवगान्धीपरिसरः विश्वविश्रुतानां विपश्चिदां वक्तृत्वे **"शारदाविशिष्टव्याख्यानम्"** इति गोष्ठीं, परिसरीयाणां छात्रप्रियाणामध्यापनकुशलानामध्यापकानां वक्तृत्वे च **"वाक्यार्थपरिषद्"** इति गोष्ठीं च समायोज्य तत्राविष्कृतविषयाणां सङ्ग्रहरूपां **"वाक्यार्थभारती"** नाम्नीं शोधपत्रिकाञ्च प्रतिवर्षं प्रकाशयतीति विदित्वा नितरां सन्तुष्यामि ।

एतत्कर्मप्रवर्तकान् परिसरप्राचार्यान् **आचार्यान् ए. पी. सच्चिदानन्दवर्यान्**, शारदाविशिष्टव्याख्यान-मालासंयोजकौ **डा. वेङ्कटरमणभट्ट-डा. श्रीनिवासमूर्तिमहोदयौ**, वाक्यार्थपरिषदः संयोजकौ **डा. सूर्यनारायणभट्ट–डा. आर् नवीनमहोदयौ** च नितरां प्रशंसामि । इत्थमेव श्रीशारदापरमेश्वर्याः श्रीमज्जगद्गुरुचरणानाञ्च निरवधिकानुग्रहेण परिसरोऽयमुत्तरोत्तरं समभिवर्धतामित्याशासे ।

भावत्कः

(प्रो. एस् सुब्रह्मण्यशर्मा)

विकारि-आषाढासित-षष्ठी
२६/०७/२०१९, मङ्गलवासरः

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 011-28520979 (Fax) 011-28520976
EPABX : 28524993, 28521994, 28524995 E.Mail : sanskrit.registrar@gmail.com / ps2reg.sansthan@gmail.com
Website : www.sanskrit.nic.in

# समभिवर्धतां शास्त्रचिन्तनम्

**शास्त्रं सुचिन्तितमथो परिचिन्तनीयम्**" इति सुभाषितवचसा शास्त्रान्तरङ्गतत्त्वानि श्रवणमनननिदिध्यासनादिभिः अवगम्यन्ते । वेदानामर्थं ज्ञातुमतीववात्सल्यमस्मासु धारयन्तो महर्षयः वेदाङ्गानि चान्यानि शास्त्राणि महत्या तपस्यया स्वाध्यायेन च निर्ममिरे इति सर्वविदितं सत्यमस्ति । तान्येव शास्त्राणि नृणामस्माकमत्यमूल्यसम्पत्तय इत्युक्तौ न कापि संशीतिः । अतो हेतोः समेषां जीवनस्य परममुद्देश्यं शास्त्राणामध्ययनं तत्र प्रतिपादितानां ऐहिकामुष्मिकपरमसुखाप्तिकर्मणामनुसरणं तथैव श्रद्धया तेषां शास्त्राणां संरक्षणं संवर्धनञ्च ।

शास्त्राणां संरक्षणं करणीयमिति धिया भारतसर्वकारेण राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितम् । तद्दिशि संस्थानं शास्त्रसम्बद्धानि अध्ययनाध्यापनानुसन्धानप्रकाशनादीनि नानाविधकर्माणि कुर्वद्वरीवर्ति । तत्सङ्कल्पं समाधृत्य राजीवगान्धीपरिसरेणापि शास्त्राध्ययनाध्यापनसंरक्षणदृष्ट्या वाक्यार्थपरिषद् प्रतिमासं समायोज्यते यस्यां समेऽपि परिसरप्राध्यापकाः वाक्यार्थविचारान् प्रस्तुवन्ति । अपि च शारदाविशिष्टव्याख्यानमालानाम्नी काचिद्विशिष्टा परिषद् प्रतिमासं परिसरेऽस्मिन् आयोज्यते यस्यां देशस्य विविधप्रदेशेभ्यः विचक्षणा विद्वांसः समागत्य व्याकरण-न्याय-वेदान्त-मीमांसा-ज्यौतिष-साहित्य-शिक्षाशास्त्रादिविषयेषु विशिष्टं व्याख्यानं विधास्यन्ति ।

एवं परिषद्द्वयेऽपि कृतां वाक्यार्थानां सङ्ग्रहरूपोऽयं ग्रन्थः **वाक्यार्थभारती**नामकः हायनेऽस्मिन्नपि प्रकाश्यते । वाक्यार्थान् सङ्गृह्य पुस्तकाकारेण मुद्रयित्वा ग्रन्थप्रकाशने परिश्रमं विदधानाः विद्वांसः **डा. वेङ्कटरमणभट्टवर्याः, डा. सूर्यनारायणभट्टवर्याः, डा. आर् नवीनवर्याः, डा.**

**श्रीनिवासमूर्तिवर्य**श्चावश्यमभिनन्दनीयाः । कर्मण्यस्मिन् निरन्तरमस्मान् प्रेरयन्ति प्रवर्तयन्ति च राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः विविधशास्त्रमर्मज्ञाः प्रशासनदक्षाः **आचार्यपरमेश्वरनारायणशास्त्रिवर्याः**, तेभ्यः सप्रणति कार्तज्ञ्यं वितरामि । तथैवास्मत्कुलसचिवेभ्यः विद्वद्भ्यः आचार्यसुब्रह्मण्यशर्मवर्येभ्यः प्रणामान् निवेदयामि । एतादृशकर्मसु श्रीमज्जगद्गुरूणां **श्री श्री भारतीतीर्थमहास्वामिनां**, तत्करकमलसञ्जातानां **श्री श्री विधुशेखरभारतीमहास्वामिनाञ्च** परमानुग्रह एव निदानं भवति । अत उभयेषां जगद्गुरूणां पादपद्मयोः सभक्तिश्रद्धं प्रणामान् समर्पयामि । क्षेत्राधिष्ठात्र्याः श्रीशारदाम्बायाः चरणनलिनयोः प्रणामान् वितनोमि । कामये च ग्रन्थोऽयं पठितॄणां स्वान्तमावर्जयेदिति ।

ए. पी. सच्चिदानन्दः

आचार्यः ए. पि. सच्चिदानन्दः

(प्राचार्यः)

# सम्पादकीयम्

इह खल्वनवद्यविद्याविद्योतिनि प्रपञ्चे आर्षविद्यायाः शास्त्रविद्यायाश्च महत्वं सर्वैरपि ज्ञानज्योतिर्विद्योतितान्तः करणैः शास्त्रज्ञैः सन्ततं प्रकीर्त्यते । **"शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्"** इति शाबरभाष्यस्य वाक्यमेव प्रमाणान्तरागोचरसमुचितार्थप्रतिपादनं यः करोति स एव शब्दः शास्त्रमिति स्मारयति। यदा अर्थविज्ञानं जायते तदा लोकः आत्मोद्धारं प्राप्नोति । अर्थविज्ञानेन पुरुषार्थचतुष्टयपरिज्ञानं जायते येन च पुरुषस्य जीवनं सार्थकं सम्भवति । अतः शास्त्राध्ययनं समेषामपि पुरुषार्थाभिलाषिणां परमं कर्तव्यमित्यत्र नास्ति संशयः । शास्त्रे निपुणतामवाप्तुं निरन्तरं यत्नः विचारः विमर्शः वाक्यार्थश्च विधेयो वर्तते । भगवत्पादैः शङ्कराचार्यैः साधनपञ्चके **"वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयताम्" । दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्"** इति शास्त्रविषयकं ब्रह्मविषयकञ्च ज्ञानं प्राप्तुमपेक्षितः समुत्कृष्टः मार्गः प्रादर्शि । एतस्मिन् शास्त्रज्ञानसम्पादनमार्गे प्रवृतः राष्ट्रियसंस्कृतसंस्थानान्तर्गतः दक्षिणाम्नायश्रीशारदापीठाधीश्वराणां **जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां**, तत्करकमलसञ्जातानां **श्रीश्रीविधुशेखरभारती-महास्वामिनाञ्च** परमानुग्रहेण वर्धमानः शृङ्गेरीस्थः राजीवगान्धीपरिसरः छात्राणाम् अध्यापकानाञ्च हितकांङ्क्षया तत्तच्छास्त्रेषु कृतभूरिपरिश्रमाणां देशे विदेशेषु च प्रथितयशस्कानां विदुषां विशिष्टविषयेषु व्याख्यानमालां, परिसरप्राध्यापकेषु वाक्यार्थप्रवृत्तिवर्धनार्थं वाक्यार्थपरिषदं च समाकल्पयत् । तस्यां शारदाविशिष्टव्याख्यानमालायां वाक्यार्थपरिषदधिवेशनेषु च प्रस्तुतैः व्याख्यानैः समलङ्कृतः वाक्यार्थभारतीनामकः ग्रन्थविशेषः प्रत्येकं संवत्सरेऽपि परिसरपक्षतः प्रकाशनं प्राप्य शास्त्रज्ञलोकमानसमधिरोहतीति परिसरस्यास्य वैशिष्ट्यमपि वर्धयतीति ज्ञापयितुमानन्दो जायते ।

अस्मिन् हायने आषाढ-कृष्ण-द्वितीयायाम् इन्दुवासरे (30.07.2018) **आचार्यश्रीपादभट्टमहाभागाः** होराशास्त्रस्य विशिष्टव्याख्यानेन शारदाविष्टव्याख्यानमालां परिषत्त्रयं च उदजीघटन् । तदन्तरं वेदान्तशास्त्रे श्रावणकृणद्वादश्यां शुक्रवासरे (08.09.2018) **आचार्यचराणां शुद्धानन्दपाठकवर्याणां**, व्याकरणशास्त्रे भाद्रपदशुक्लनवम्यां कुजवासरे (18.09.2018) **आचार्याणां किशोरचन्द्रपाढीवर्याणां**, शिक्षाशास्त्रे पुष्यकृष्णपञ्चम्यां शुक्रवासरे (25.01.2019) **डा.राधागोविन्दत्रिपाठिमहाभागानां**, न्यायशास्त्रे माघशुक्लतृतीयायां शुक्रवासरे (08.02.2019) **आचार्याणां नरहरिभट्टवर्याणां**, साहित्यशास्त्रे माघशुक्लनवम्यां गुरुवासरे (14.02.2019**) आचार्याणां के.पि. केशवन् महोदयानां**, मीमांसाशास्त्रे माघशुक्लदशम्यां शुक्रवासरे (15.02.2019) **वेदब्रह्मश्री. कुप्पाशिवसुब्रह्मण्यावधानिनां** विशिष्टव्याख्यानानि सम्पन्नानि ।

एवमेव वाक्यार्थपरिषदधिवेशनेषु परिसरस्य प्राध्यापकास्स्र्वेऽपि स्वाधिगतशास्त्रेषु छात्रबोधगम्यान् वाक्यर्थान् व्यधासिषुः । अस्मिन् हायने श्रावणमासात् फाल्गुनमासपर्यन्तं प्रतिमासं एकमधिवेशनमाहत्य सप्ताधिवेशनानि वाक्यार्थपरिषदः समपद्यन्त । प्राचार्या आचार्याः सच्चिदानन्दवर्याः, आचार्याः महाबलेश्वर पि. भट्टवर्याः,आचर्याः हरिनारायण तिवारिवर्याः, आचार्याः सुब्राय वि भट्टवर्याः, आचार्याः का इ मधुसूदनवर्याः, डा. चन्द्रकान्तवर्याः, डा. राघवेन्द्रभट्टवर्याश्च एकैकशः एतेष्वधिवेशनेषु पर्यवेक्षकपदमलङ्कृत्य वाक्यार्थपरिषदः अधिवेशनानि सफलानि समपादयन् । एतादृशोत्तमकार्यसम्पादने राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य कुलपतीनामाचार्याणां **परमेश्वरनारायणशास्त्रिवर्याणां** सन्मार्गदर्शनं सुधारूपं स्मरन्तः प्रणामान् निवेदयामः। संस्थानस्य कुलसचिवा आचार्याः **सुब्रह्मण्यशर्मवर्या** अपि

शुभसन्देशमयच्छन् । तेभ्योऽपि कार्तज्ञ्यकुसुमानि समर्पयामः । परिसरस्य प्राचार्याः आचार्या **ए. पि. सच्चिदानन्दवर्याः** प्रतिपदमपि परिसरस्य पुरोगत्यै सत्कर्मणि प्रेरयन्तः विराजन्ते तेभ्यः प्रणामान् निवेदयन्तः धन्यवादकुसुमानि समर्पयामः ।

एवं परिसरस्य प्राध्यापकाः सर्वेऽपि निर्दिष्टे समये वाक्यार्थान् प्रस्तुत्य लेखनमपि दत्वा समुपाकार्षुरिति समेभ्योऽपि कार्तज्ञ्यं ज्ञापयामः। कार्यालयाधिकारिश्रीगुरुराजभट्टप्रभृतयः सकलविधसहयोगं प्रादुरिति तेभ्योऽपि कार्तज्ञ्यं ज्ञापयामः । टङ्कणकार्ये सहयोगं कृतवतीभ्यः श्रीमतीभ्यः सौम्या-शुभा-शारदा-मञ्जुलाभ्यः धन्यवादाः समर्प्यन्ते । परिसरस्य वाग्वर्धिनीपरिषदः पदाधिकारिणः छात्रान् साधुवादैः सन्तोषयामः । परिसरेऽस्मिन् यत्किमपि सुभद्रं कार्यं सिध्यति चेत् तत्र जगद्गुरूणामसीमानुकम्पा, अनुग्रहश्च कारणमिति सर्वैरपि विदितमेव । जगदम्बायाः क्षेत्राधिष्ठात्र्याः शारदाम्बायाः चरणकमलयोः प्रणामान् समर्पयामः । **जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीस्वामिनाञ्च** चरणकमलेषु नतिसन्ततिमाम्रेडयामः ।

पुस्तकमिदं शास्त्राधिजिगांसूनां विद्वद्वरेण्यानाञ्च मनस्तोषकं जायतामिति आशास्महे ।

**सम्पादकाः**

| | |
|---|---|
| **डा.वेङ्कटरमणभट्टः** | **डा.सूर्यनारायणभट्टः** |
| **डा.श्रीनिवासमुर्तिः** | **डा.आर्.नवीनः** |

# विषयानुक्रमणिका

## अद्वैतवेदान्तविभागः

१. आचार्यशङ्करस्तस्य सिद्धान्तश्च

प्रो. शुद्धानन्दपाठकः 01

२. आवृत्त्यधिकरणम्

आचार्यः महावलेश्वर पि भट्टः 08

३. परामर्शाधिकरणम्

डा. गणेश ईश्वर भट्टः 13

४. ज्ञानकर्मणोः मोक्षसाधनत्वविचारः

डा श्रीकरः जि. एन् 21

५. भूमाधिकरणम्

श्री निरञ्जन भट्टः 26

## व्याकरणविभागः

६. कृद्वृत्तिविमर्शः

प्रो. किशोरचन्द्रपाढी 33

७. न्यायस्योपाङ्गत्वं वाक्यार्थबोधस्वरूपविमर्शश्च

आचार्यः हरिनारायण तिवारी 41

# विषयानुक्रमणिका


८. स्वरितञितः कर्त्रभिप्राये क्रियाफले

डा.चन्द्रशेखरभट्टः 55

९. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ

चिर्रावूरि कृष्णानन्तपद्मनाभः 59

१०. त्रिशब्दविचारः

डा. प्रमोद भट्ट: 64

११. अपादानविचारः

श्री अरुण भट्टः 69

**मीमांसाविभागः**

१२. मीमांसाशास्त्रे विशिष्टं व्याख्यानम्

आचार्यः के. एस्. एस्. अवधानी 74

१३. दर्शपूर्णमासविचारः

आचार्यः सुब्राय वि भट्टः 86

१४. काम्यकर्मणां भूयोभ्यासाधिकरणम्

डा. सूर्यनारायणभट्टः 93

१५. "अथातो धर्मजिज्ञासा " इति सूत्रार्थविचारः

डा. वेङ्कटेशताताचार्यः 97

# विषयानुक्रमणिका

## न्यायविभागः

१६. न्यायशास्त्रस्योपयोगिता

आचार्यः नरहरि के. भट्टः 102

१७. परामर्शः

आचार्यः का. ई. मधुसूदनः 107

१८. ईश्वरानुमानम्

डा. नवीनहोळ्ळः 111

१९. न्यायकौस्तुभरीत्या इवपदार्थविचारः

डा. श्यामसुन्दरः ए. 115

२०. नञर्थविचारः

डा. आर् नवीनः 121

## साहित्यविभागः

२१. व्यक्तिविवेके पाणिनीयपरामर्शः

आचार्यः केशवन् के. पि. 125

२२. रससूत्रव्याख्याने नव्यमतस्य विमर्शः

डा. राघवेन्द्रभट्टः 133

२३. ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्

## विषयानुक्रमणिका

डा. चन्द्रकला आर्. कोण्डी 137

२४. काव्यमार्गे स्वरो न गण्यते

डा. कोम्पेल्लि विनयकुमारः 143

२५.कादंबरीसङ्केतविचारः

डा. एम्. श्रीनिवासमूर्तिः 148

२६. दीपकालङ्कारः

श्री श्रीकरः वि. 152

## ज्यौतिषविभागः

२७. सिद्धान्तशेखरः

आचार्यः ए. श्रीपादभट्टः 157

२८. ॥ वृष्टिविज्ञानम् ॥

डा. मुरलिकृष्ण टि. 164

२९. ग्रहणम्

डा. प्रसादभट्टः 176

३०. गर्भविज्ञानम्

डा. प्रदीपशर्मा 188

३१. अधिमास-क्षयमासमीमांसा

# विषयानुक्रमणिका

डा. रमानन्द भट्टः एन् 198

३२. जातके मेलापकविचारः

डा. सुधांशुकुमारनन्दः 215

## शिक्षाविभागः

३३. शिक्षणसूत्राणि – प्राचीनार्वाचीनविचारश्च

डा. राधागोविन्दत्रिपाठी 221

३४. लक्षिताधिगमविशेषः

डा. चन्द्रकान्तः 226

३५. स्वलीनता (Autism)

डा. रामचन्द्रुल बालाजी 230

३६. वैयक्तिकानुदेशनम् (Personalized System of Instruction)

डा. हरिप्रसादः के. 237

३७. विश्लेषणात्मकमनोविज्ञानम्

डा. गणेश .ति. पण्डितः 246

३८. समाजे लोकतन्त्रशिक्षणस्य भूमिका

डा. वेङ्कटरमण एस्. भट्टः 252

३९. शिक्षामनोविज्ञानानुसारं परामर्शविचार:

# विषयानुक्रमणिका

डा. नारायण वैद्य: 255

४०. श्री अरविन्दस्य शिक्षादर्शनस्य सम्प्रत्यय:

डा. पि. अरविन्दकुमार: 260

**********

# आचार्यशङ्करस्तस्य सिद्धान्तश्च

**प्रो. शुद्धानन्दपाठकः**
पूर्वाद्वैतवेदान्तविभागाध्यक्षः
दर्शनसङ्कयप्रमुखश्च
श्रीलालबहाद्दूरशास्त्रिसंस्कृतविद्यापीठम्
नवदेहली-**16**

परमपवित्रदेशे भारते मध्ये-मध्येऽनाविद्यायोगात् सीदज्जीवनिकायदुर्दशां दर्शं दर्शं जगत्कल्याणचिकीर्षया स्वप्रवर्तितसमाम्नायधर्मरक्षाकामनया च दयावशंवदः स्वयं भगवान् सोमनाथ आदिनाथो विश्वनाथो महेश्वरो महादेवः सदाशिवो विविधमहापुरुषरुपेणाऽवतरतीति विदितमेव समान्नयाऽऽस्थावतां वीतरागिणां विरागिणां त्यागिनां मनीषिणामिति ।

यदेयं भारतभूरासीदाक्रान्ता वेदविरोधिसम्प्रदायप्रचारविचार-वितनदूषणदूषितान्तः करणैः दुरभिसन्धिभिः, मूर्च्छिता इवाभूदनादिवैदिकपरम्परा, तदैव 788 आविर्बभूवाऽस्मदिष्ठ्या सकलाऽज्ञानध्वान्तविध्वंसो द्वितीयो भास्कर इव भक्तजनाऽन्तः पद्मं समुल्लासयन् जगतां तत्र भवतामत्रभवतां शङ्करो भगवान् श्रीशङ्कराचार्यः। अत एवोक्तम्-

**दुष्टाचारविनाशाय प्रदुर्भूतो महीतले ।**
**स एव शङ्कराचार्यः साक्षात्कैवल्यनायकः ॥**

**चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यति** । इति वायुपुराणोक्तेः भगवत्पादश्रीशङ्कराचार्यस्येश्वराऽवतारता गम्यते ।

असौ अपारकूपारतरङ्गप्रक्षालनपावितदिग्भागस्य केरलप्रदेशस्य कालडीनामकग्रामेऽष्टमशताब्द्यामवततार । तत्रैकाऽऽख्यायिका वर्तते- भगवतः शङ्कराचार्यस्य पिता परमेश्वरीभक्तः , ग्रामाद्बहिः मन्दिरं गत्वा, दुग्धेन परमेश्वरीं संस्नाप्य, पूजां विधाय , नमस्कृत्य , अविशिष्टं किञ्चिद् दुग्धं सङ्गे गताय पुत्राय शङ्कराचार्याय प्रयच्छति । बालकस्य मनसि 'प्रत्यहं परमेश्वरी स्वयं पिबति , पीताशेषं मह्यं पिता ददाति' इति मतिर्जागर्ति । कदाचिद् ग्रामान्तरं गच्छन् पिता बालकस्य मातरं प्रत्युक्त्वा गतः 'प्रत्यहं मदागमनं यावत् तावत् त्वया दुग्धेन स्नपनीया भगवती पूजनीया च सम्यगिति । सा तदा कुर्वाणाऽऽसीत् किन्तु एकस्मिन् दिने माता पुत्रं प्रोषितवती 'दुग्धेन भगवतीं संस्नाप्य पूजां विधायाऽऽगच्छेति । बालको गत्वा पूजां विधाय दुग्धं पुरो निधाय, 'हे परमेश्वरि ! इदं दुग्धं पिबेति ' गदितवान् । यदा विलम्बो जातः , भगवती च न पिबतीति विचिन्त्य रोदितुमारब्धवान् । तस्मिन्समये परमेश्वरी दययाऽऽविर्भुय दुग्धं पीतव्ती । पुनः पात्रं रिक्तं विलोक्य ' सर्वं त्वया पीतं मदर्थे न स्थापितं किमपि ' इति रोदितुं प्रवत्तम् । तदा विहस्य सा जगज्जननी जगदम्बा पराम्बा त्रिपुरसुन्दरी भगवती बालकम् अङ्के समारोप्य स्तन् दत्त्वती ।स्तन्यपानेन सर्वाः विद्याः तदानीमेव पुरःस्फूर्तिका जाताः । कवयन्नेव गृहे गतः । एतस्मिन्नन्तरे पिता समागतः । बालकस्याऽऽकृतिं वाग्विजृम्भितं चालोक्य साश्चर्योऽभूत् ।

भगवत्याः दर्शनानन्तरं किमु कथनीयमाचार्यविषये सप्तवर्षाभ्यन्तर एवासौ चतुरोऽपि वेदानधीत्य, अष्टमे वर्षे सदाशिवसमारब्धायां सनातनपरम्परायां श्रीगोविन्दभगवत्पादेभ्यः सन्यासदीक्षामासाद्य चतुर्भिरेव वत्सरैः श्रीमद्भगवद्गीताब्रह्मसूत्रोपनिषदानदिकं सरहस्यमध्यैष्ट । बदरिकाश्रमे चत्वारि वर्षाणि न्युष्य बादरायणरचितब्रह्म्सूत्रमाश्रित्य प्रसन्नं गम्भीरञ्च भाष्यम् अकार्षीत् भाष्यविषये पद्मपादाचार्येणोक्तञ्च पञ्चपादिकायाम् –

1. **“भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धयाऽऽरभे ।**

वाचस्पतिमिश्राः कथयन्ति भामत्यां मङ्गलाचरणे यत्-

2. **नत्वा विशुद्धविज्ञानं शङ्करं करुणाकरम् ।**
**भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥** इति ।

सर्वेषां दर्शनानां वेदान्तदर्शनमेव दर्शनीयतमं दर्शनमिति गौडब्रह्मानन्दोक्तेः सर्वदर्शनेषु प्रतिपाद्यगौरवेण गरिष्ठस्य दर्शनश्रेष्ठस्य वेदान्तदर्शनस्य –

**3. सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥**

इति भाष्यप्रणयनानन्तरं तत्त्वबुभुत्सूनां सुलभावगाहाय श्रीमद्भगवद्गीताभाष्यमुपनिषद्भाष्यञ्च साक्षात्परम्परया वा जीवान् समुद्दिधीर्षया अनात्मभ्यो विवेकेनाऽऽत्मानं नित्यशुद्धबुद्धमुक्तस्वभावं बोधयितुं प्रणिनाय भगवान् भाष्यकारः भगवत्पादः श्रीशङ्कराचार्यः ।

आचार्यः चतसृषु दिक्षु भ्रामं भ्रामं श्रुतियुक्तिन्यायाविरुद्धं नास्तिकमतं निरस्य पुनः सरर्वानवद्यं पायेयमिव मुमुक्षूणां वैदिकधर्मं समुन्निनाय ।तदर्थं प्राच्यां दिशि गोवर्धनमठस्य, प्रतीच्यां शारदामठस्य, उदीच्यां ज्योतिर्मठस्य, अवाच्यां श्रृङ्गेरीमठस्य च स्थापनामकार्षीत्। मठस्थापनानन्तरं सन्यासिनामपि सर्वं कार्यं सुव्यवस्थितं कृतम् । संन्यासिनां दशोपनामानि भवन्ति यथा गिरिपर्वतसागरपुरिभारतीसरस्वतीबनाऽरण्यतीर्थाऽऽश्रमाश्च ।दश नामसु गिरिपर्वतसागराणां ज्योतिर्मठो वर्तते । सम्प्रदायः आनन्दवारः ।क्षेत्रः बदरिकाश्रमः । देवता नारायणः ।देवी पूर्णगिरी । अचार्यः त्रोटकाचार्यः ।तीर्थमलकनन्दा । ब्रह्मचारी आनन्दः ।वेदोऽथर्ववेदः । महावाक्यम् अथर्ववेदस्य ‘अयमात्मा ब्रह्म’ ।उपनिषद् माडूक्योपनिषद् । गोत्रं भृगुः ।

1. पञ्चपादिका
2. भामति
3. पञ्च पादिका

पुरीभारतीसरस्वतीनां श्रृङ्गेरीमठो वर्तते । सम्प्रदायः भूरिवारः ।क्षेत्रं रामेश्वरम् । देवताऽऽदिवराहः ।देवी कामाक्षा । ऋषिः श्रुङ्गी । आचार्यः पृथ्वीधराचार्यः । तीर्थं तुङ्गभद्रा । ब्रह्मचारी चैतन्यः । वेदः यजुर्वेदः । उपनिषद् बृहदारण्यकः । महावाक्यं यजुर्वेदस्य “अहं ब्रह्मास्मि” । गोत्रं भूर्भुवः ।

बनाऽरण्ययोः गोवर्द्धनमठो वर्तते । सम्म्प्रदायः भोगवारः । देवः जगन्नाथः । देवी विमला । वेदः ऋग्वेदः । उपनिषद् ऐतरेयोपनिषत् , महावाक्यं ऋग्वेदस्य “प्रज्ञानं ब्रह्म ” । तीर्थं महोदधि गोत्रं काश्यपगोत्रं, ब्रह्मचारी प्रकाशः । अचार्यः श्रीपद्मपादाचार्यः । क्षेत्रं जगन्नाथपुरी।

तीर्थाऽऽश्रमयोः शारदामठो वर्तते । क्षेत्रं द्वारकापुरी । सम्प्रदायः कीटवारः । देवः सिद्धेश्वरः । देवी भद्रकाली । वेदः सामवेदः ।उपनिषत् छान्दोग्योपनिषत् महावाक्यं सामवेदस्य तत्वमसि । तीर्थं गोमती ।गोत्रम् अविगितम् । ब्रह्म्चारी स्वरूपः । अचार्यः सुरेश्वराचार्यः । अनेन प्रकारेण सर्वमाचार्येण दशनामसन्न्यासिनां कृते सुव्यवस्था कृता ।मठसिद्धान्ताश्च युक्यिपूर्वकं प्रतिपादिताः ।

भगवताऽऽचार्येण शास्त्रविषये यः सिद्धान्तः प्रतिपादितः तस्मिन् विषये चर्चा क्रियतेऽधुना । श्रीशङ्करभगवत्पादस्तु ‘ज्ञानादे केवलात् ’ कैवल्यम् आतस्थे । दुःखस्य अवद्याप्रत्युपस्थापितत्त्वात् , अविद्यायाः विद्ययैव निवृत्तिसम्भवात्, यथा किल हिमालयगुहादिगतं तमः प्रकाशेनैव निवर्तते, न तु दण्डप्रहारादिना, नाऽपि होमजपादिना तथा हृदयगुहान्तर्गतम् अविद्यालक्षणं तमोऽपि विद्याप्रकाशेनैव

निवर्तयितुं शक्यते, अत एव श्रुतौ "ज्ञानादेव कैवल्यम्" इति 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽयनाय ' इति चावधारणश्रुती प्रावर्तेताम् ।

'ज्ञानदेव' इत्यत्र एवकारेण-इतरसाधनव्याकृत्तिः । 'नान्यः पन्थाः' इति इतरसाधनानां स्पष्टनिषेधः । शङ्करभागवत्पादेन सम्पोषितः प्रसारितः प्रचारितश्चायं सिद्धान्तः केवलाद्वैतपदेन निगद्यते । स एव ब्रह्मवाद इत्यप्युच्यते ।

यथाऽद्वैतशब्दव्युत्पत्या एव प्रतीयते यदत्र द्वैतबुद्धेरात्यन्तिकोऽभावः, तादृशबुद्धेरतितरामावश्यकता इदानीं सर्वदैव चेह बोभवीति लोके समरसताया अक्षुण्णतायै । द्वैतधीः सर्वदैव भेदजनिका भवति , भेदो हि सर्वाऽनर्थमूलम् अतः सर्वविधाऽनर्थस्य उन्मूलनाय भेदधिक्कृतिः सुतरां समादरणीया भवेल्लोके ।

लोकस्य यथायथं सुचारुसंघटनताऽवस्थित्यै भगवत्पादशङ्करसमुल्लसितोऽयम् अद्वैतराद्धान्तः सदा सर्वदा सर्वत्र हितकरः सम्पपद्यते इति ज्ञानगरिमगरिष्ठानां विचक्षणानाम् अनुभवः । अद्वैततत्त्वे हृदि सुतरां सुप्रतिष्ठिते सर्वत्र मिथः आत्मीयतायाः ऐक्यबुद्धेश्च सञ्चारो जायते । अत्र सत्तात्रयपरिकल्पनमपि सर्वविधचिन्तनसमन्वयाय एव स्वीक्रियते ।

ब्रह्म तु सच्चिदानन्दस्वरूपाद्वयमेव वस्तुतयाऽनुभूयमानं सत्तत्त्वम् । मया पुनः अनिर्वचनीया सा सदसद्भ्यां भिन्ना ज्ञाननिवर्त्या च । तथा चोक्तं भागवत्पादेन

**सन्नाप्यसन्नाप्युभयात्मिका नो,**
**भिन्नाप्यभिन्नाप्युभयात्मिका नो**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो,**
**महाद्भुतानिर्वचनीयरूपा ॥**

**तथा च -** **अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥**

**-विवेकचूडामणिः**

मायाशब्दस्य कोशकारेण व्याख्या क्रियते – विश्वं माति यस्यामिति माया, अर्थाद् विशं यस्यां भातीति माया । विश्वं मिमीते यस्यामिति माया अर्थाद् विश्वस्य कल्पना क्रियते यस्यामिति माया । अथवा मां यातीति माया अर्थात् निषेधं प्राप्नोतीति माया ।

आचार्यस्य सिद्धान्ते "प्राप्तस्यैव प्राप्तिरिति " 'दशमस्त्वमसि ' इति न्यायादिभिर्बोध्यते । समेषामेव साधनानां स्वस्वरूपावाप्तौ एव तात्पर्यमिति अद्वैतराद्धान्तः । तत्र मोक्षं सम्पादयितुमात्मदर्शनं कर्तव्यं , कथं दर्शनं भवेत् ? श्रवणान्मननान्निदिध्यासनाच्चेति तत्र श्रुतिः" आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " इति ।

"ब्रह्मविदाप्नोति परम्" ब्रह्म वेद ब्रह्मैव भवति । यस्य विदुषः अविद्या नश्यति स स्वराड् भवति ब्रह्मरूपो भवति ।

अचार्यस्य मुख्यसिद्धान्तः "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः । अत्र प्रथम चरणं शुकरहस्योपनिषदः वर्तते तथा द्वितीयचरण निरालम्बोओपनिषदः वर्तते। एतत्सर्वं ज्ञानविषये प्रतिपादितम् । अधुनोपासनासिद्धान्तः प्रतिपाद्यते । उपासना त्रिविधा भवति । वैदिकी तान्त्रिकी पौराणिकी च । द्विजेतरेषां कृते तान्त्रिकी पौराणिकी चोपासना वर्तते । द्विजानां कृते सर्वा उपासनाः सन्ति तान्त्रिकी । उपासनाविषये कुण्डलिनीशक्तिमवलम्ब्य- सौन्दर्यलहर्यामुच्यते भगवत्पादेन यत् –

**महीं मूलाधारे कमपि मणिपूरे हुतवहं**
**स्थितं स्वाधिष्ठाने हृदि मरूतमाकाशमुपरि ।**
**मनोऽपि भ्रूमध्ये सकलमपि जित्वा कुलपथं**
**सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ - सौन्दर्यलहरी**

उक्तञ्चाचार्येण-

**सुधाधारासारैश्चरणयुगलान्तर्विगलितैः**
**प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नाय महसः ।**
**अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं**
**स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥**

अनेन प्रकारेणोपासनाऽपि मनः शुद्ध्यर्थं स्वीक्रियते । एष एवास्माकमाचार्याणां सिद्धान्तः इति । अन्ते च शङ्करदिग्विजयानुसारमसावाचार्यः द्वात्रिंशे वर्षे पाञ्चभौतिकं कलेवरं **820** ईशवीये परित्यज्य ब्रह्मस्वरूपमवाप्नोत् । यथोक्तम् –

**अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।**
**षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ॥ इति**

अद्यापि तत्प्रज्वालितो ज्ञानमयः सिद्धान्तोऽविद्यारचितविषमविषयाऽन्धकूपे पतितानां जीवानां मुमुक्षूणाञ्च मोक्षमार्गमालोकयन् चकास्ति ॥ इति शम् ॥

**********

ISSN: 2249-538X

# आवृत्त्यधिकरणम्

**आचार्यः महाबलेश्वर पि भट्टः**

वेदान्तविभागाध्यक्षः

उपास्महे नृसिंहाख्यं ब्रह्म वेदान्तगोचरम् ।
भूयो लालितसंसारच्छेदहेतुं जगद्गुरुम् ॥

तत्र तावत् मानवं जन्म सफलीकर्तुम् अनाद्यनिर्वचनीयमायाकल्पितनामरूपात्मकप्रपञ्चे गर्भजन्मजरामरणादिनानाविध-दुःखैः परितप्यमानं जीवं स्वात्मबोधेन समुद्धर्तुं सम्प्रवृत्ता वेदान्ताः इति निश्चप्रचं समेषां शास्त्रविदां समाजे । तथा च भगवती श्रुतिः – "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः", "तद्विजिज्ञासस्व तद्ब्रह्म" इत्यादिशति । इदं च शास्त्रोदिष्टं ब्रह्मात्मतत्त्वं सकलोपनिषदां परमं चरमं तात्पर्यभूतं भगवती भगवद्गीतापि तथैव स्मारयति । न केवलं महाभारतस्य, अपि तु पुराणादिसमस्तस्मृतिग्रन्थानां सारभूता गीता अद्वैतात्मामृतवर्षिणी समग्रे जगतीतले विश्रुतेति को वा न जानाति ? तदिदं श्रुतिस्मृतिप्रसिद्धम् अद्वितीयं ब्रह्मतत्त्वं चतुर्लक्षण्यां शारीरकमीमांसायां सयुक्तिकं सप्रपञ्चं प्रपञ्चितं सूत्रकृता बादरायणाचार्येण, तथैव भाष्यकृता शङ्कराचार्येण च । एवञ्च प्रस्थानत्रयात्मकं वेदामीमांसाशास्त्रं श्रुतिस्मृतिसूत्रैः असन्दिग्धतया अविपर्यस्ततया अद्वैतं ब्रह्म करतलन्यस्तबदरवत् सुस्पष्टं निरूपयति ।

अथोपनिषदां स्मृतीनाञ्च ऐदम्पर्यं निरूपयितुं प्रवृत्ते शारीरकमीमांसाशास्त्रे समन्वयाविरोधसाधनफलाख्याः चत्वारोऽध्यायाः प्रसिद्धाः । प्रथमे ब्रह्मकारणवादः समर्थितः । ब्रह्मैव जगतः अभिन्ननिमित्तोपादानकारणम् । तच्च सच्चिदानन्दस्वरूपं सर्वज्ञं सर्वशक्तिसमन्वितं नः समेषाम् आत्मा इति वेदान्तवाक्यानां

समन्वयप्रतिपादनेन प्रपञ्चितम् । द्वितीये अविरोधाध्याये इदंप्रथमतया अद्वैतब्रह्मवादे स्मृतिविरोधो वा युक्तिविरोधो वा नास्तीति निरूप्य साङ्ख्यादिपक्षानां निराकरणं कृतम् । एवं साधनचतुष्टयसम्पन्नानां मुमुक्षूणां ब्रह्मविचारे समासक्तचित्तानाम् आत्मदर्शनसाधननिरूपणाय प्रवृत्तः तृतीयोऽध्यायः । तत्र बहुविधानि साधनानि भवन्ति । अन्तरङ्गसाधनानि बहिरङ्गसाधनानि अथवा सन्निपत्योपकारकाणि आरादुपकारकाणि इति । "श्रद्धाभक्तिध्यानयोगादवैहि" इति कैवल्योपनिषत् अनुशास्ति । "ज्ञानादेव तु कैवल्यं", "नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिवचननिचयप्रामाण्यात् अहमेवं मन्ये योगानुष्ठानेन मनसः स्वायत्तता सिद्ध्यति । शास्त्रसम्मतनित्यनैमित्तिककर्मानुष्ठानेन निष्कामकर्मानुष्ठानेन च असंस्कृतं मनः शुद्धं संस्कृतं सत् अन्तर्मुखं भवति । विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहीकरणेन उपासनेन मन एकाग्रं भवति । एवंकारं अध्यात्मयोगे प्राप्ते वेदान्तानां श्रवणमनननिदिध्यासनेन आत्मदर्शनं सिद्ध्यति । इत्थं कर्मयोगोपासनैः बहिरङ्गसाधनैः सम्पन्ने मनोमुकुरे अखण्डाकारा वृत्तिरुदेति । सैव समूलं मायाविलासं सलीलं भस्मसात् कुरुते ।

एवं सति कर्मयोगादिबहिरङ्गसाधनसम्पन्नैः मुमुक्षुभिः श्रवणादिकं कर्तव्यं चेत् किं सकृद्वा आहोस्वित् असकृद्वा अनुष्ठेयम् इति जिज्ञासा समुदेति । तन्निर्णयाय प्रवृत्तम् आवृत्त्यधिकरणं शारीरकमीमांसायां चतुर्थस्य प्रथमे पादे आदिमम् अधिकरणम् । पूर्वोत्तराध्यायोः साधनफलभूतयोः हेतुहेतुमद्भावः सङ्गतिः ।

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।**
**प्रयोजनं सङ्गतिश्च शास्त्रेऽधिकरणं मतम् ॥**

इति प्राञ्चः आचार्या ऊचिरे ।

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः", "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत", "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" इत्यादिवाक्यं विषयः ।

श्रवणादीनि सकृदनुष्ठेयानि उत असकृदिति संशयः । शास्त्रीयकर्मणः उभयथा अनुष्ठानदर्शनात् संशयः । पूर्वपक्षे सकृदनुष्ठानं, सिद्धान्ते दर्शनोद्देशेन विहितत्वात् असकृदनुष्ठानम् । पूर्वपक्षे अदृष्टफलं मोक्षः, सिद्धान्ते दृष्टफलमिति विवेकः ।

अत्रायं पूर्वपक्षः – आत्मदर्शनमुद्दिश्य श्रवणादीनि विहितानि । विहितत्वात् अवश्यं कर्तव्यम् । सकृच्छ्रुतत्वात् सकृदनुष्ठानं कर्तव्यम् । इडो यजति, बर्हिर्यजति इत्येवं पञ्च प्रयाजाः सकृच्छ्रुताः । सकृदेव तेषाम् अनुष्ठानं करिष्यते । तथैव श्रवणादीनामपि एकवारमेव अनुष्ठानम्, श्रोतव्यः मन्तव्यः निदिध्यासितव्यः इति । असकृच्छ्रवणम् अस्ति चेत् तर्हि यावद्वारं श्रुतं तावद्वारं कर्तव्यम् । सकृच्छ्रवणं, सकृन्मननं, सकृन्निदिध्यासनञ्चेति । तेन शास्त्रार्थः सिद्ध्यति । अन्यथा अश्रूयमाणायाम् आवृत्तौ क्रियमाणायां शास्त्रार्थः कदर्थितो भवति । “अहरहः सन्ध्यामुपासीत”, “यावज्जीवमग्निहोत्रं जुहुयात्” इत्येवं प्रतिदिनं जीवनपर्यन्तं वा श्रवणादीनां विधानाभावात् सकृदनुष्ठानेनैव अपूर्वद्वारा फलसिद्धेः सकृत् श्रवणादीनामनुष्ठानं कर्तव्यमिति पूर्वपक्षः ।

अत्र सिद्धान्तः –

श्रवणादीनाम् आवृत्त्या अनुष्ठानं कर्तव्यम् । तथा च पारमर्षं सूत्रम् – “आवृत्तिरसकृदुपदेशात्” इति । आत्मा द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति आत्मदर्शनमुद्दिश्य श्रवणादीनि विहितानि । दर्शनं नाम साक्षात्कारः, अपरोक्षानुभव इति यावत् । श्रवणं नाम सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलमानसो व्यापारः । श्रुतस्यार्थस्य युक्तिभिरनुचिन्तनं मननम् । श्रवणमननाभ्यां सुनिश्चिते अद्वितीये परमात्मनि तैलधारावत् प्रत्ययैकतानता ध्यानं निदिध्यासनं नाम । प्रमाणासम्भावना-प्रमेयासम्भावना-प्रमित्यसम्भावनानां व्यावृत्त्यर्थं क्रमशः श्रवणादीनि उपदिष्टानि । तथा चोक्तं चिरन्तनैरभियुक्तैः –

**श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः ।**

**मत्वा च सततं ध्येयः एते दर्शनहेतवः ॥**

इति । मनुष्योऽहं, कर्ताहं, भोक्ताहम् इत्येवंरूपा अपरोक्षभ्रान्तिः तत्त्वमसीति सकृदुपदेशश्रवणमात्रेण नापैति । अनिर्वचनीयाविद्याबन्धनस्य देहाद्यभिमानस्य तथा दृढतमत्वात् । कश्चित् पुरुषधौरेयः सकृदुपदेशश्रवणमात्रेण प्राप्नोति ब्रह्मानुभूतिं चेत् तं प्रति प्रत्ययावृत्तिर्मास्तु । साधारणानां मानवानां कृते प्रत्ययावृत्तिः अपरिहार्या । तादृशः पुरुषः सुतरां दुर्लभः ।

**"श्रवणायापि बहुभिर्यो न लभ्यः**
**शृण्वन्तोऽपि बहवो यं न विद्युः ।**
**आश्चर्यो वक्ता कुशलोऽस्य लब्धा"** इति काठकं वचः ।

व्रीहीन् अवहति इति तण्डुलसम्पादनाय व्रीहीणाम् अवहननं विहितम् । तत्र सकृद्वा त्रिवारं वा अवहननेन तण्डुलनिष्पत्तिर्न भवति । तद्दर्शनपर्यन्तम् अवहननं कुर्वन्ति । तथा च भाष्यकृतः बभाषिरे – "दर्शनपर्यवसानानि हि श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति यथा अवघातादीनि तण्डुलनिष्पत्तिपर्यवसानानि तद्वत्" इति । अपि च आधानकाले उलूकलसंस्काराय "सर्वौषधीः पूरयित्वा अवहन्ति" इत्यत्र तु सकृदनुष्ठानं सम्मतमेव । सकृदनुष्ठानेनैव संस्कारसम्भवात् । तत्र अदृष्टं फलम् । अत्र अहं ब्रह्मास्मीति अवगतिपर्यन्तं श्रवणादिकम् अपेक्षितम् । अत एव "आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया" इति प्राज्ञाः कथयन्ति ।

अपि च उपनिषत्सु 'वेद', 'उपासीत' इति बहुत्र श्रूयते । तत्र अन्तर्णीताकृतिगुणा क्रिया निदिध्यासनम्, उपासनं च विवक्ष्यते । लोकेऽपि गुरुमुपास्ते, राजानमुपास्ते इत्यादौ सततं यः सेवां करोति स एव विवक्ष्यते । तथा च असकृदनुष्ठानं विवक्षितम् । "ध्यायति प्रोषितनाथा पतिम्" या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सैव इमं प्रयोगमर्हति । अतः श्रवणादिप्रत्ययानाम् आवृत्तिः कार्या । छान्दोग्ये पिता पुत्रं श्वेतकेतुं वारं वारं ससन्देहं भूय एव भगवन् विज्ञापयतु इति

पृच्छन्तं नववारम् उपदिशति । अन्ते 'तद्धास्य विजज्ञौ' इति श्रुतिः उपदिशति । इन्द्रोऽपि चतुष्कृत्वा प्रजापतिसकाशं गत्वा पुनः पुनः पृष्ट्वा दहरविद्यां प्राप । एवं भृगुरपि पितरम् आरुणिम् "अधीहि भगवो ब्रह्मेति" पञ्चवारं सम्प्रार्थ्य पञ्चकोशोपलक्षितं सान्द्रानन्दावबोधात्मकं ब्रह्म प्राप । एवम् अनेकधा लिङ्गात् श्रवणादीनि असकृदनुष्ठेयानि । "सततं मामनुस्मर" इति वचनं भगवतः स्मृत्वा जगन्मातुः शारदाम्बायाः पदतले लेखनकुसुममर्पये ॥

**********

ISSN: 2249-538X 

# परामर्शाधिकरणम्

**डा. गणेश ईश्वर भट्टः**

इदं शारीरकमीमांसाशास्त्रे तृतीयाध्याये चतुर्थपादे द्वितीयमधिकरणम् । इदं त्रिसूत्रीघटितम्, **परामर्शं जैमिनिरचोदना चापवदति हि, अनुष्ठेयं बादरायणः साम्यश्रुतेः, विधिर्वा धारणवत्**[१] इति । एवमत्र पूर्वाधिकरणेन सङ्गतिः – पूर्वं पुरुषार्थाधिकरणे ज्ञानं स्वातन्त्र्येणैव अर्थात् कर्माङ्गत्वं विनैव पुरुषार्थसाधनम् इति संसाध्य सूत्रकारः अन्ते **ऊर्ध्वरेतस्सु च शब्दे हि**[२] इति सूत्रयमास । ऊर्ध्वरेतसाम् आश्रमे विद्यायाः श्रूयमाणत्वात्, तत्र च कर्माभावात् कर्माङ्गत्वं विनैव केवला विद्या मोक्षहेतुः इति तदर्थः । तत्र ऊर्ध्वरेतसाम् आश्रमाणां शास्त्रीयत्वोपपादनाय **त्रयो धर्मस्कन्धाः...**[३] इति श्रुतिः उदाहृता । तथैव **तपःश्रद्धे ये ह्युपवसन्त्यरण्ये**[४] **ये चेमेऽरण्ये श्रद्धा तप इत्युपासते**[५] इत्यादयोऽपि श्रुतयः उदाहृताः । ततः इयं **त्रयो धर्मस्कन्धाः** इति श्रुतिः न सन्न्यासाश्रमप्रतिपादनपरा इत्याक्षेप उत्थितः । तस्य समाधानाय इदमधिकरणम् आरब्धम् । तथा चात्र संशयः सन्न्यासः अनुष्ठेयः न वा इति ।

पूर्वपक्षस्तु – अनया श्रुत्या सन्न्यासः न विधीयते, श्रुतौ लिङादीनां विधायकप्रत्ययानाम् अश्रवणात् । तथा हि **त्रयो धर्मस्कन्धाः, यज्ञोऽध्ययनं दानमिति प्रथमः, तप एव द्वितीयः, ब्रह्मचार्याचार्यकुलवासी तृतीयः, अत्यन्तमात्मानमाचार्यकुले अवसादयन्** इति श्रूयते । अत्र स्कन्धशब्दः आश्रमपर इति अभ्युपेत्य उच्यते- अत्र **यज्ञोऽध्ययनं दानमिति प्रथमः** इति गार्हस्थ्यम्, **तप एव द्वितीयः** इति वानप्रस्थम्, **ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुले अवसादयन्** इति नैष्ठिकब्रह्मचर्यं चेति आश्रमस्य त्रैविध्यमुक्त्वा **सर्व एते पुण्यलोका भवन्ति** इति त्रयाणाम्

अनान्त्यन्तिकफलत्वमुक्त्वा अन्ते आत्यन्तिकफलतया ब्रह्मसंस्थता श्राव्यते **ब्रह्मसंस्थोऽमृतत्वमेति** इति । अनेन वाक्येन ब्रह्मज्ञानफलकः सन्यासः विधीयत इति सिद्धान्ती अभिमन्यते । किन्तु इदमयुक्तम् । यतः अत्र ब्रह्मसंस्थतास्तुत्यर्थं त्रयाणाम् आश्रमाणां परामर्शमात्रं कृतम्, न तु विधानम् । अतः **ब्रह्मसंस्थोऽमृतत्वमेति** इति परामर्श एवेति न पारिव्राज्यं विधीयते । स्कन्धश्रुतौ अनुवाद्यत्वाविशेषात् गार्हस्थ्यवत् पारिव्राज्यादिकमपि अनुष्ठेयम् इति शङ्का अत्र न कार्या । यतः गार्हस्थ्यस्य श्रौतत्वात् अनुष्ठेयम्, न इतरे, अश्रौतत्वात् । गार्हस्थ्यव्यतिरिक्ता आश्रमाः स्मृच्याराभ्यां प्रसिद्ध्यन्ति । तेषामियं श्रुतिस्तु मूलं भवितुं नार्हति, विध्यश्रवणात् । विधित्वं कल्पयितुमपि न शक्यते, प्रत्यक्षश्रुतिविरोधात् । आश्रमाणां स्मार्तत्वात् तेषां मूलतया श्रुतिकल्पनायां प्रसक्तायाम्, यावज्जीवश्रुतिविरोधात् अनग्निकाश्रमस्मृतयः उपेक्ष्याः । अथवा कर्मानधिकृतैः अन्धपङ्ग्वादभिः ते आश्रमा अनुष्ठेयाः । स्कन्धश्रुतिस्तु **ब्रह्मसंस्थोऽमृतत्वमेति** इत्युक्तायाः ब्रह्मसंस्थतायाः स्तुत्यर्थं प्रवृत्ता । अपि च तप एव द्वितीयः इति न वानप्रस्थं पारिव्राज्यं वा विधीयते, तद्वाचकशब्दाभावात् । तपोरूपधर्मेण तदनुमेयम् । किन्तु तपसः यथाकथञ्चित् गृहस्थाश्रमेऽपि सम्भवात् तावता न आश्रमान्तरं सिद्ध्यति ।

अपि च श्रुतिरेव आश्रमान्तरं निषेधति **वीरहा वा एष देवानां योऽग्निमुद्वासयते**[६] **आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः**[७] **नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः**[८] इत्यादिः । वस्तुतस्तु स्कन्धशब्दः न आश्रमपर्यायः, येन त्रयो धर्मस्कन्धाः इति श्रुतौ आश्रमाणां परामर्शः स्यात् । या च अन्या श्रुतिः उदाहृता **तपःश्रद्धे ये ह्युपवसन्त्यरण्ये, ये चेमेऽरण्ये श्रद्धा तप इत्युपासते** इत्यादिः, तत्र देवयानम् उपदिश्यते न आश्रमान्तरम् । **एतमेव प्रव्राजिनः लोकमिच्छन्तः प्रव्रजन्ति**[९] इति श्रुतिः पारिव्राज्यं विधत्त इति शङ्का स्यात् । किन्तु इयं श्रुतिः आत्मलोको महीयान् यदर्थम् अशक्यमपि पारिव्राज्यं कुर्वन्ति इति आत्मसंस्तुत्यर्थं प्रवर्तते । तथा च नास्ति पारिव्राज्ये कोऽपि विधिः ।

सिद्धान्तस्तु – **अनुष्ठेयं तु बादरायणः साम्यश्रुतेः**[१०] इति । पारिव्राज्यम् अनुष्ठेयम् इति बादरायण आचार्यो मन्यते, साम्यश्रुतेः । **त्रयो धर्मस्कन्धा** इत्यत्र यथा श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृश्यते, तथैव आश्रमान्तरमपि श्रुत्यन्तरविहितमेव परामृश्यते, परामृश्यत्वसाम्यात् । यथा **निवीतं मनुष्याणां प्राचीनावीतं पितृणाम् उपवीतं देवानाम् उपव्ययते देवलक्ष्ममेव त कुरुते**[११] इति वाक्ये दैवे कर्मणि उपवीतं विधीयते । तत्स्तुतये इतरत् द्वयम् अनूद्यते । दैवे कर्मणि निवीतमयोग्यम्, मनुष्याणां हि तत् । प्राचीनावीतमपि तथैव, तत्तु पितृकर्मणि । उपवीतमेव तत्र योग्यम् इति उपवीतस्य स्तुतिः । तत्र मानुषक्रियासु देहार्धवस्त्रबन्धनाख्यं निवीतं सौकर्यार्थतया प्राप्तम् । पित्र्ये कर्मणि प्राचीनावीतं विध्यन्तरेण प्राप्तम् । अतः उपवीतपरे वाक्ये निवीतप्राचीनावीतयोः परामर्शमात्रम् इति सिद्धान्तितम् । यथा अत्र प्रामाणान्तरप्राप्तयोरेव परामर्शः, तथैव प्रकृते गार्हस्थ्यस्येव आश्रमान्तराणामपि विध्यन्तरप्राप्तानामेव परामर्शः कृतः । एवमिदं साम्यश्रुतेः इत्यस्य व्याख्यानम् । विधेयेन सह समभिव्याहारात् पारिव्राज्यस्यापि विधेयत्वम्, तेन अनुष्ठेयत्वं च इति अपरः अर्थः । यथा, **वेदानुवचनेन ब्राह्मणा विविदिषन्ति**[१२] **एतमेव प्रव्राजिनः लोकमिच्छन्तः प्रव्रजन्ति** इति उभयमपि वाक्यमिदम् एकस्मिन्नेव अनवाके पठितम् । अतः वेदानुवचनादिभिः समभिव्याहारात् पारिव्राज्यस्यापि वेदानुवचनादीनामिव विधेयत्वं सिद्ध्यति । एवेमेव **ये चेमेऽरण्ये** इति यद्वाक्यं पूर्वमुदाहृतम्, तत्तु पञ्चाग्निविद्याप्रकरणे विद्यते । अतः यथा विधीयमानपञ्चाग्निविद्यया समभिव्याहारात् वानप्रस्थमपि विधीयते ।

यच्चोक्तं श्रुतौ आश्रमवाची शब्दः नास्तीति, तत्रोच्यते- स्कन्धशब्द एवाश्रमवाची । अथवा भवतु स्कन्धशब्दः समूहवाचकः । तदानीमपि स्कन्धत्रित्वप्रतिज्ञानात् यज्ञादीनां धर्माणां मिथो भिन्नानां आश्रमसम्बन्धं विना त्रित्वे अन्तर्भावः न सम्भवति । अतः श्रुतत्रित्वान्यथाऽनुपपत्त्या स्कन्धशब्दस्य आश्रमपरत्वं सिद्ध्यति । तथा सति एवमत्र आश्रमाः विज्ञायन्ते – यज्ञादिलिङ्गः

गृहस्थाश्रमः एकः स्कन्धः । ब्रह्मचारी इति स्पष्टनिर्देशात् सः द्वितीयः स्कन्धः । तप इत्यनेन तपःप्रधानः वानप्रस्थाश्रमः गृह्यते । ततः ब्रह्मसंस्थपदं सन्यासस्य ग्राहकम् । एतच्च पुनरग्रे स्फुटीकरिष्यते । एवं स्कन्धश्रुतौ आश्रमाणां परामर्श इति पक्षेऽपि गार्हस्थ्यादिरिव पारिव्राज्यम् अपि अनुष्ठेयम् इति सिद्ध्यति ।

ततः सूत्रकारः विधिपक्षं गृह्णाति **विधिर्वा धारणवत्**[१३] इति । श्रुत्यन्तरेण विधानम्, अत्र च परामर्श इति स्वीकारापेक्षया अत्रैव विधित्वं कल्प्यते लाघवात् । अनग्निकाश्रमस्य विधाने यावज्जीवश्रुतिविरोध इति चेत् सा तु श्रुतिः अविरक्तविषया, सन्यासश्रुतिः विरक्तविषया इति प्रागुक्तलाघवस्य न कोऽपि बाधः । तथापि धर्मस्कन्धश्रुतिः अल्पफलत्वेन इतराश्रमनिन्दापूर्वकं ब्रह्मसंस्थतायाः स्तुतिपरा इति एकवाक्यतायां प्रतीयमानायां कथं तां बाधित्वा विधिचतुष्टयम् अङ्गीक्रियत इति शङ्का स्यात् । तत्रोच्यते - आश्रमाणां विध्यन्तरेण अप्राप्तत्वात् अनया श्रुत्या परामर्शः कर्तुम् अशक्यः । सति सम्भवे विधिरेव स्वीकर्तव्यः, न तु स्तुतिः । अतः सतीमपि एकवाक्यताप्रतीतिं परित्यज्य विधिरेव आश्रीयते, धारणवत् । दृष्टान्तस्य अयमर्थः - महापितृयज्ञे स्रुचि प्रक्षिप्तं हविः आहवनीयं प्रति यदा आनीयते, तदा श्रूयते **अधस्तात् समिधं धारयन्ननुद्रवेत्**[१४] इति । अत्र स्रुग्दण्डस्य अधस्तात् समिधं धारयेत् इति अधोधारणं विधीयते । तस्य स्तवाकतया अग्रे श्रूयते **उपरि हि देवेभ्यो धारयति** इति । अत्र स्तावकत्वेन विधिना एकवाक्यताप्रतीतावपि दैवे होमे स्रुग्दण्डोपरि समिद्धारणं विध्यन्तरेण अप्राप्तम् इति स्तावकेऽपि अस्मिन् **उपरि हि देवेभ्यो धारयति** इति वाक्ये विधिरेव आश्रीयते । तथा च जैमिनीयं सूत्रं **विधिस्तु धारणेऽपूर्वत्वात्**[१५] इति । एवमेव इहापि स्कन्धश्रुतिः विधिरेव अप्राप्ताश्रमचतुष्टयविधायकत्वात् । एवं स्कन्धश्रुत्या चत्वारोऽपि आश्रमाः विधीयन्त इति पक्षः दर्शितः ।

अथवा भवतु वा इतरेषाम् आश्रमाणां परामर्शमात्रम्, तथापि पारिव्राज्यं तु विधीयते । स्तुतिसामार्थ्यात् । नह्यविधेयं क्वचित् स्तूयते । तद्यथा

**ब्रह्मसंस्थोऽमृतत्वमेति** इति श्रूयते । सा ब्रह्मसंस्थता किं यस्मिन् कस्मिंश्चिदाश्रमेऽपि सम्भवति उत परिव्राजकस्यैव इति विचारणीयम् । यदि ब्रह्मचार्यन्तेषु आश्रमेषु परामृश्यमानेषु परिव्राजकोऽपि परामृष्टः स्यात्, तर्हि चतुर्णाम् आश्रमाणां परामृष्टत्वाविशेषात् चतुर्णां मध्ये यः कश्चित् ब्रह्मसंस्थः भविष्यति । यदि ब्रह्मसंस्थताऽभिधानपर्यन्तं परिव्राजकः न परामृष्टः, तर्हि स एव परिशिष्यमाणः परिव्राजक इति सिद्ध्यति । एवं स्थितौ ब्रह्मसंस्थताऽभिधानपर्यन्तं परिव्राजकः न परमृष्टः इत्येव वक्तव्यम् । तथा हि अस्यां श्रुतौ गृहस्थब्रह्मचारिणोः तावत् ग्रहणं सुकरम्, तयोः तत्तदसाधारणधर्माणां निर्देशात् । तपसः कायक्लेशप्रधानत्वात् तत् वैखानसानां ग्राहकं भवति । तेनैव परिव्राजकस्यापि परामर्शः न सम्भवति । यतः इतरेषाम् आश्रमाणां स्वासाधारणधर्मैः गृहीतत्वात् परिव्राजकस्यापि तदीयासाधारणधर्मेणैव ग्रहणं युक्तम् । कस्तर्हि परिव्राजकस्य असाधारणः धर्मः इति चेत् इन्द्रियसंयामादिः न तु तपः । अतः एतावता अपरामृष्टत्वात् **ब्रह्मसंस्थोऽमृतत्वमेति** इति परिव्राजक एव परिशिष्टः गृह्यते । अपि च भेदव्यपदेशोऽत्र भवति त्रय एते पुण्यलोकभाजो भवन्ति एकः ब्रह्मसंस्थः अमृतत्वभाक् इति । यदि ब्रह्मसंस्थः इतरेभ्यः भिन्नः स्यात् तदा एव एष व्यपदेश उपपद्यते न अन्यथा । यथा देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, विष्णुमित्रस्तु महाप्रज्ञः इति खलु व्यपदिश्यते । देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, तयोरन्यः महाप्रज्ञ इति व्यपदेशस्तु न भवति । एवमेव प्रकृते, इतरे त्रय आश्रमिणः पुण्यलोका भवन्ति, ब्रह्मसंस्थः अमृतत्वमेति इत्युक्तौ अर्थात् परिव्राजकः एव उक्तो भवति ।

कथं ब्रह्मसंस्थशब्दः परिव्राजकमेव अभिधत्ते इति प्रश्नस्तु स्यादेव । न हि ब्रह्मसंस्थशब्दः परिव्राजके रूढः । तथा स्वीकारे सन्यासमात्रादेव अमृतत्वप्राप्तेः ज्ञानार्थक्यप्रसङ्गः । ब्रह्मणि सन्तिष्ठते इति योगस्तु सर्वेषु आश्रमेषु सम्भवति इति। तत्रोच्यते - अन्येषु आश्रमेषु यौगिकार्थः न सम्भवति । तथा हि ब्रह्मणि संस्था यस्य सः ब्रह्मसंस्थः । संस्थाशब्दस्य समाप्तिवाचित्वात् ब्रह्मणि संस्था नाम

तस्मिन् अनन्यव्यापारतारूपं ब्रह्मनिष्ठत्वम् । तच्च इतरेषाम् आश्रमिणां न सम्भवति, तेषां प्रत्यवायपरिहाराय अवर्जनीयतया स्वाश्रमविहितकर्मानुष्ठानस्य विद्यमानत्वात् । सन्यासिनस्तु सर्वकर्मणां सन्यस्तत्वादेव कर्माननुष्ठाननिमित्तः प्रत्यवायो नास्ति । यच्च ध्यानशमदमादिकं कर्म, तत्तु तेषां ब्रह्मसंस्थताया उपोद्बलकमेव न तु यागादिकर्मवत् ब्रह्मसंस्थतायाः प्रतिकूलम् । अतः ब्रह्मसंस्थत्वधर्मः सन्यासिष्वेव सम्भवति । अत एव अयं शब्दः पङ्कजादिशब्दवत् योगरूढः । स्मृतिरपि

**तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।**
**गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः**[१६] **॥**

इति ब्रह्मसंस्थस्य कर्माभावं दर्शयन्ती ब्रह्मज्ञानप्राप्तिम्, तेन ज्ञानेन अपुनरावृत्तिं च दर्शयति । एतेन सन्यासमात्रादेव अमृतत्वप्राप्तिप्रसङ्ग इत्येष दोषोऽपि परिहृतः, सन्यासस्यापि ज्ञानसाधनत्वद्वारा अमृतत्वहेतुत्वात् । अत एव श्रुतिः ज्ञानप्रधानं सन्यासं स्तौति **न्यास एवात्यरेचयत्**[१७] **न्यास इति ब्रह्मा**[१८] इति । **अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति**[१९] इति श्रुतिः सन्यासस्य ब्रह्मज्ञानफलतां दर्शयति । अतः स्कन्धश्रुत्या सन्यासः विधीयत इति सिद्धम् ।

एवमपि इदमिह ज्ञातव्यम्- सूत्रकारेण शिष्यबुद्धिवैशद्यार्थं सन्यासविधायकश्रुत्यन्तरं नास्तीति कृत्वाचिन्तया अयं स्कन्धश्रुतिमादाय विचारः प्रवर्तितः । वस्तुतस्तु विद्यत एव स्फुटं सन्यासविधायिनी जाबालश्रुतिः **ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत्**[२०] इति । इयं च श्रुतिः न अनधिकृतविषया, तथा सङ्कोचे मानाभावात् । किञ्च तस्यामेव श्रुतौ अनधिकृतानां पृथक् सन्यासविधानं श्रूयते **अथ पुनरेव व्रती वाऽव्रती वा स्नातको वाऽस्नातको वा उत्सन्नाग्निरनग्निको वा**[२१] इत्यादिना । तत्र व्रती गोदोहनादिव्रतवान् तद्भिन्नः अव्रती । स्नातकः गुरकुलान्निवृत्तः, तद्भिन्नः अस्नातकः । उत्सन्नाग्निः विधुरः । अनग्निकः अगृहीताग्निः । एवमेतेषां पृथक् सन्यासविधानात् **ब्रह्मचर्यादेव प्रव्रजेत्**[२२]

ISSN: 2249-538X

इति विधिः न कर्माशक्तान् उद्दिश्य प्रवृत्तः । अत एव **शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरि विश्रुवम्**[२३] इत्येवं प्रार्थना श्रूयते । **दृष्टिपूतं न्यसेत्पादम्**[२४] इति दृष्टिपूतसञ्चारादिकं विधीयते । मूकबधिरादीनां तु एवंविधसाधनानुष्ठानस्यैव असम्भवात् तानेव उद्दिश्य सन्यासविधिः प्रवृत्ता इति कथनम् अयुक्तम् ।

अपि च कौषीतकीब्राह्मणोपनिषदि एवमाख्यायिका श्रूयते – इन्द्रः प्रतर्दनाख्यं पुरुषम् एवमुवाच **त्रिशीर्षाणं त्वाष्ट्रमहनम् अरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छम् तस्य मे तत्र लोम च न मीयते**[२५] इत्येवम् । त्वाष्ट्रहननादीनि अतिक्रूराणि कर्म कुर्वतोऽपि मम लोमापि न हिंस्यते, ब्रह्मज्ञानं प्राप्तस्य मम ब्रह्मभूतत्वात् इति ब्रह्मज्ञानस्य माहात्म्यं तत्र सङ्कीर्तितम् । अत्र, अरुन्मुखान् इत्यस्य अयमर्थः – रौति यथार्थं शब्दयति इति रुत् वेदान्तवाक्यम्, तन्मुखे येषां ते रुन्मुखाः । तेभ्यः अन्ये अरुन्मुखाः वेदान्तेभ्यः बहिर्मुखा इत्यर्थः । तान् यतीन् इन्द्रः आरण्यकशुनकेभ्यः प्रायच्छत् इत्यर्थः । एतेन श्रुतिः यतीनां वेदान्तार्थविचार एव मुख्यं कर्म इति ज्ञापयति । तेन वेदान्तप्रतिपाद्यब्रह्मसंस्थत्वं सन्यासिनामेव सम्भवति इति ज्ञाप्यते । अत्र कश्चिदाक्षेपः स्यात् – गृहस्था अपि यथाशक्ति कर्मच्छिद्रेषु वेदान्तचन्तनं कर्तुं शक्नुवन्त्येव । कथं सन्यासिनामेव स वेदान्तविचार इति । उच्यते- यथाशक्ति साधनानुष्ठेन फलं न निष्पद्यते । न हि यथाशक्ति अवहननेन तुषविमोकः सम्पद्यते । श्रवणादिसाधनानां दृष्टफलत्वात् फलनिष्पत्तिपर्यन्तमपि साधनानि अनुष्ठेयानि । तथा चाह अन्यत्र सूत्रकारः **आवृत्तिरसकृदुपदेशात्**[२६] इति । अत एव केचित् **श्रोतव्य**[२७] इत्यत्र परिसङ्ख्याविधिम् आचक्षते । श्रवणादिसाधनेभ्यः अन्यत्र व्यापारान्तरे प्रवृत्तौ ज्ञानोत्पत्तिर्न स्यात् । श्रुत्यन्तरं च **तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः**[२८] इति । स्मृतिश्च

**आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया ।**

**दद्यान्नावसरं किञ्चित्कामादीनां मनागपि**[२९] **॥**इति ।

अत एव केचित् शमादिष्ट्कान्तर्भूतेन उपरतिशब्देन सन्यास उच्यते, तेन असन्यासिनां न वेदान्तश्रवणे अधिकार इति वदन्ति । तदेवं ज्ञानसाधनानां श्रवणादीनाम् अनुष्ठानार्थं शास्त्रीयः सन्यासः उपादेय इति शम् ।

## सङ्केतसूची:-


१. ब्रह्मसूत्रम् ३-४-१८,१९,२०
२. ब्रह्मसूत्रम् ३-४-१७
३. छान्दोग्योपनिषत् २-२३-१
४. छान्दोग्योपनिषत् ५-१०-१
५. मुण्डकोपनिषत् १-२-११
६. तैत्तिरीयसंहिता १-५-२
७. तैत्तिरीयोपनिषत् १-१२
८. ऐतरेयब्राह्मणम् ७-१३-२
९. बृहदारण्यकोपनिषत् ४-४-२
१०. ब्रह्मसूत्रम् ३-४-१९
११. तैत्तिरीयसंहिता २-५-११
१२. बृहदारण्यकोपनिषत् ४-४-२२
१३. ब्रह्मसूत्रम् ३-४-२०
१४. जैमिनिसूत्रभाष्यम् ३-४-६
१५. जैमिनिसूत्रम् ३-४-६
१६. भगवद्गीता ५-१७
१७. महानारायणोपनिषत् ७८
१८. महानारायणोपनिषत्-७८
१९. जाबालोपनिषत्-५
२०. जाबालोपनिषत्-४
२१. जाबालोपनिषत्-५
२२. जाबालोपनिषत्-४
२३. तैत्तिरीयोपनिषत् १-४
२४. मनुस्मृतिः ६-४६
२५. कौषीतकीब्राह्मणोपनिषत् ३-९-१२
२६. ब्रह्मसूत्रम् ४-१-१
२७. बृहदारण्यकोपनिषत् २-४-५
२८. मुण्डकोपनिषत् २-२-५
२९. यतिधर्मसङ्ग्रहः पृष्टम् १५९


**********

# ज्ञानकर्मणोः मोक्षसाधनत्वविचारः

**डा श्रीकरः जि. एन्**

'ब्रह्मविदाप्नोति परम्'(तै.उ.२-१) 'तरति शोकमात्मवित्'(छा.उ.७-१-३) 'नान्यः पन्था विद्यतेऽयनाये'त्यादिश्रुतिभ्यः ब्रह्मात्मैक्यज्ञानादेव ब्रह्मप्राप्तिः मोक्ष इति निश्चप्रचम् ।

अत्र ज्ञानकर्मसमुच्चयवादी शङ्कते – औपनिषदमात्मज्ञानं न स्वतन्त्रमेव मोक्षसाधनं किन्तु क्रतुप्रयोगापेक्षितकर्तृप्रतिपादकतया क्रत्वर्थं भवति । अतः ज्ञानकर्मणोः अङ्गाङ्गिभावेन समुच्चय इति । तद्यथा आमुष्मिकस्वर्गादिफलभोगभागी शरीराद्यतिरिक्तः नित्यः कर्ता भोक्ता इति आत्मनः स्वरूपम् । तस्य आत्मनः कर्तृत्वेन कर्मशेषत्वात् आत्मज्ञानं कर्माङ्गकर्तृद्वारा क्रत्वर्थमिति । अतः 'तरति शोकमात्मवित्' इत्याद्यात्मज्ञाने या फलश्रुतिः सा अर्थवादः । यथा 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं श्रुणोति'(तै.उ.३-५-७) इत्यादिषु पर्णमयीद्रव्ये या फलश्रुतिः सा न फलपरा पर्णमयीद्रव्यस्य फलवत्क्रत्वर्थत्वात् । तद्वदत्रापि फलश्रुतेः अर्थवादत्वात् । तथा च अनुमानम् – आत्मज्ञानं कर्माङ्गम् अफलत्वे सति कर्माङ्गाश्रयत्वात् पर्णमयीत्वादिवत् इति ।

किंच जनकप्रभृतीनां ब्रह्मविदां 'जनको ह बहुदक्षिणेन यज्ञेनेजे' 'यक्ष्यमाणो वै भगवन्तोऽहमस्मि'(छा.उ.५-११-५) इत्यादिवाक्येषु कर्मसम्बन्धः श्रूयते । 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायेन यदि केवलात् आत्मज्ञानात् मोक्षसिद्धिः स्यात् किमर्थं जनकादयः बह्वायासं कर्म कुर्युः । अतः ब्रह्मविदां कर्माचारदर्शनात् आत्मज्ञानस्य कर्माङ्गत्वम् ।

अपि च ‘यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति’(छा.उ.१-१-१०) इति श्रुत्या एव विद्यायाः कर्मशेषत्वश्रवणात् न केवलात् आत्मज्ञानात् पुरुषार्थसिद्धिः ।

बृहदारण्यकेऽपि ‘तं विद्याकर्मणी समन्वारभेते’(बृ.उ.४-४-२) इत्यत्र परलोकं गच्छन्तं जीवं विद्याकर्मणी अनुगच्छत इति फलारम्भे विद्याकर्मणोः साहित्यदर्शनात् न विद्यायाः स्वातन्त्र्यम् ।

ईशावाक्ये ‘कुर्वन्नेवेह कर्माणी जिजीविषेच्छतं समाः’(ई.उ.२) इति नियमश्रवणादपि आत्मज्ञानस्य कर्मशेषत्वमिति ।

अत्र आक्षेपाणां समाधानम् इत्थं क्रियते – आत्मनः कर्तृत्वेन कर्माङ्गकर्तृद्वारा आत्मज्ञानस्य कर्माङ्गत्वं यदुक्तं तत्रोच्यते – यदि देहाद्यतिरिक्तः कर्ता भोक्ता आत्मा इति एतस्मिन्नेवार्थे वेदान्ताः पर्यवसिताः स्युः तर्हि आत्मज्ञानस्य क्रत्वङ्गत्वं स्यात् । न त्वेतदस्ति । ‘यः सर्वज्ञः सर्ववित्’(मु.उ.१-१-९) इत्यादिवेदान्तेषु शारीरादधिकः कर्तृत्वभोक्तृत्वादिसंसारधर्मरहितः अपहतपाप्मत्वादिविशेषणः परमात्मा वेद्यत्वेन उपदिश्यते । यः कर्ता कर्माङ्गं नासौ वेदान्तवेद्यः यच्च वेदान्तवेद्यं ब्रह्म न तत् कर्माङ्गम् । अतः न आत्मज्ञानस्य कर्माङ्गत्वम् । नापि फलश्रुतेः अर्थवादत्वम् ।

यदुक्तं जनकादीनां कर्माचारदर्शनात् ज्ञानस्य क्रतुशेषत्वमिति तत्रोच्यते – आत्मज्ञानस्य अकर्मशेषत्वेऽपि ब्रह्मविदां आचारदर्शनं समानम् । श्रुतिर्यथा ‘एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति’(बृ.उ.३-५-१) इति । ‘एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार’ इति च ब्रह्मविदां याज्ञवल्क्यादीनाम् अकर्मनिष्ठत्वं दर्शयति ।

जनकादीनां तु कर्तृत्वाद्यभिमानाभावेन तैः क्रियमाणं कर्म फलानुत्पादकतया कर्माभासमात्रम् ।

विद्यायाः कर्मशेषत्वे या श्रुतिः उदाहृता 'यदेव विद्यया करोति' इति सा असार्वत्रिकी न विशेषविद्याविषया, 'ओमित्येतदक्षरमुद्गीथमुपासीत'(छा.उ.१-१-१) इत्यत्र उद्गीथविद्यायां प्रकृतत्वात् ।

'तं विद्याकर्मणो समन्वारभेते' इति फलारम्भे विद्याकर्मणोः साहित्यं यदुक्तं तत्र विभागः विवक्षितः । विद्या अन्यं पुरुषमन्वारभते कर्म अन्यमिति । अविभागेऽपि न दोषः । यतः इदं समन्वारम्भवचनं न मुमुक्षुविषयम् । 'इति नु कामयमानः' इति संसारिविषयत्वेन उपसंहारदर्शनात् ।

'कुर्वन्नेवेह कर्माणि जिजीविषेत्' इति नियमश्रवणात् ज्ञानस्य कर्माङ्गत्वमिति यदुक्तं तत्रोच्यते – 'न कर्म लिप्यते नरे'(ई.उ.२) इति श्रुतिः कर्मकुर्वतोऽपि विदुषः विद्यासामर्थ्यात् न संसारापत्तिः इति दर्शयति । अतः 'कुर्वन्नेवेह कर्माणि' इति नियमश्रवणं विद्यास्तुत्यर्थम् । अपि च 'एतद्ध स्म वै तत्पूर्वे विद्वांसः प्राजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः'(बृ.उ.४-४-२२) इति ज्ञानफलातिरिक्तफलानि अकामयमानानां कर्मत्यागं श्रवयति । यदि ज्ञानं कर्माङ्गं सदेव पुरुषार्थसाधनं स्यात् तर्हि ज्ञानिनां कर्मत्यागश्रुतिः विरुध्येत । किंच 'यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्'(बृ.उ.२-४-१४) इत्यादिना कर्माधिकारहेतुभूतस्य अविद्याकल्पितस्य क्रियाकारकफललक्षणस्य समस्तस्य जगतः ब्रह्मज्ञानेन उपमर्दश्रवणात् न केवलं कर्मसु अनुपयोगित्वात् ज्ञानस्य कर्मानङ्गत्वं कर्मनाशकत्वाच्च तस्मात् केवलस्यैव आत्मज्ञानस्य निःश्रेयसहेतुत्वमिति सिद्धम् ।

एवं मोक्षप्राप्तौ कर्माणामनपेक्षत्वे पुनः प्रत्यवतिष्ठते समुच्चयवादी - कथं ज्ञानादेव मोक्षप्राप्तिः यतः कर्मणामपि तत्प्राप्तिहेतुत्वं स्मर्यते यथा 'तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने' इति चेत् उच्यते – 'नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुत्या ब्रह्मज्ञानापेक्षया केवलकर्मरूपस्य ज्ञानकर्मसमुच्चयरूपस्य वा मोक्षोपायस्य प्रतिषेधात् साक्षात् कर्मणां मोक्षसाधनत्वासम्भवः । तथापि मोक्षप्राप्तौ परम्परया कर्मापेक्षत्वं सिद्धान्तसम्मतम्। विचारोऽयं शारीरकमीमांसायां तृतीयाध्यायस्य तुरीयपादे प्रपञ्चितः । तथा च सूत्रम् 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्'(ब्र.सू.४-१-२६) इति । विद्यायाः उत्पत्तौ तु कर्माणि अपेक्ष्यन्ते । तथा च श्रुतिः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'(बृ.उ.४-४-२२) इति । कर्मभिः संस्कृताः विशुद्धात्मानः उपनिषत्प्रकाशितमात्मानम् अप्रतिबन्धेन वेदितुं शक्नुवन्ति । तथाचोक्तमाथर्वणे – 'विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' । 'ज्ञानमुत्पद्यते पुंसां क्षायात् पापस्य कर्मणः' इति च स्मृतेः ।

एवं च ज्ञानस्य कर्मणा साक्षान्मोक्षहेतुत्वाभावे कुत्र तेषामुपयोग इति विचार्यमाणे सति भामतीकाराणां मते विविदिषायामेव कर्मणामुपयोगः । यज्ञादिश्रुतौ तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विविदिषन्ति, न तु विदन्तीति विविदिषायामेवान्वयः उक्तः । विविदिषन्ति इत्यत्र वेदनस्य वस्तुतः प्रधानस्यापि प्रकृतार्थतया शब्दतः गुणत्वम् । प्रकृतिप्रत्ययार्थयोर्मध्ये प्रत्ययार्थस्यैव प्राधान्यात् तत्रैव यज्ञादिकर्मणां साधनत्वेन अन्वयः । भाष्यकारैः – 'विविदिषासंयोगाच्चैषामुत्पत्तिसाधनभावोऽवसीयते' इति उक्तत्वात् कर्मणां विविदिषोत्पादनद्वारा ज्ञानोत्पत्तौ साधनत्वं प्रतीयते । तथा च नित्यकर्मानुष्ठानात् धर्मोत्पत्तिः ततः पापनिवृत्तिः । पाप्मा एव दुःखरूपे संसारे सुखरूपलक्षणेन मिथ्याज्ञानेन चित्तसत्त्वं मलिनयति । ततः पापनिवृत्तौ संसारस्य

दुःखरूपत्वमवबुध्यते। ततः संसारे विरक्तिः जायते । ततः तज्जिहासा भवति । ततः हानोपायं अन्विषति । आत्मज्ञानमस्य हानोपायं इत्युपश्रुत्य तज्जिज्ञासते । ततः श्रवणादिक्रमेण तज्जानाति । एवं तत्त्वज्ञानं प्रति कर्मणाम् आरादुपकारकत्वमिति भामतीकाराणामाशयः ।

विवरणकाराणां मते कर्मणां विद्यायां विनियोगः । यज्ञेन विविदिषन्तीति वाक्ये यज्ञादिकर्मणां वेदने एव अन्वयः । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्येऽपि वेदनस्य अर्थतः प्राधान्यमादाय तत्र अन्वयः विवक्षितः । यथा 'अश्वेन जिगमिषति' इति लौकिकप्रयोगे अश्वरूपसाधनस्य सन् प्रत्ययाभिहितेच्छाविषये गमने अन्वयः । 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इति वैदिकप्रयोगेऽपि तव्यार्थविधेः धात्वर्थे एव अन्वयः दृष्टः । एवमत्रापि यज्ञादीनां विद्यायां विनियोगः ।

इति शम् ।

**********

# भूमाधिकरणम्

श्री निरञ्जन भट्टः

सूत्रप्रस्थानस्य प्रथमाध्यायस्य तृतीयपादे द्वितीयमिदमधिकरणं भूमाधिकरणम् । छान्दोग्योपनिषदः सप्तमाध्याये इदमाम्नातम् – "भूमा त्वेव विजिज्ञासितव्यः" इत्यारभ्य "भूमानं भगवो विजिज्ञास[1]" इति प्रश्नस्य समाधानत्वेन "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्[2]" इति श्रूयते । अत्रैवं संशयः – भूमशब्देन प्राणो निर्दिष्टः उत परमात्मा इति । अत्र बहोर्भावः भूमा इति विग्रहे कृते तस्य 'पृथ्वादिभ्य इमनिज्वा[3]' इत्यनेन भावार्थे इमनिच्प्रत्यये कृते 'बहोर्लोपे भू च बहोः[4]' इति सूत्रेण बहोः परस्य इमनिचः आदेः इकारस्य लोपः, पुनश्च बहोः भूरादेशे सति निष्पन्नस्य भूमशब्दस्य व्युत्पत्तिबलात् बहुत्वमित्यर्थः अभिहितो भवति । बहुत्वं च किमात्मकमिति विशेषजिज्ञासायां प्रकरणेऽस्मिन् "प्राणो वा आशाया भूयान्[5]" इति सन्निहितो भवति प्राण एवेत्यतः प्राण एव भूमा इति प्राप्तम् । एवमेव "श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मवित्" इत्यारभ्य "सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु[6]" इति प्रकरणोपक्रमात् शोकतरणोपायत्वेन आत्मवित्त्वस्य निर्देशाच्च परमात्मैव भूमा इत्यपि प्रतिभाति । तस्मादत्र सन्निहितप्रकरणस्थः प्राणो वा भूमा, अथवा व्यवहितप्रकरणस्थः परमात्मा भूमेति

[1] छान्दोग्योपनिषत् – ७.१३.१

[2] छान्दोग्योपनिषत् – ७.२४.१

[3] पा.सू – ५.१.१२२

[4] पा.सू – ६.४.१५८

[5] छान्दोग्योपनिषत् – ७.१५.१

[6] छान्दोग्योपनिषत् – ७.१.३

संशयः । पूर्वस्मिन् “द्युभ्वाद्यायतनं स्वशब्दात्[1]” इत्यधिकरणे आत्मशब्दात् द्युभ्वाद्यायतनत्वं ब्रह्मणो निर्दिष्टम् । तदयुक्तम्, ‘तरति शोकमात्मवित्’ इति अब्रह्मण्यपि प्राणे आत्मशब्दप्रयोगो दृश्यते इति आक्षेपसङ्गत्या अस्याधिकरणस्य प्रवृत्तिः ।

तत्रायं पूर्वपक्षः प्राप्तः प्राण एव भूमा इति । प्राणस्य भूमत्वे हेतुरयं प्रदर्श्यते यथा – “अस्ति भगवो नाम्नो भूयः[2]” इति प्रश्नस्य प्रतिवचनं भवति “वाग्वाव नाम्नो भूयसी[3]” इति । ततः परम् “अस्ति भगवो वाचो भूयः[4]” इति पृष्टे प्रतिवचनं “मनो वाव वाचो भूयः[5]” इत्येवंप्रकारेण प्राणपर्यन्तमपि प्रश्नप्रतिवचनपरम्परा दृश्यते । किन्तु प्राणोक्तेरग्रे अस्ति प्राणाद् भूयः इति प्रश्नस्य वा, इदमेव प्राणाद् भूयः इति प्रतिवचनस्य वा अदर्शनात् प्राण एव भूमा इति । तथैव नाम्न आरभ्य आशापर्यन्तेभ्यः सर्वेभ्यः प्राण एव भूयानिति सविस्तरमुक्तम् “प्राणो वा आशाया भूयान्” इति । ततः परं यः प्राणोपासकः तस्य “अतिवाद्यसीति अतिवाद्यस्मीति ब्रूयान्नापह्नुवीत[6]” इति अतिवादित्वं विज्ञाप्यते । तदनन्तरं “एष तु वा अतिवदति यः सत्येनातिवदति[7]” इति सर्वात्मकप्राणोपासनस्यैव अनुवृत्तिं कृत्वा कृत्वा प्राणस्य त्यागम् अकृत्वैव सत्यवचनध्यानादिपरम्परापूर्वकं भूमानम् उपदिशति । अनेन भूमत्वोपदेशः प्राणस्यैव इति प्रतीयते ।

यदि प्राण एव भूमा स्यात् तर्हि ‘यत्र नान्यत् पश्यति नान्यच्छृणोति’ इति

---

[1]ब्रह्मसूत्रम् – १.३.१

[2] छान्दोग्योपनिषत् – ७.१.५

[3] छान्दोग्योपनिषत् – ७.२.१

[4] छान्दोग्योपनिषत् – ७.२.२

[5] छान्दोग्योपनिषत् – ७.३.१

[6] छान्दोग्योपनिषत् – ७.१५.४

[7] छान्दोग्योपनिषत् – ७.१६.१

भूम्नः यल्लक्षणमुक्तं तत्कथं प्राणे प्रतिपादयितुं शक्यते इति प्रश्नः स्यात् । तत्रोच्यते – सुषुप्त्यवस्थायां सर्वाण्यपि करणानि प्राणे एव समाविष्टानि भवन्तीत्यतः दर्शनश्रवणादिकरणव्यापारस्य निवृत्तत्वात् पूर्वोक्तं भूमलक्षणं प्राणे समुपपद्यत एवेत्यदोषः । तत्रेदं श्रुत्यन्तरमपि प्रमाणं भवति यथा – "न शृणोति न पश्यति" इति सुषुप्त्यवस्थायां सर्वेषां करणव्यापाराणां लयमुक्त्वा "प्राणाग्नय एव पुरे जाग्रति[1]" इति प्राणस्यैव सुषुप्तौ व्यापारसद्भावमुक्त्वा इयं चावस्था प्राणप्रधाना इति निरूप्यते । पुनश्च "यो वै भूमा तत्सुखम्[2]" इति भूम्नि यत्सुखमुक्तं तदपि सुषुप्त्यवस्थायाम् – "अत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिंश्छरीरे सुखं भवति" इति सुखश्रवणात् प्राणस्य सुखरूपत्वमविरुद्धं भवति । "यो वै भूमा तदमृतम्" इति अमृतत्वमपि प्राणस्य सिद्ध्यत्येव "प्राणो वा अमृतम्" इति श्रुतिवाक्यबलात् ।

प्राण एव यदि भूमा इति मन्यते तर्हि "तरति शोकमात्मवित्" इति आत्मविविदिषा प्रकरणारम्भस्य हेतुत्वेन नोच्येत इत्यपि शङ्का न कार्या । यतोऽत्र प्राण एव आत्मशब्देन विवक्षितः । तथा च अत्रैव प्रकरणे प्राणस्य सर्वात्मत्वं ज्ञाप्यते यथा – "प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः[3]" इति । "यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितम्[4]" समर्पितम्[4]" इति अरनाभिदृष्टान्तेन सर्वात्मत्वश्रुतेश्च प्राणस्य वैपुल्यात्मकं भूमरूपत्वं भूमरूपत्वं सिद्धमति पूर्वपक्षः ।

सिद्धान्तो निरूप्यते – भूमा सम्प्रसादादध्युपदेशात् इति । अत्र भूमा इति परमात्मन एव निर्देशः । अयमत्र हेतुर्भवति – सम्प्रसादादध्युपदेशात् इति ।

---

[1] प्रश्नोपनिषत् – ४.२.३

[2] छान्दोग्योपनिषत् – ७.२३.१

[3] छान्दोग्योपनिषत् – ७.१५.१

[4] छान्दोग्योपनिषत् – ७.१५.१

सम्यक्प्रसीदत्यस्मिन् इति निर्वचनसामर्थ्यात्, बृहदारण्यकचतुर्थाध्याये तावत् स्वप्नजागरितावस्थाभ्यां सह निर्देशात् सम्प्रसादशब्दस्य सुषुप्तमित्यर्थः प्राप्यते । तत्र च प्राणस्यैव सद्भावात् स एव सम्प्रसादपदवाची भवति । तस्मात् सम्प्रसादशब्दवाच्यप्राणादपि ऊर्ध्वं भूमा उपदिश्यते इत्यतः प्राणः भूमा भवितुं नार्हति, स्वस्यैव स्वस्मादूर्ध्वमुपदेशायुक्तत्वात् । पूर्वमपि नाम्नोऽधि नाम्न एव उपदेशो नास्ति, किन्तु नाम्नोऽपि भिन्नस्य वाचः उपदेशश्रवणात् । एवमेव प्राणपर्यन्तमपि अर्थान्तरस्यैव कस्यचित् भूयस्त्वमुपदिष्टम् उपलभ्यते । तस्मात् प्राणादपि ऊर्ध्वं यः भूमा उपदिश्यते सः तस्मात् भिन्न एव भवितुमर्हति इति ।

अत्र पूर्वपक्षी पुनराक्षिप्येत – प्राणादूर्ध्वं प्रश्नस्य वा प्रतिवचनस्य वा अभावात्, प्राणविषयकमेव अतिवादित्वम् 'एष तु वा अतिवदति यः सत्येनातिवदति' इत्यत्रापि अनुकृष्यमाणत्वात् प्राणादूर्ध्वं भूमोदेशः अर्थान्तरभूतो न भवति इति । तत्प्रत्युच्यते - 'यः सत्येनातिवदति' इति विशेषवादश्रवणात्, सत्येनातिवादित्ववत एव 'एषः' इति निर्दिष्टत्वात् प्राणविषयकस्य अतिवादित्वस्यैव अत्र अनुकर्षणमिति वक्तुं न शक्यते इति ।

पुनः प्रश्नो भवितुमर्हति – इदमपि सत्यवचनेन अतिवादित्वं प्राणविषयकमेव भवितुमर्हति । यथा एषः अग्निहोत्री यः सत्यं वदति इत्यत्र सः सत्यं वदतीत्यतः अग्निहोत्री न भवति । किन्तु अग्निहोत्रानुष्ठानमस्ति इत्यनेन अग्निहोत्री भवति । तद्वदेव 'एष तु वा अतिवदति यः सत्येनातिवदति' इत्यत्र प्राणविज्ञानवशात् अतिवादित्वं तस्य न तु सत्यवचनेन । यथा सत्यवदनम् अग्निहोत्रिणः विशेषगुणः इति उच्यते, तथा अत्रापि सत्यवदनं प्राणोपासकस्य विशेषः स्यात् इति । तन्निराक्रियते – यदि तथोच्यते तर्हि श्रुत्युक्तं सत्यवदनेन अतिवादित्वं परित्यक्तं स्यात् । "यः सत्येनातिवदति सोऽतिवदति" इति श्रुतिः सत्यवदनेनैव अतिवादित्वं वदति न तु प्राणविज्ञानेन । प्रकरणवशात् अत्र

प्राणविज्ञानस्य सम्बन्धः स्यात् । किन्तु प्रकृतस्य प्राणविज्ञानस्य व्यावर्तनार्थमेव तुशब्दः श्रूयते – 'एष तु वा अतिवदति' इति । पुनः "सत्यं त्वेव विजिज्ञासितव्यम्[1]" इति प्रयत्नान्तरविधानं प्राणादर्थान्तरमेव सूचयति । तत्र यथा एकवेदाध्यायिनः प्रशंसासन्दर्भे एष तु महाब्राह्मणः यश्चतुरो वेदानधीते इति एकवेदाध्यायिनो भिन्न एव चतुर्वेदाध्यायिनः प्रशंसा भवति । तद्वदत्रापि सत्यं प्रकृतप्राणादपि भिन्नमेव ज्ञातव्यमिति प्राणप्रकरणविच्छेदः दृष्टान्तमुखेन प्रदर्श्यते ।

प्राणादधि प्रश्नप्रतिवचनादर्शनात् प्राणस्यैव भूमत्वमिति यदुक्तं तदयुक्तम् । प्रकृतस्य सम्बन्धासम्भवे एव अर्थान्तरविवक्षा भवितुमर्हति न तु प्रश्नप्रतिवचनरूपेणैव । अत एव प्राणपर्यन्तं भूयस्त्वोपदेशं श्रुत्वा तूष्णीम्भूतं नारदं प्रति सनत्कुमारः स्वयमेव प्राणोपसकस्य यदतिवादित्वमस्ति तत्तु विकारानृतविषयत्वात् अनतिवादित्वमेव । किन्तु "एष तु वा अतिवदति यः सत्येनातिवदति" इति व्युत्पादयति । अत्र श्रुत्युक्तसत्यशब्देन परं ब्रह्म विवक्षितम् । परमार्थरूपेण तस्यैव सत्यत्वावधारणात्, "सत्यं ज्ञानमन्तं ब्रह्म[2]" इति श्रुत्यन्तरे तस्य निर्देशाच्च । तथा व्युत्पादिते सति नारदः "सोऽहं भगवः सत्येनातिवदानि" इति प्राणादूर्ध्वं ज्ञातुं प्रवत्तो भवति । ततः परं सनत्कुमारः नारदं प्रति विज्ञानादिसाधनपरम्परोपदेशमुखेन भूमानम् उपदिशति । तत्र च सनत्कुमारवाक्ये प्राणादपि ऊर्ध्वं या सत्यवदनस्य प्रतिज्ञा कृता, तदेव अत्र भूमा इति ज्ञातव्यम् । तस्मात् प्राणादूर्ध्वं भूमोपदेशस्य सद्भावात् प्राणादतिरिक्तः परमात्मैव भूमा भवितुमर्हति । यस्मात् परमात्मैव भूमा तस्मादेव 'तरति शोकमात्मवित्' इति शोकनिवृत्तिरूपया आत्मविविदिषया अस्य प्रकरणस्योपक्रमः समुपपन्नो भवति । प्राणस्य च मुख्यया वृत्त्या आत्मत्वासम्भवात् प्राण एव आत्मा इत्यपि अयुक्तमेव ।

---

[1] छान्दोग्योपनिषत् – ७.१६

[2] तैत्तिरियोपनिषत् – २.१

तस्मात् "नान्यः पन्था विद्यतेऽयनाय[1]" इति श्रुतेः परमात्मज्ञानं विना शोकनिवृत्तिः न सम्भवति । अपि च "तं मा भगवान् शोकस्य पारं तारयतु[2]" इति प्रकरणस्योत्थानं कृत्वा "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः[3]" इत्युपसंहाराच्च शोकमूलाविद्योच्छेदेनैव तरणसम्भवात् तन्निवर्तकज्ञानगम्यत्वं तु परमात्मन एवेति तस्यैवेदं प्रकरणमिति ज्ञायते । प्राणपर्यन्तमेव यदि उपदेशः स्यात् तर्हि "आत्मतः प्राणः[4]" इति प्राणस्य आत्माधीनत्वं नोच्येत ।

अत्रेदमुच्येत – प्रकरणान्ते परमात्मोपदेशः भवति चेदपि प्रकरणमिदं तु प्राणप्राधानमेव । तस्मात् स एव भूमा इति । तत्रोच्यते – "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि[5]" इत्यनेन भूम्नः स्वविभूतिप्रतिष्ठितत्वप्रदर्शनमुखेन प्रकरणसमाप्तिपर्यन्तमपि शोकतरणोपायभूतात्मविज्ञानोपक्रान्तस्य भूम्न एव अनुकर्षणं दृश्यते । तस्मात् प्राधानभूतस्य भूमशब्दवाच्यपरमात्मनः प्रकरणेऽस्मिन् अवान्तरप्रकरणं भवति प्राणस्य इति ज्ञातव्यम् । परमात्मनस्तु सर्वस्यापि कारणत्वात् वैपुल्यात्मकभूमरूपत्वं सर्वथा उपपद्यते इति ।

पुनश्च भूमा ब्रह्मैव भवितुमर्हति इत्यत्र लिङ्गान्तरमुच्यते – धर्मोपपत्तेश्च इति । 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति दर्शनादिसर्वप्रमाणव्यवहारप्रतिषेधरूपो यः धर्मः भूम्नो निर्दिष्टः सः परमात्मन्येव अन्वयं प्राप्नोति "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्[6]" इति

---

[1] श्वेताश्वतरोपनिषत् – ६.१५

[2] छान्दोग्योपनिषत् – ७.१.३

[3] छान्दोग्योपनिषत् – ७.२६.२

[4] छान्दोग्योपनिषत् – ७.२६.१

[5] छान्दोग्योपनिषत् – ७.२४.१

[6] बृहदारण्यकोपनिषत् – ४.५.१५

श्रुत्यन्तरनिर्देशाच्च । यद्यप्ययं दर्शनादिव्यावहाराभावः सुषुप्तिप्रकरणे निर्दिष्टः, तथापि अयं निर्देशो न प्राणस्वभावप्रतिपादनार्थः । किन्तु आत्मनः बुद्ध्याद्युपाधिसम्बन्धाभावे द्रष्टृत्वादिकं न भवतीति तस्य असङ्गत्वप्रदर्शनार्थमेव कृतः परमात्मप्रकरणत्वात् । तथा च सुषुप्तौ यत्सुखरूपत्वं निरूपितं तत्सुखरूपत्वं न प्राणस्य किन्तु आत्मन एव । तत्रैव बृहदारण्यके सुषुप्तिप्रकरणे – "एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति[1]" इति आत्मन एव निर्देशात् । अत्र भूमप्रकरणेऽपि "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्" इति नाशादिदोषयुक्तस्य आत्मव्यतिरिक्तसुखस्य निरासपूर्वकं निरतिशयसुखस्वरूपब्रह्मैव भूमा इति दर्शितं भवति । प्राणस्य अमृतत्वं यदुक्तं तत्र प्राणस्य विकारत्वात् आपेक्षिकमेव अमृतत्वं तस्य भवितुमर्हति "अतोऽन्यदार्तम्[2]" इति बृहदारण्यकश्रुतिनिर्देशात् । "यो वै भूमा तदमृतम्" इति यदमृतत्वं भूम्नः श्रूयते तच्च परमकारणस्य परमात्मन एव भवितुमर्हति आत्यन्तिकामृतत्वस्य तस्मिन्नेव सम्भवात् । तस्मात् ये भूम्नो धर्माः श्रूयन्ते सत्यत्वस्वमहिमप्रतिष्ठितत्वसर्वगतत्वसर्वात्मत्वादयः ते च परमात्मानं विहाय अन्यत्र न सम्भवन्तीत्यतः परमात्मैव भूमा इति सिद्ध्यति ।

**********

[1] बृहदारण्यकोपनिषत् – ४.३.३२

[2] बृहदारण्यकोपनिषत् – ३.४.२

# कृद्वृत्तिविमर्शः

**प्रो. किशोरचन्द्रपाढी**

स्नातकोत्तरपरिषदध्यक्षचरः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः

पुरी

## १. विभिन्नेष्वर्थेषु वृत्तिशब्दस्य

व्यवहारः – वृतु वर्तने धातोः स्त्रियां क्तिन् सूत्रेण क्तिन्प्रत्यये वृत्तिशब्दः निष्पद्यते ।

क. जीविकार्थे वृत्तिशब्दः प्रयुक्तः – मनुस्मृतौ

**एषोदिता ग्रहस्थस्य वृत्तिः विप्रस्य शाश्वती ।**

ख. जानपदसूत्रे वृत्तिशब्दः जीविकावाचकः

ग. आचारार्थे वृत्तिशब्दः व्यवहृतः अभिज्ञानशाकुन्तले ।

**कुरु प्रियसखीवृत्तिं सपत्नीजने ।**

घ. चित्तस्यावस्थाविशेषार्थे योगसूत्रे वृत्तिशब्दः प्रयुक्तः

**योगः चित्तवृत्तिनिरोधः ।**

ङ. शास्त्रप्रवृत्त्यर्थे भाष्ये

**वृत्तिसमवायार्थः वर्णानामुपदेशः**

## २. वृत्तिस्वरूपम्

क. अन्तः करणपरिणामविशेषः वृत्तिः - वेदान्तिनः ।

ख. चित्तस्यावस्थाविशेषः वृत्तिः – योगदर्शनम् ।

ग. इन्द्रियसहितान्तः करणस्य परिणाम (व्यापार) विशेषः वृत्तिः – सांख्याः ।

घ. शब्दार्थसम्बन्धवाचकः वृत्तिशब्दः । शब्दस्य अर्थेन सह कश्चन विलक्षणः

ISSN: 2249-538X 

सम्बन्धो वर्तते। तत्शब्देन तस्यार्थस्य भानं भवति । घटशब्दस्य उच्चारणे कम्बुग्रीवादिमतः बोधो जयते। स च सम्बन्धः वृत्तिपदेन व्यवह्रियते ।

ङ. पदपदार्थयोः विजातीयसम्बन्धविशेषः वृत्तिः ।

च. परार्थाभिधानं वृत्तिः इति भाष्ये उक्तम् ।

इयं वृत्तिः द्विधा विवेचिता । तत्र अभिधादिवृत्तिचतुष्टयं यथायथं सर्वेषु शास्त्रेषु चर्चितम्।

येनोच्चारितेन - तत्र पदपदार्थयोः विजातीयसम्बन्धविशेषः वृत्तिः । समासादिकं वृत्तिपञ्चकं व्याकरणशास्त्रे चर्चितम् । तत्र परार्थाभिधानं वृत्तिः । अभिधीयते अनेन इति अभिधानम् । परस्यार्थस्य अभिधानं परार्थाभिधानम् ।

**कैयट** : अस्याशयमेव व्याख्याति यत् – परस्य शब्दस्य योऽर्थः तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिः ।

**त्तत्वबोधिनीका**रस्य मते – प्रत्ययान्तर्भावेन परपदार्थान्तर्भावेन वा यो विशिष्टोऽर्थः स परार्थः । स चाभिधीयते येन तत्परार्थाभिधानम् ।

**वासुदेवदीक्षितः –** विग्रहवाक्यावयवपदार्थेभ्यः योऽयं विशिष्टैकार्थः तत्प्रतिपादिका वृत्तिः ।

**हेलाराजः –**परस्य अन्यस्य प्रधानस्य यः अर्थः तस्य उपसर्जनपदेन प्रत्यायनम् । अर्थात् सा नाम वृत्तिः , यत्र उपसर्जनापदं विशेष्यस्यापि अर्थम् अभिधत्ते । यथा राजपुरुषः । राजन् इति उपसर्जनशब्दः पुरुषार्थं वक्ति ।

**रघुनार्थशर्मा –** परस्य वृत्यपेक्षया अन्यस्य योऽर्थो विशेष्यविशेषणभावः तस्य अभिधानम् । अर्थात् अभिधानम् । अर्थात् यत्र वृत्यपेक्षया अन्यस्य नाम वाक्यस्य यो विशेष्यविशेषणभावरूपः अर्थः अभिधीयते सा वृत्तिः ।

३. **वृत्तिशब्दस्य व्युत्पत्तिः –**

वृत्यते परार्थः अभिधीयते अस्यां सा वृत्तिः – व्युत्पत्तिः

क. भावे क्तिन् प्रत्यये सति वृत्तिशब्दः पदपदार्थसम्बन्धवाचकः ।

ख. अधिकरणे क्तिन् प्रत्यये – कृत्तद्धितसमासैकशेषसनाद्द्यन्तधातुरूपाणां वाचकः ।

घ. करणे क्तिन् प्रत्यये जीविकायाः वाचकः ।

४. **एकार्थीभावस्य वृत्तित्वेन व्यवहारः ।**

अनेकार्थस्य इदानीम् एकार्थत्वम् – च्विप्रत्ययः , पृथगर्थानाम् एकार्थीभावः समर्थः इति भाष्यम् । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः । एषा संज्ञा पाणिनिपूर्वाचार्यैः स्वीकृता । . पञ्चानां वृत्तिः इति पूर्वाचार्याणां संज्ञा इहाप्याश्रीयते तत्त्वबोधिनीकारः वदति ।

अत्र एकार्थीभावात्मिका वृत्तिः कुम्भकारः , पाचकः पाठक इत्यादौ कृदन्ते , बहुपटुः , औपगव इत्यादौ तद्धितान्ते , अधिहरि , राजपुरुषः , पीताम्बर इत्यादौ समासे , रामा इत्यादौ एकशेषे , पिपठिषति , पुत्रीयतीत्यादौ सनाद्यन्तधातुरूपस्थले वर्तते ।

एकर्थीभावात्मिका विशिष्टा शक्तिः अवश्यं स्वीकरणीया । अन्यथा- सुन्दरं कुम्भं करोति विग्रहे कर्मण्यण् इति सूत्रेण अण्प्रत्ययः प्रसज्येत । एवंच परमं पठितुम् इच्छति विग्रहे सन्प्रत्ययस्य प्राप्तिर्भवेत् । सुन्दरं पुत्रमात्मन इच्छति इत्यर्थे क्यच् स्यात् ।

५. **कृत्तद्धितादीनां वृत्तित्वसाधनम् –**

समासतद्धितयोः पदोद्देश्यका वृत्तिः सिद्धा- सुप्सुपा इत्यनुवृत्तौ समासविधानात्, सुबन्तात् तद्धितोत्पत्तिः इति सिद्धान्ताच्च । क्यजादीनां

पदविधित्वात् वृत्तित्वमस्ति। सनः पदविधित्वात् वृत्तित्वमस्ति ।

प्राचीनानां मते एकशेषस्य वृत्तित्वमस्ति । नवीनास्तु एकशेषस्य वुत्तित्वं नेच्छन्ति । द्वन्द्वस्यापवादतया सरूपाणामिति एकशेषः समासापेक्षया वृत्त्यन्तरत्वेन कथितः पाणिनिना एकशेषे वृत्तित्वव्यवहारस्तु वृत्त्यपवादत्वमात्रेण गौ्णः पृथगर्थानामेकार्थीभावनरूपैकार्थीभावनस्याभावादिति नागेशः प्रतिपादयति ।

वस्तुतः एकशेषविधावपि द्वन्द्व इत्यनुवृत्तेः द्वन्द्वविषये तद्विधानाद् एकार्थीभावः अस्त्ये, अत्र पदत्वसम्पादिका वृत्तिरस्ति । समाससरूपा या वृत्तिरस्ति , तस्यामेव एकशेषस्य समावेशो भवति । यतोऽहि **अनवकाश एकशेषो द्वन्द्वं वाधिष्यते** इति भाष्ये प्रोक्तम् ।

यदि एकशेषः बाधकः द्वन्द्वश्च बाध्यः तर्हि उत्सर्गापवादयोः समानाधिकरणम् (समानविषयता) भवितुमर्हति । यदि द्वन्द्वसमासस्य वृत्तित्वं तर्हि एकशेषस्यापि वृत्तित्वमस्ति।

एकशेषे नास्ति किमपि विग्रहवाक्यम् , कथं तस्य वृत्तित्वमितिप्रश्नः उदेति । वस्तुतः वर्णनं वृत्तिः इति वृत्तिपदस्य व्युत्पत्तिः । तेन विलुप्तानाम् सरुपाणां निरुपाणां वा प्रातिपदिकानाम् अर्थे, अवशिष्टस्य प्रातिपदिकस्य प्रवर्तनं यत्र भवति स एकशेषोऽपि वृत्तिः ।

एकशेषरूपा वृत्तिस्तु पदत्वसम्पादिका ।

६. **भर्तृहरिमते वृत्तिस्वरूपम्**

**विशेषणाद् विशेष्येऽर्थे तद्भावाभ्यच्चये सति** ।
**पुनश्च प्रतिसंहारे वृत्तिमेके प्रचक्षते ।**

यत्र विशेष्यविशेषणभावस्य निवृत्तिः(प्रतिसंहारः) जायते, तत्र

एकार्थीभावशक्त्या विशिष्टार्थप्रतीतिर्भवति । नागृहीतविशेषणा बुद्धिः विशेष्ये उपजायते इति न्यायस्य बाधो भवति । अत्र उक्तम् विशेषणाद् विशेष्यार्थे ।

तत्र प्रथमं विशेषणम् अवच्छेदकतया गृह्यते , ततः विशेष्येऽर्थे विशेषणभावस्य समुच्चयो भवति । ततः विशेषणस्य निवृत्तौ विशिष्टार्थप्रतीतिर्भवति।

७. **कृद्वृत्तिः**

कुम्भकार इत्यादि कृदन्ते केषाञ्चित् **कर्मण्यण्** इति उपपदनिमित्तकानां पदोद्देश्यकविधित्वादेकार्थीभावः प्रसज्यते ।अतः वृत्तित्वं सिद्धम् । महान्तं कुम्भं करोत्यर्थे महत् कुम्भकारः इति प्रयोगाभान् तत्रैकार्थीभावः स्वीकर्तव्यः।

परन्तु पाचकः,पाठकः, पठितः इत्यादौ कर्तृकर्मविहितकृदन्ते पदविधित्वं नास्ति । वस्तुतः अत्र पदविधिकुम्भकारादिकृदन्तपदसाहचर्यात् तत्रापि एकार्थीभावः स्वीकरणीयः । पाचकादिशब्दानां क्रियाप्रवृत्तिनिमित्तकस्य भाष्ये व्यवहारात् पदविधित्वमस्त्येवेति नागेशेन समाहितम् ।

कृत्प्रत्ययाः समर्थादेव उत्पद्यन्ते इति भाष्यकारोऽपि स्वीकरोति । लोकसिद्धस्य एकार्थीभावस्य प्रकृतिभागे कल्पना क्रियते। तादृशसमर्थात् परिभाषया समर्थपदमुपतिष्ठते । तस्योद्दिष्टेन धातुना सम्बन्धात् भाविप्रत्ययार्थान्तर्भावेन धातुभागे एकार्थीभावः कल्पनीयः । समर्थसूत्रभाष्यादपि विशिष्टे सामर्थ्यं गम्यते । उत्पन्ने हि प्रत्यये स एव तावत् समर्थादुत्पाद्यः । अत्र प्रथमतः प्रकृतौ एव तत्कल्पनीयः।

ण्वुल्तृचौ इत्यादिषु धातुः समर्थो भवति । तस्मात् ण्वुल्तृचौ समर्थौ भवतः। भाविप्रत्ययान्तर्भावेन धातोरेव तदर्थः कल्पनीयः । पठ्धातुः पाठकर्तरि शक्तः इत्यर्थं

कल्पयित्वा ततो ण्वुल्प्रत्ययो विधीयते । प्रत्ययस्योत्पत्त्यनन्तरं प्राकृतौ कल्पितः एकार्थीभावः विशिष्टे विश्राम्यति ।

लिट्, धुक्, वृत्रहा इत्यादिषु अलौकिकविग्रहवाक्ये कल्पितः एकार्थीभावः लुप्तप्रत्ययान्ते आरोप्यते ।

८. **कृत्यसंज्ञा**

तयोरेवकृत्यर्थखलर्थाः इति सूत्रेण कृत्यप्रत्ययाः भावकर्मणोः विहिताः । परन्तु केचन कर्त्रर्थेऽपि विहिताः । यथा – **वसेस्तव्यत् कर्त्तरि णिच्च** इति वार्त्तिकेन कर्तर्यर्थे णिच्प्रत्ययो विधीयते । यथा – वसतीति वास्तव्यः ।

**भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा** इति सूत्रेण कर्तरि यत्प्रत्ययो विहितः । यथा- भू यत् । भवतीति भव्यः ।

अर्यः स्वामिवैश्ययोः ३.१.१०६ इति सूत्रेण कर्तरि अर्थे यत्प्रत्ययो भवति । अर्यः स्वामी , वैश्यो वा । अन्यस्मिन्नर्थे आर्यो ब्राह्मणः ।

९. **निष्ठासंज्ञा**

क्त, क्तवत् इत्यनयोः द्वयोः प्रत्यययोः महती श्रद्धा आसीत् । क्तप्रत्ययः भावे, कर्मणि चार्थे विधीयते । अधिकरणे चार्थे विधीयते । कर्तरि यथा- आदिकर्मणि क्तः कर्तरि च ३.४.७१। प्रकृतः कंट देवदत्तः । कटनिर्माणकार्यं प्रारब्धवान् इत्यर्थः । गत्यर्थकर्मक- श्लिष-शीङ्-स्थास-वस्-जन-रूह-जीर्यतिभ्यश्च इति सूतेण कर्तरि, भावे,कर्माणि च क्तप्रत्ययो विधीयते । यथा-देवदत्तःग्रामं गतः । देवदत्तेन गतम् । देवदत्तेन ग्रामो गतः ।

अधिकरणेऽर्थे यथा- **क्तोऽधिकरणे च ध्रैव्य-गति-प्रत्यवसानार्थेभ्यः** ३.४.७६ इति सूत्रेण। अधिकरणार्थे यथा क्तप्रत्ययो भवति ध्रौव्यार्थ अकर्मकः ।

इदमेषामासितम् ।

**तौ सत्** इति सूत्रेण शतृशानचौ सत्संज्ञकौ भवतः । **लटः शतृशानचावप्रथमासमानाधिकरणे** ३.२.१२४ इति सूत्रेण लटः शतृशानचौ भवतः । यथा-पचन्तं देवदत्तं पश्य । पचमानं देवदत्तं पश्य ।

१०. **सर्वलोपकृत्प्रत्ययाः**

**क्विन्प्रत्ययः-** स्पृशोऽनुदके क्विन् । उदा- घृतं स्पृशतीति घृतस्पृक् ।

**क्विप्प्रत्ययः-** सत्सु-द्विष्-दृह-युज-विद-भिद-छिद-जि-नी-राजामुपसर्गेऽपि क्विप्- अण्डं सूते इतीति अण्डसूः ।

**ण्विप्रत्ययः- भजोण्विः-** अर्धं भजते इति अर्धभाक्

**बिट्प्रत्ययः- जन-सन-खन-क्रम-गमो विट् –** गोजा,गोषा,विसखा

**विच्प्रत्ययः-**

**एतेषां प्रत्ययानां सर्वेऽवयवाः लुप्ताः भवन्ति ।**

११. **लादेशकृत्प्रत्ययाः**

**१. कानच् – लिटः कानज्वा –** सोमं सुषुवाणः, अग्निं चिक्यानः

**२. क्वसु – क्वसुश्च –** सोमं पपिवान्, लोकेऽपि सद्-वस्-श्रु इतिधातुभ्यः लिटः स्थाने भाषायां सदवसश्रुवः इति सूत्रेण क्वस्वादेशो भवति । यथा- निषेदुषी स्थण्डिल एव केवले ।

**३.** शतृ – लटः शतृशानचौ – गच्छन्, पिवन्

**४.** शानच् – पचमानम्, वर्धमानम् ,

केचन कृत्प्रत्ययाः लादेशाः इव दृश्यन्ते किन्तु न लादेशाः । यथा- पूङ्यजोः शानन्- पवमानः, यजमानः

१२. **लिङ्गबोधककृत्प्रत्ययाः**

गत्यर्थाकर्मकसूत्रेण विहितः कर्तरि क्तप्रत्ययः । अत्र विशेष्यानुसारं लिङ्गस्य प्रयोगो भवति । यथा – रामः गतः,सीता गता, वाहनं गतम् ।

**पुंसि-**

**पुंसि संज्ञायां घः प्रायेण** इति सूत्रेण करणे अधिकरणे पुंसि घप्रत्ययः । गावः चरन्ति अस्मिन् गोचरः । दन्ताः छाद्यन्ते अनेन दन्तच्छदः ।

**स्त्रियाम् – स्त्रियां क्तिन्** इति सूत्रेण क्तिन् प्रत्ययो भवति । कृतिः, गतिः ।

**नपुंसके –**

**नपुंसके भावे क्तः, ल्युट् चेति** सूत्रद्वयेन क्तप्रत्ययः, ल्युट्प्रत्ययश्च नपुंसके भवति । यथा – हसितम्, हसनम् ।

१३. **उपसंहारः**

अष्टाध्याय्यां ४१२ सूत्रैः ७८ वार्तिकैः १४१ कृत्प्रत्ययाः पठिताः । तत्र ४६ निपातसूत्राणि ४ निपातवार्त्तिकानि सन्ति ।

*********

# न्यायस्योपाङ्गत्वं वाक्यार्थबोधस्वरूपविमर्शश्च

**आचार्यः हरिनारायण तिवारी**

व्याकरणविभागाध्यक्षः

(प्राचीननैयायिकाभिमतवाक्यार्थविचारः वेददिशा न्यायस्योपाङ्गत्वं च विचार्येते(
(नैयायिकानाम् इमे सर्वेऽपि सम्प्रदायाः तद्ग्रन्थाश्च लुप्ताः, अतः
वाक्यपदीयग्रन्थदिशा तत्पक्षाः प्रतिपाद्यन्ते(

वेदेषु तदङ्गानि उपाङ्गानि च वर्णितानि । तान्यत्र प्रस्तूयन्ते- तथा च सीतोपनिषदि-

**ऋचो यजूंषि सामानि, अथर्वाङ्गिरसस्तथा ।**
**चातुर्होत्रप्रधानत्वाल्लिङ्गादित्रितयं त्रयी ॥**
**अथर्वाङ्गिरसं रूपं, सामऋग्यजुरात्मकम् ।**
**तथा दिशन्त्याचारसामान्येन पृथक् पृथक्-॥**
**एकविंशतिशाखायामृग्वेदः प्रकीर्तितः । ।**
**शतं च नव शाखासु यजुषामेव जन्मनाम् ॥**
**साम्नः सहस्रशाखाः स्युः, पञ्च शाखा अथर्वणः ॥**
**वैखानसमतस्तस्मिन्नादौ प्रत्यक्षदर्शनम् ।**
**स्मर्यते मुनिभिर्नित्यं वैखानसमतः परम् ॥**
**कल्पो व्याकरणं शिक्षा निरुक्तं ज्योतिषं छन्द एतानि षडङ्गानि ।**
**उपाङ्गमयनं चैव, मीमांसा न्यायविस्तरः ॥**
**धर्मज्ञसेवितार्थं च वेदवेदोऽधिकं तथा।**
**निबन्धाः सर्वशाखा च समयाचारसंगतिः ॥**
**धर्मशास्त्रं महर्षीणामन्तःकरणसम्भृतम् ॥**
**इतिहासपुराणाख्यमुपाङ्गं च प्रकीर्तितम् ॥**

वास्तुवेदो धनुर्वेदो गान्धर्वश्च तथा मुने।!
आयुर्वेदश्च पञ्चैते उपवेदाः प्रकीर्तिताः ॥
दण्डो नीतिश्च वार्ता च विद्या वायुजयः परः ॥
एकविंशतिभेदोऽयं स्वप्रकाशः प्रकीर्तितः ॥
वैखानस ऋषेः पूर्वं विष्णोर्वाणी समुद्भवेत् ।
त्रयीरूपेण संकल्प्य इत्थं देही विजृम्भते ॥
इत्थं वेदवाक्याद् न्यायस्योपाङ्गत्वं दर्शितम् ।

वाक्यपदीयग्रन्थे यथा मया व्याख्यातं तथैवात्र प्रबन्धे प्रस्तूयते । न लेशतोऽपि भेदः- वाक्यपदीये ब्रह्मकाण्डे शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतम् । तस्य च साधारण्येन वाचकत्वं व्यवस्थापितम् । इदानीम् प्राचीननैयायिकानां मते भेदेन केषाञ्चित् पदं वाचकम्, अन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्य तावद् वितत्य स्वरूपप्रतिपादनाय वाक्यपदीयद्वितीयकाण्डदिशा विषय उपस्थाप्यते ।

तत्राचार्यमतभेदाश्रयेण
तावद् वाक्योद्देशार्थमाह-

आख्यातशब्दः सङ्घातो, जातिः सङ्घाततवर्तिनी। ।
एकोऽनवयवः शब्दः, क्रमो बुद्ध्यनुसंहृतिः ॥१॥
पदमाद्यं पृथक् सर्वं, पदं साकाङ्क्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना, बहुधा न्यायवादिनाम् ॥१॥

अनयोर्द्वयोः कारिकयोर्गभीर आशयो वाक्यस्य विषये दर्शितः। न्यायवादिनाम् आचार्याणां वाक्यस्य अष्टौ विकल्पाः सन्ति।

तत्र वाक्यम् अखण्डमिति पक्षे-

१ संघातवर्तिनी जातिः ।-

यहाँ संघातवर्तिनी जाति का अर्थ है-'सुप्तिङन्तपदसंघातवर्तिनी जातिर्वाक्यम्' ।। ऐसा वाक्य मानने वाले का तात्पर्य यह है कि 'देवदत्त गामभ्याज ! दण्डेन इत्यादिपदसंघातरूपवाक्यों में प्रत्येक वाक्य में कोई भिद्यमान जातिविशेष है, जिससे प्रत्येक पुरुष, प्रत्येक उच्चारण और प्रत्येक क्षण में भेद होने पर भी 'देवदत्तगामभ्याज ! दण्डेन' इस वाक्य में एकत्वप्रत्यभिज्ञा होती है। प्रत्येक पुरुष, प्रत्येक उच्चारण और प्रत्येक क्षण में भेद होने पर भी पदसंघात में वाचकत्व सम्भव नहीं है, क्यों कि ऐसा मानने से शक्ति का आनन्त्यव्यभिचारदोष होगा। अतः पदसंघातगत एक जाति को ही वाचकत्व माना जायेगा, उसी का ही वाक्यत्व होगा।

२अवयवरहित शब्द एक है।-

'एकोऽनवयवः शब्दः वाक्यम्' यह किसी का मत है। इस मते में। अखण्डवाक्यस्फोट होता है। उसमें वर्ण, पद और अपोद्धारकल्पना में भी वाक्य में वर्ण और पद पृथकू नहीं होते हैं। एवम् ।

३बु-द्ध्यनुसंहृति। ये तीन वाक्यलक्षण हैं।

'बुद्ध्यनुसंहृतिर्वाक्यम्' यह भी किसी आचार्य का मत है। इस पक्ष में वाक्य अखण्ड ही होता है। उसमें पदों की पृथकू सत्ता नहीं है, परन्तु पद और पदबुद्धि कल्पित हैं। उसमें कल्पित पदबुद्धियों का क्रम से उपसंहार होता है, अतः बुद्धि के द्वारा पदसमुदायरूपत्व कल्पित करके वाक्यचव्यवहार किया जाता है। इस तरह 'वाक्य अखण्ड होता है, इस पक्ष में ये तीन वाक्यभेद हैं।

परन्तु वाक्य सखण्ड होता है, इस पक्ष में-

४आख्यातशब्द-

सखण्डपक्ष में 'आख्यातशब्दो वाक्यम्' ऐसा मानने वाले न्यायदर्शियों के यहाँ 'आख्यातशब्द ही वाक्य है' ऐसा अभिप्राय नहीं है। क्यों कि ऐसा अभिप्राय

मानने पर 'देवदत्त गामभ्याज दण्डेन !इत्यादि सुप्तिडन्तसमुदाय में जो सर्वजन के वाक्यत्व का अनुभव है, उसके अपलाप की आपत्ति होगी। परन्तु कहीं पर मात्र आख्यातशद भी वाक्य होता है, जहाँ कारक का प्रयोग किये बिना ही मात्र आख्यात पद का प्रयोग से ही वाक्यार्थ का बोध हो जाता है। जैसे पिधेहि-बन्द कर दो' इस आख्यात पद से । यह विषय आख्यातनिर्णयप्रसंग में बताया जायेगा-

आख्यातशब्द नियतं, साधनं यत्र गम्यते ।

तदप्येकं समाप्तार्थं, वाक्यमित्यभिधीयते । इति ॥ (वा(३२६.२.प.

यहाँ इस कारिका में 'तदप्येकं वाक्यम्' में 'अपि' इस पद का प्रयोग करने से 'अन्य भी वाक्य होता है ऐसा समझा जाता है।

५-क्रम,

अथ च 'पदों का जो क्रमपौर्वापर्य है वह पूर्वापरीभूत पद ही वाक्य हैं=', यह किसी आचार्य का कहना है। इनके मत में वाक्यस्फोट का सखण्डत्व और पदसमुदायारधत्व है।

६स-ङ्घात,

'पदसंघाती वाक्यम्' ऐसा वाक्यलक्षण मानने वाले आचार्य के मत में 'पिधेलि इत्यादि में न केवल तिङन्त पद का वाक्यच है, परन्तु द्वारम्' इस कर्म पद का अध्याहार करके 'द्वारम्' इस कर्म सहित का ही वाक्यच है । मात्र आख्यातपद के वाक्य की तरह 'द्वारम्' इस सुबन्त पद का वाक्यच सम्भव नहीं है, क्यों कि वहाँ। नियम के द्वारा पिधानक्रिया की उपस्थिति नहीं होती है।

७आद्य पद और-

'आद्य पदं वाक्यम्' यह भी किसी का मत है। इस पक्ष में 'अनेकपदारब्धं सखण्डे वाक्यम्' यह वाक्यलक्षण होगा। इस मत में प्रथम उपस्थित होने से

शक्तताविच्छेदकानुपूर्वीकल्पना एवं लाघव होने से ‘आद्य पद ही वाचक है, इतर पद उसके सहकारी होने से आद्य पद की शक्ति का ही मात्र द्योतन करते हैं। जैसे ‘साक्षात् क्रियते' यहाँ पर ‘साक्षात यह पद ही साक्षात्कार का वाचक है, ‘क्रियते' यह पद पूर्वपद ‘साक्षात’ का ‘साक्षात्कार इस अर्थ में शक्ति का द्योतन करता है, अतः आद्य पद का ही द्योतकत्व अथवा वाक्यत्व हैं।

८.पृथक् सभी पद साकाङ्क्ष हैं,

‘पृथक् सर्वं पदं साकाङ्क्ष वाक्यम्' यह भी वाक्यवादियों का एक मत है। इसका अर्थ हैवाक्य से पृथक्कार में-पृथक-, साकाङ्क्षम–पदान्तरसाकाङ्क्ष, सर्वम्-आद्य, मध्यम और अन्त्य पद समुदित वाक्य होता है। इसी को परमर्षि ने कहा है- ’अर्थकचादेकं वाक्यं, साकाङ्क्षं चेद् विभागे स्यात्’ ।

इस तरह वाक्य के ये पाँच लक्षण खण्डपक्ष में हुए। इस तरह ये आचार्यों के आठ वाक्यविकल्प हैं-‘वाक्यस्फोट अखण्ड होता है, इस पक्ष मेंजातिः-सघातवर्तिनी, एकोऽनवयः शब्दः, और बुयनुसंहतिः' ये तीन लक्षण होते हैं। और ‘वाक्यस्फोट सखण्ड होता है इस पक्ष में ‘आख्यातशब्दः, क्रमः, सङ्घातः, पदमाद्यम्, पृथक् सर्वं पदं साकाङ्क्षम्', ये पाँच वाक्यलक्षण हुए। उसमें भी संघात और क्रम, ये दो अभिहितान्वयपक्ष में लक्षण हैं, और ‘पृथक् सर्व पदं साकाङ्क्षम् यह अन्विताभिधानपक्ष में लक्षण हैं।

इसमें भी ‘आख्यातशब्द, इस पक्ष में भी अभिहितान्वयपक्ष में वाक्य के तीन लक्षण होते हैं। जैसे-

१आख्यातशब्द यह एक लक्षण-,

२आद्य पद भी वाक्य होता है-, यह दूसरा लक्षण, एवम्

३-‘पथक सर्व पदं साकाङ्क्षम' यह तीसरा लक्षण, इस तरह

अन्विताभिधानपक्ष में वाक्य के ये तीन लक्षण हैं।

इसका भाव यह है किअर्थ को कहने में समर्थ है=पद ही शक्त-, वाक्य नहीं । पदार्थों का जो वाक्यार्थभूत संसर्गसम्बन्ध है=, वह आकाङ्क्षाभास्य है। तत्तच्छाब्दबोध । के प्रति पदों का जो नियत समभिव्याहार–पौर्वापर्योच्चारण है, वह नियत है, उसी । को आकाङ्क्षा कहा जाता है।

वाक्यार्थ का विचार अनेक पक्षों में किया गया है, जिनमें अभिहितान्वयवाद,अन्विताभिधानवाद और प्रतिभावाद है। मीमांसक और नैयायिक अभिहितान्वयवादी अन्विताभिधानवादी होते हैं। इन दोनों ही पक्षों में अनेक दोष देख कर वैयाकरणों ।ने प्रतिभावाद को अपनाया है, जिसका विवेचन इसी काण्ड में आगे किया जायेगा।

जो आचार्य यह कहते हैं कि 'अभिहितयो:शक्ति से उपस्थित दो पदार्थों = का अन्वय आकाङ्क्षाभास्य है, वे आचार्य अभिहितान्वयवादी कहे जाते हैं। जैसा कि 'पद के सघात को वाक्य कहते हैं, अथवा पदों का जो पौर्वापर्यरूप क्रम है, उसे वाक्य कहते हैं। पदों को ही अर्थवाचकता में समर्थ होने से इस पक्ष में अभिहितान्वयवाद आता है।

'कार्यान्वित अथवा इतरपदार्थान्वित स्वार्थ में पदों की शक्ति होती है, इस तरह का अन्वयरूप संसर्ग भी शक्तिभास्य ही होता है। वहाँ अन्वयत्वेन अन्वयसामान्य शक्तिभास्य होता है, परन्तु तादात्म्यादिरूप सम्बन्धविशेष का लाभ वाक्यलक्षणा के द्वारा । होता है, ऐसा अन्विताभिधानवादी मीमांसकों का कहना है। जैसा कहा है-

**'सर्वत्रैव हि वाक्यार्थों, लक्ष्य एवेति ये विदुः ॥**
**भाट्टास्तेऽपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम्' ॥ इति ॥**

अन्विताभिधानवाद का उपपादन इस तरह होता है- तत्तदर्थविषयकशाब्दबोधं प्रति वृत्त्या तत्तत्पदजन्यतत्तदर्थविषयकोपस्थितिः कारणम्' इस तरह का कार्यकारणभाव माना जाता है। इस कार्यकारणभाव में 'वृत्त्या' इस पद का निवेश न करने पर 'घटमान्य इस वाक्य में आश्रयतासम्बन्ध से 'आकाशमानय' एवं जनकतासम्बन्ध से 'कुलालमानय' इस अर्थ की उपस्थिति होने से उसका भी शाब्दबोध में भान होने लगेगा। अत एव इस तरह का कार्यकारणभाव मानने पर अन्वयांश में भी शक्ति माननी ही पडेगी। इस पक्ष में आख्यातशब्द इतरपदार्थान्वितवार्थबोधक है। 'आद्य पदम्' इस पक्ष में इतरपदार्थान्वितस्वार्थबोधक है। 'पृथकू साकाङ्क्षं सर्व पदम् इतरतत्तत्स्वार्थबोधकम्' इस रीति से इन तीनों वाक्यलक्षणों में अन्विताभिधानवाद सम्भव है।

यहाँ जो वाक्य का आठ प्रकार बताया गया है, उसका व्याख्यान आगे विस्तार से प्रस्तुत किया जायेगा। श्रीपुण्यराजजी ने सभी का सङ्केत अपनी टीका में कर दिया है, अतः ग्रन्थविस्तार के भय से उनका यहाँ पुनः उपस्थापन नहीं कर रहा हूँ। इन विषयों को आगे ही स्पष्ट करूंगा। पाठकगण वहीं से गतार्थ करेंगे ।

एतेऽष्टौ वाक्यविकल्पा आचार्याणाम् । तत्राखण्डपक्षे जातिः सङ्घातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि ॥

खण्डपक्षे तु आख्यातशब्दः, क्रमः, सङ्घातः, पदमाद्यम्, पृथक् सर्वं पदं साकाङ्क्षमिति पञ्चलक्षणानि ॥

अत्रापि सङ्घातः क्रमः इत्यभिहितान्वयपक्षे लक्षणद्वयम् । आख्यातशब्दः, पदमाद्यम्, पृथक् सर्वं पदं साकाङ्क्षम् इत्यन्विताभिधानपक्षे लक्षणत्रयमिति विभागः।

इह च 'पदप्रकृतिः संहिता' इति प्रातिशाख्यम् । तत्र(१.२.प्रा.वे.ऋ) पदानां

प्रकृतिः कारणं पदप्रकृतिः संहिता इत्यखण्डपक्षः । पदानि प्रकृतिर्यस्याः सेति खण्डपक्षश्च प्रादुर्भवति। तत्राख्यातशब्दो वाक्यमिति परस्ताच्छब्दार्थनिर्णय इति प्रकरणे वाक्यपदीये प्रदर्शितम् । यथा-

आख्यातशब्दे नियतं, साधनं यत्र गम्यते ।
तदप्येकं समाप्तार्थं, वाक्यमित्यभिधीयते ॥(३२६.२.वा)

'केवलेन पदेनार्थः' (वाइत्यादिना श्लोकाष्टकेन सङ (४१.२.्घातो वाक्यमिति दर्शितं वाक्यपदीयग्रन्थे। तद् यथा-

**केवलेन पदेना, यावानेवाभिधीयते ।**
**वाक्यस्थं तावतोऽर्थस्य, तदाहुरभिधायकम् ॥४१ ॥**
**सम्बन्धे सति यत्त्वन्यद्, आधिक्यमुपजायते ।**
**वाक्यार्थमेव तं प्राहुः, अनेकपदसंश्रयम् ॥४२ ॥**

केवलं पदं तस्यैवार्थस्य वाचकं वाक्यस्थमपि तमेवाभिदधाति । ततः समुदाये पदानां परस्परान्वये पदार्थवशाद् आधिक्यं संसर्गः स वाक्यार्थः ॥

उक्तं च'यदत्राधिक्यं वाक्यार्थः सः' इति ।(४६.३.२.भा.म) 'अनेकपदसंश्रयम् इत्यनेन सङ्घातो वाक्यमिति दर्शितम् ॥ वा४२-४१.२.काण्ड.प.॥

वाक्यार्थस्य चास्य जातिवत् प्रत्येकं परिसमाप्तिः केषाञ्चिन्मते संख्यावत्। समुदायपरिसमाप्तिरिति पक्षद्वयं दर्शितवान्-

**स त्वनेकपदस्थोऽपि, प्रतिभेदं समाप्यते ।**
**जातिवत् समुदायेऽपि, संख्यावत् कल्यते परैः ॥४३ ॥**
**सर्वभेदानुगुण्यं तु, सामान्यमपरे विदुः ॥**
**तदर्थान्तरसंसर्गात्, भजते भेदरूपताम् ॥४४ ॥**

सर्वेषां भेदानामानुगुण्यं यस्मिन् तत्तथाविधं सामान्यं संसर्गलक्षणम् आकाङ्क्षायोग्यतासन्निधानवशेन पदार्थान्तरसंसर्गाद् नियतस्वरूपं वाक्यार्थः ॥

वाकाण्ड.प.,२ ४४.॥

तत्र चाकाङ्क्षावसरे येय मस्फुटपता वाक्यार्थस्य तामितरपदार्थसन्निधिः निवारयतीत्याह-

**भेदानाकाङ्क्षतस्तस्य, या परिप्लवमानता॥**
**अवच्छिन्नत्ति सम्बन्धः, तां विशेषे निवेशयन् ॥४५ ॥**

पूर्वत्रपदानां वाक्ये तावानेवार्थौ यावानेव केवलानाम्, संसर्गस्तु सङ्घातवाच्यः । इह तु तथाभूत एव सामान्यरूपः पदस्यार्थो यस्तत्तद्विशेषसन्निधौ तत्तद्विशेषविश्रान्त इति ॥ वा ४५.२.काण्ड.प.॥

सङ्घातपक्षे संसर्गों वाक्यार्थ इत्युक्तम् । स च पूर्वत्र जातिवत्। सं ख्यावद्वा पदार्थ व्यतिरे क ण वाक्याथ त्वे न कल्पितः । इदानीं पदार्थ व्यतिरेके णासन्नेव एकान्तानुमेयो न समुदायवाच्यः, किं तर्हि सर्वभेदाऽनुगुणसामान्यरूपो विशेषान्तरसन्निधानाद् विशेषविश्रान्तः पदार्थ एवं वाक्यार्थ दर्शयति-

**कार्यानुमेयः सम्बन्धो, रूपं तस्य न दृश्यते ।**
**असत्त्वभूतमत्यन्तम्, अतस्तं प्रतिजानते ॥४६ ॥**

कार्येण पदार्थानां विशेषविश्रान्तिलक्षणेनानुमीयत इति कार्यानुमेयः । इदं तदिति तु रूपं तस्य न दृश्यते । अत एव असत्त्वभूतं पदार्थव्यतिरेकेण सत्त्वं नास्ति यस्य तमेवंभूतमाचार्याः प्रतिजानते ॥ वा ४६.२.काण्ड.प.॥

एतदेव व्यक्तीकर्तुमाह-

**नियतं साधने साध्यं, क्रिया नियतसाधना।**
**स सन्निधानमात्रेण, नियमः सन् प्रकाशते ॥४७ ॥**

साध्यं साधनं च परस्परं नियतमेव । केवलम् आकाङ्क्षावशाद् -
इतरपदार्थसन्निधाने सति नियमः सन्नेव प्रकाशते इत्याक्षिप्तपदान्तराणि पदान्येव

वाक्यम्, पदार्थश्च वाक्यार्थ इत्यव्यतिरिक्तः सङ्घातपक्षोऽयम् ॥ वा ४७.२.काण्ड.प. ॥

अथात्र परस्परापेक्षायां समानायां विशेषमभिधातुमाह-

**गुणभावेन साकाङ्क्षं, तत्र नाम प्रवर्तते ।**

**साध्यत्वेन निमित्तानि, क्रियापदमपेक्षते ॥४८ ॥**

नाम=कारकपदं क्रियायां गुणभूतं सत् पदान्तरमाकाङ्क्षति । क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षत इति ॥ वा ४.२.काण्ड.प.॥

“यथैक एव सर्वार्थः' (वा इत्यादिना (७.२.'देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः' (वाग्रन्थेन इत्यन्तेन (१४.२., तथा ‘अव्यक्तः क्रमवान्' (वा.२. १ ( इत्यादिना‘व्यावृत्तभेदो येनार्थः' इत्यन्तेन चाऽखण्ड एव स्फोटलक्षणः शब्दो वाक्यमिति दर्शितम् ॥

उक्तं च ‘येनोच्चारितेन सास्नालाङ्गूलखुरककुदविषाण्यर्थरूपं प्रतिपाद्यते,स शब्दः भ.म)ा तथा (.पस्पशा.‘स्फोटः शब्दो ध्वनिः शब्दगुणः' (मइति । (.पस्पशा.भा.

स्फोटश्च द्विविधःबाह्यः आभ्यन्तरश्चेति । बाह्योऽपि जातिव्यक्तिभेदेन-द्विविधः। तत्र जातिलक्षणस्य ‘जातिः सङ्घातवर्तिनी इति, व्यक्तिलक्षणस्य ‘एकोऽनवयवः शब्दः' इति । आभ्यन्तरस्य तु बुद्ध्यनुसंहृति’रित्यनेनोद्देशः ।

तत्र जातिव्यक्तिलक्षणस्य बाह्यस्य ‘यथैक एवइत्यादिना पुनः (७.२.वा) ‘अव्यक्तः क्रमवान्' (वाइत्यादिना ग्रन्थेन स्वरूपमुक्तम् । यदन्तः (१६.२. शब्दतत्त्वम् इत्यादिना श्लोकचतुष्टयेनाऽऽन्तरस्य स्वरूपमुक्तम् (३०.२.वा)॥

‘सन्त एव विशेषा ये' (वा इत्यादिना (४९.२.‘समानेऽपि तु शब्दत्वे' (वा. २ इत्यन्तेन श्लोकपञ्चकेन क्रमो वाक्यमिति प्रदर्शितम् (५३.॥

'नियतं साधने साध्यम्' (वा इत्यनेन च श्लोकद्वयेन (४७.२.'पदमाद्यम् 'पृथक् सर्वं पदं साकाङ्क्षम्' इति लक्षणद्वयं व्याख्यानम् ॥

अन्यदपि वार्त्तिककारीयं पारिभाषिकं शास्त्रे वाक्यलक्षणमस्तिआख्यातं-साव्ययकारकविशेषणं वाक्यम्' (म (१.२.भा."एकतिङ्' (मइति (१.१.२.भा. च ।

जन्मीमांसकोक्तं लौकिकमप्यस्ति-'अर्थैकत्वादे कं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' (मी इति । अनयोः सङ्घातपक्षेऽन्तर्भावः (४६.१.२.सू.॥ एते ऽपि प्रथममेव 'निघातादिव्यवस्थार्थम्' (वइत्यादिना विचारितम् । (३.२.प. इत्थम् अष्टावेव वाक्यविकल्पा मतभेदेन सम्पद्यन्त इति बोद्धव्यम् ॥

यत्पुनरनेन वृत्तावुक्तम्-'उदाहरणमात्रमेतत् । अन्यान्यपि वाक्यलक्षणानि दर्शयिष्यति' इति, तद्वार्त्तिककारीयवाक्यलक्षणादेः अन्तर्भावमनपेक्ष्येति मन्तव्यम् । उद्दिष्टानां च वाक्यलक्षणानां यथान्यासमग्रे कारिकाभिरेव दर्शितक्रमेण मूलग्रन्थे स्वरूपमुन्मीलितमिति नार्थ इह तत्प्रदर्शनेन ।

वाक्यलक्षणप्रसङ्गेन च तथा वाक्यार्थस्य सम्बन्धस्य च मतभेदं प्रतिपादितमस्ति । तत्राखण्डपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः प्रदर्शितम्-

**विच्छेदग्रहणेऽर्थानां, प्रतिभान्यैव जायते ।**
**वाक्यार्थ इति तामाहुः,...॥ (१४३.२.प.वा)॥**

इति । अवशिष्टेषु पञ्चसु लक्षणेषु मध्याद् 'आख्यातशब्दो वाक्यम् इत्यस्मिन् पक्षे क्रिया वाक्यार्थः । यथा-'क्रिया क्रियान्तराद् भिन्ना' (वा.प. २इत्यादिना (४१४. -मूलग्रन्थे उक्तम् । यथा च

**प्रतिभा यत्प्रभूतार्था, यामनुष्ठानमाश्रितम् ।**
**फलं प्रसूयेत यतः, सा क्रिया वाक्यगोचरः ॥** इति ।

संघातपक्षे क्रमपक्षे च संसर्गो वाक्यार्थः । स च

**सम्बन्धे सति यत्त्वन्यद्, आधिक्यमुपजायते ।**

**वाक्यार्थमेतं सम्प्राहुरनेकपदसंश्रयम् ॥ (४२.वा)॥**

इत्यादिना उक्तम् । तथा सङ्घातपक्ष एव सर्वभेदानुगुण्यम्' (४४इत्यादिना ( प्रकारान्तरेणाऽभिहितान्वयपक्षे प्रतिपाद्यमाने 'कार्यानुमेयः सम्बन्धो, रूपं तस्य न विद्यते' (वा इत्यनेन श्लोकेन विशेषविश्रान्तः (४६.२.पदानामेवा वाक्यार्थ इति लक्ष्यते ।

'पदमाद्यम्, पृथक् सर्व पदं साकाङ्क्षम्' इत्यस्मिंस्तु पक्षद्वये संसृष्ट एव प्रथमतरं प्रक्रम्यते वाक्यार्थः । यथा निरूपितम्-'तेषां तु कृत्स्नो वाक्यार्थः, प्रतिभेदं समाप्यते' (वा। (१८.२.

तथा-

**'पूर्वे रथैरनुगतो, यथार्थात्मा परः परः ॥**

**संसर्ग एव प्रक्रान्तः, तथाद्येष्वर्थवस्तुषु' ॥ इति(५१४.वा)॥**

**'अभिधेयः पदस्यार्थो, वाक्यस्यार्थः प्रयोजनम्' (वा(११३.**

इत्यनेन प्रयोजन वाक्यार्थत्वेन प्रदर्शितम् । तत्काचिन्मते सर्वलक्षणसाधारणमिति न प्रयोजनं वाक्या वाक्यलक्षणेषु पृथग्विभज्यते।

तदेवं प्रतिभा, संसर्गः, संसर्गवशान्निराकाङ्क्षो विशेषावस्थितः पदार्थ एव, संसृष्ट एवार्थः, क्रिया, प्रयोजनं चेति षडू वाक्या इहोपदर्शिताः ॥

संसर्गे, संसर्गवशाद् विशेषावस्थिते पदार्थे च वाक्यार्थे ऽभिहिताचयः । संसृष्टे, क्रियायां चान्विताभिधानम् । प्रतिभायां त्वेकरसेव प्रतिपत्तिरिति न तत्र काचिद् अभिहितान्वयाऽन्विताभिधानचर्चा। प्रयोजने त्वभिहितान्वय - एव ।

विधिनियोगभावनासज्ज्ञास्तु वाक्यार्था न निरूपिताः, यस्माद् भावनाक्रिययोः

पर्यायता प्रायशो लक्ष्यते । केवलं प्रकृत्यर्थप्रत्ययार्थतायामत्र वैयाकरणमीमांसकयोर्विवादः ॥

किञ्च, भावना सकर्मिकैव, अकर्मकापि क्रिया, इति सत्यपि भेदे साध यत्वाऽविशेषादभेद एवानयोः । यथा धात्वर्थभूता क्रिया साध्यरूपेव तथा भावनापीति कथमवान्तरभेदाद् भेदोऽनयोर्भवेत् ।

विधिनियोगौ तु लिङ्लोट्कृत्यान्तेष्वेव वाक्येष्वर्थावित्यसर्व विषयत्वाद् अनादृताविहेति न तत्प्रदर्शनं कृतम् ।

तत्तदनादिवाक्यार्थविकल्पाहितवासनाप्रबोधजन्मा क्रमवद्भिः इवाङ्गमैर्बहीरूपतयाऽध्यस्तैः पदाथैश्चित्रीकृत इव विकल्पविशेषोल्लिख्यमान आकारो बहीरूपतयाऽध्यस्तो निर्विभाग एवं शाक्यानां वाक्यार्थ इति प्रायशः प्रतिभासोदर एवासौ मन्तव्यः ॥

वाक्यमपि तत्तदनादिवाक्यविकल्पोहितवासनाप्रबोध - जन्मक्रमवद्भिरिवाक्रमैः पदैश्चित्रीकृत इव बहीरूपतयाऽध्यस्यमानो विशिष्टविकल्पोल्लिख्यमान आकारविशेष एव बहीरूपतयाऽध्यस्त इति प्रायशो बुद्ध्यनुसंकृतिरित्यस्य सोदरमेवेति न तन्मतानुसारेण वाक्यवाक्यार्थयोरिहाऽसंग्रहो वेदितव्यः ॥

नैयायिकानान्तु पूर्वपूर्ववर्णस्मृतिसचिवोऽन्त्यो वर्णो नश्यदवस्थाऽनुभवविषयीक्रियमाणः पदं यथा, तथैव पूर्वपूर्वपदस्मृतिसचिवमन्त्यमेव - पदं नश्यदवस्थानुभवविषयीक्रियमाणं वाक्यमिति प्रायशः संसर्गपक्ष एवान्तर्भवति । तथा पूर्वपूर्वपदार्थस्मरण -सचिवेनान्त्येन पदेनोपजन्यमाना प्रतीतिर्वाक्यार्थ इति प्रायशः संसर्गपक्ष एवान्तर्भाव इति न तदसंग्रहेणाऽव्याप्तिरत्र वक्तव्या।

अथाऽत्राऽनवयव एवैकस्मिन् स्फोटात्मके वाक्ये प्रतिमालक्षणे च - वाक्याथै वाक्यवाक्यार्थयोरध्यासरूपः सम्बन्धः । यद् वक्ष्यति-'वाक्यवृत्तस्य वाक्यार्थे वृत्तिः' (वाइत्यादि ।(२६२.

अवशिष्टेषु पक्षेषु वाच्यवाचकभावलक्षणो योग्यताख्य एव शब्दार्थयोः सम्बन्धो मीमांसकदृष्ट्या। शाक्यदर्शनानुसारेण तु विज्ञानवादनयेन बौद्धे शब्दार्थे सर्वत्र कार्यकारणभाव एव । वाक्यार्थवादे तु तत्र संकेतलक्षणोऽसौ बोद्धव्यः ।

नैयायिकाद्यनुसारेण च संकेतलक्षण एवासावित्येवमत्र वाक्यवाक्यार्थसम्बन्धानां संक्षेपतः स्वरूपं बोद्धव्यम् । सम्बन्धेषु मध्याद् अध्यासमेव दर्शयिष्यति । पदकाण्डे तु सर्वानभिधास्यति ।

तत्र वैयाकरणस्याऽखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः, अध्यासश्च सम्बन्ध इति पदवादिपक्ष दूषणपरः परं -टीकाकारो व्यवस्थापयतीत्यस्य काण्डस्य संक्षेपः ॥१,२ ॥।

**********

# स्वरितञितः कर्त्रभिप्राये क्रियाफले

**डा.चन्द्रशेखरभट्टः**

शिष्टप्रयुक्ताञ्छब्दानन्वाचिख्यासुः पाणिनिर्भगवान् चमत्कृतिजनिकां व्याकृतिक्रियामवर्तयत्।

**सूत्रपाठो धातुपाठो गणपाठस्तथैव च ।**
**लिङ्गानुशासनं शिक्षा पाणिनीयं हि पञ्चकम् ॥**

इत्येवं तत्प्रसिद्धिः। तत्र अनन्तशब्दरूपाणि धातुना निष्पद्यन्ते।उच्यते 'सर्वं नाम धातुजमाह शकटस्य च तोकम्' इति। द्विसहस्रं धातून् दशसु गणेषु विभज्य उपदिदेश आचार्यः पाणिनिः।धातुषु कतिपये आत्मनेपदिनः, कतिचन परस्मैपदिनः, उभयपदिनश्च केचित्।अनुदात्तङित आत्मनेपदमित्यारभ्य प्रायेण पञ्चपञ्चाशता सूत्रैः धातूनामात्मनेपदनिमित्तमभ्यधायि।ये त्वात्मनेपदनिमित्ताद्धीयन्ते ते परस्मैपदिनः। अथ क उभयपदिनः? स्वरितेतो ञितश्च।कथमुभयपदित्वम्? कर्तृगामिनि क्रियाफले आत्मनेपदित्वम्, परगामिनि तु पस्मैपदित्वम्।स्वरितञितः कर्त्रभिप्राये क्रियाफले इति हि तद्विधायकम् ? यद्यपीदं सूत्रमात्मनेपदमेव विधत्ते स्वरितञितस्तथापि परगामिनि क्रियाफले शेषात्कर्तरीति परस्मैपदमित्युभयपदित्वं धातोः।

अत्रात्मनेपदविधाने द्वयी गतिः।तथा हि – संविधानवृत्तिभ्यो धातुभ्यः सूत्रेणानेनात्मनेपदं विधीयते।संविधानं च कृत्स्नधात्वर्थप्रवृत्त्यनुकूलो व्यापारः। पचते, यजते।पाचयति, याजयतीत्यर्थः । न चेदमयुक्तं पचियज्योः संविधानवृत्तित्वाभावादिति वाच्यम्; धातूनामनेकार्थत्वेन संविधानवृत्तित्वसम्भवात् । यदा प्रकृतिरेव संविधाने वर्तते तदा तस्य द्योतकमात्मनेपदमुत्पद्यते।यदा संविधानं नाभिधीयते तदा तदभिधानाय धातोर्णिजुत्पद्यते।एवञ्चात्मनेपदाभिधेयः कर्ता संविधानमपेक्षते । उक्तं च हरिणा –

ISSN: 2249-538X 

**केषांचित् कर्त्रभिप्राये णिचा सह विकल्प्यते ।**

**आत्मनेपदमन्येषां तदर्था प्रकृतिर्यथा ॥ इति।**

शब्दशक्तिस्वाभाव्यात् स्वरितञित एव संविधाने वर्तन्ते। न चैवं णिचा संविधानस्य बोधितत्वात् णिजन्तादात्मनेपदानापत्तिरिति वाच्यम् ; द्वितीये संविधाने ण्यन्तस्य वृत्तिकल्पनेनादोषात् । यथा राजा पाचयते। न ह्यस्यार्थस्य सूत्रानारूढत्वं शङ्क्यम्, क्रियाफले इत्यनेन संविधानलक्षणक्रियाविशेषस्य उपलक्षणात् । तदुक्तम्

**कर्त्रभिप्रायता सूत्रे क्रियाभेदोपलक्षणम्।**

**तथाभूता क्रिया सा हि तत्कर्ता फलभाग्यतः॥** इति।

क्रीणीष्व, वपते, धत्ते, चिनुते इत्यादिशिष्टप्रयोगा अप्यत्र मानम् इति कैयटः। स्वरित ञित एव शब्दशक्तिस्वाभाव्यात् संविधाने वर्तन्ते नान्ये।

द्वितीयस्तु प्रकार इत्थम् – स्वार्थं यः क्रियामारभते तत्रात्मनेपदम्।परार्थारम्भे तु परस्मैपदम्। न चैवं याति, वात्यादिषु आत्मनेपदमतिप्रसज्येतेति वाच्यम्; अस्यार्थस्य विवक्षाधीनत्वात्।वाति,यात्यादिषु पस्मैपदविवक्षैव नास्तीति न दोषः। स्वार्थत्वपरार्थत्वोभयविवक्षावतां धातूनां स्वार्थत्वविवक्षायामात्मनेपदमिति सूत्रार्थः। ईदृशी विवक्षा लौकिके प्रयोगे स्वरितञिद्विषयैव ।

**स्वरितञित इत्यस्य प्रयोजनम् -** अथ स्वरित ञित इति किमर्थम्? याति, वाति, द्राति, प्साति इत्यादावात्मनेपदनिवृत्त्यर्थम् । नैतदस्ति । सम्भवे व्यभिचारे वा सत्येव प्रकारान्तरव्यवच्छेदेन विशिष्टे कार्यविधानाय विशेषनिर्देशः कार्यः। इह च कर्त्रभिप्राये क्रियाफले इत्युच्यते।सर्वेषामपि धातूनां कर्त्रभिप्रायं क्रियाफलमस्त्येव।यात्यादिषु कर्त्रभिप्रायक्रियाफलस्यैव सम्भवेन तेषां संविधानवृत्तित्वाभावात् व्यावर्त्याप्रसिद्धिः। तदयमर्थः येषां कर्त्रभिप्रायमकर्त्रभिप्रायं च क्रियाफलमस्ति त एव कर्त्रभिप्राये क्रियाफले आत्मनेपदं विन्दन्ते नान्ये।तादृशा एव हि धातव आचार्येण स्वरितेतो ञितश्च कृताः। न हि यात्यादयस्तादृशा इति तेभ्य आत्मनेपदप्रसङ्गाभावः। इत्थं च

कर्त्रभिप्राये क्रियाफल इति सामर्थ्यादेव उभयवतां ग्रहणे सिद्धे स्वरितञित इति मन्दप्रयोजनमिति भाष्यकृत आशयः ।

**अभिप्रग्रहणविचारः -** कर्तारमेतीति कर्त्रायमिति विवक्षितेऽर्थे सिद्धे अभिप्रेत्युपसर्गद्वयग्रहणं व्यर्थमिति चेत्? एवं हि यमेव क्रियाफलं सम्प्रत्येति तत्रैव स्यात् । यथा लुनीते,पुनीते । इह च न स्यात् यजते, वपते । अयमाशयः – द्विविधं हि क्रियायाः फलमासन्नं विप्रकृष्टं चेति।आसन्नं दृष्टम् अव्यभिचरितं च व्यापारानन्तरमेवोत्पत्तिकत्वात्।तद्यथा यागस्य अन्नपुत्रशत्रुवधादिकम्।तद्धि प्रधानम्। विप्रकृष्टं तु कालान्तरभावि।व्यापारेषूपरतेषु कालान्तरे भवतीति यावत्।यथा यागस्य स्वर्गादिः।यद्यदृष्टं तर्ह्यनुमेयम्।एतद्धि अप्रधानम्।तदत्र प्रधानस्यैव फलस्य ग्रहणं स्यात् ।यद्यपि यदुद्दिश्य क्रियायां प्रवृत्तिस्तत्फलमिति विप्रकृष्टस्यापि फलत्वं निर्बाधं तथापि असन्निधानादप्राधान्यं स्यादिति ग्रहणम् न स्यात्। ततश्च यजत इति अन्नपुत्रवृष्ट्यादिफलसत्व एव प्रयुज्येत न तु स्वर्गादिफलकल्पनायाम्।वपते इति च केशश्मश्रु वपते इत्यासन्ने फले एव स्यान्न तु धान्यं वपत इत्यत्र विप्रकृष्टे इति।अभिप्रग्रहणे तु क्रियमाणे विप्रकृष्टस्यापि ग्रहणं भवति । अभिरसावाभिमुख्ये वर्तते, प्र आदिकर्मणि। तेन यं च फलमभिप्रैति, यं चाभिप्रेष्यति, यं चाभिप्रागात्तत्र सर्वत्रात्मनेपदं सिद्ध्यति।यदा कर्ता फलस्य आभिमुख्यं बुद्ध्याऽध्यवस्यति क्रियारम्भे तदाऽत्मनेपदमित्यर्थः। **कर्त्रभिप्राये क्रियाफल इत्यस्य प्रयोजनविचारः।**

कर्तारमभिप्रैतीति कर्त्रभिप्रायम्।अभिप्रैतिर्गत्यर्थः।तेन कर्तृगामिनि क्रियाफले इति लभ्यते।प्रकृतधातुवाच्यक्रियायाः प्रधानभूतं यत्फलं तदर्थमसौ क्रिया प्रवर्तते।तच्चेत्फलं प्रत्ययवाच्यकर्तृगामि विवक्ष्यते तदाऽआत्मनेपदमित्यर्थः।यथा यजते यजमान इत्यत्र यागफलस्य स्वर्गादेः प्राधान्यम्।तच्च यजमानगामि।अत एव यजन्ति याजकाः इत्यत्र नात्मनेपदम्। न हि यागफलं स्वर्गादि ऋत्विग्गामि। एवं

पचन्ति भक्तकराः, कुर्वन्ति कर्मकराः इत्यादावपि।ननु कर्त्रभिप्राये क्रियाफल इत्युच्यमानेऽपि पूर्वोक्तोदाहरणेषु आत्मनेपदं प्राप्नोति।याजका यजन्ति गा लप्स्यामह इति, कर्मकराः कुर्वन्ति पादिकमहल्प्स्यामह इति।अत्र हि क्रियाफलस्यात्मगामित्वेन आत्मनेपदप्रसङ्गः। अत्रोच्यते, सर्वत्रैव हि क्रियाया यत्किञ्चित्फलं कर्तारमभिप्रैत्येव ।उच्यते पुनः कर्तृगामिनि क्रियाफल इति। तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो यत्र क्रियाफलं कर्तारमञ्चतीति।प्रकर्षश्चात्रानन्यलभ्यत्वमेव।न ह्यन्तरेण यजिं यजिफलं स्वर्गं यजमाना लभन्ते तदुद्देशेनैव यागे प्रवर्तनात्।न ह्यन्तरेण वपिं वपिफलं धान्यदिकं कर्ता लभते। याजकास्त्वन्तरेणापि यागं गा लभन्ते।अन्तरेनापि पाकं भक्तकरा भृतिं लभन्ते।किञ्च न दक्षिणादिकं प्रधानफलम्।यच्च प्रधानफलम् स्वर्गादि न तदृत्विग्गामि, यच्च फलं ऋत्विग्गामि न तत्क्रियाफलम्, तदुद्देशेन क्रियानारम्भात्।न हि याजका दक्षिणां लभेरन्निति यजमानो यागे प्रवर्तते। तदुक्तं हरिणा-

**यस्यार्थस्य प्रसिद्ध्यर्थं प्रारभ्यन्ते पचादयः।**
**तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्॥**इति।

तच्च फलं क्वचिच्छ्रुत्या लब्धम्, क्वचिच्च लोकतः सिद्धम्।यजेः स्वर्गरूपम् फलं श्रुत्या बोधितम्। पचेर्भोजनफलकत्वं लोकतः सिद्धम्।एवञ्च यदुद्देशेन व्यापारे प्रवृत्तिस्तदेव फलमत्र ग्राह्यमिति।

अथ कथं स्वामिदासौ पचत इति ? अत्र स्वामिनिष्ठपाकव्यापारोद्देशस्य फलस्य कर्तृगामित्वेन आत्मनेपदं, दासनिष्ठपाकव्यापरोद्देशस्य फलस्य परगामित्वेन परस्मैपदं च प्राप्तम्। अयं समाधिः – क्रियामात्रविवक्षायां परस्मैपदम् इति कैयटः। फलस्य आत्मगामित्वपरगामित्वयोरविवक्षायां व्यापरमात्रविवक्षायां भविष्यतीत्यर्थः। नागेशस्तु विवक्षाविषयकर्तृगामित्वपरगामित्वकोटिद्वयापेक्षया तृतीयकोटेरभावात् उपपत्त्यन्तरमेवात्र वाच्यम्, दासधर्मस्य स्वामिन्यारोपात् परस्मैपदोपपत्तिः। स्वामिधर्मस्य दास आरोपे तु आत्मनेपदमिति। शम् ॥

# गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ

चिर्रावूरि कृष्णानन्तपद्मनाभः

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रार्थविचारोत्र प्रस्तूयते। गतिश्च बुद्धिश्च प्रत्यवसानं च गतिबुद्धिप्रत्यवसानानि ते अर्थाः येषां गतिबुद्धिप्रत्यवसानार्थाः, शब्दः कर्म येषां ते शब्दकर्माणः, न विद्यते कर्म येषाम् अकर्मकाः, गतिबुद्धिप्रत्यवसानार्थाश्च शब्दकर्माणश्च अकर्मकाश्च गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाः तेषाम् । गत्यर्थकानां बुद्ध्यर्थकानां प्रत्यवसानार्थकानां शब्दकर्मकाणाम् अकर्मकाणाम् अण्यन्तावस्थायां यः कर्ता स णौ कर्मसंज्ञां लभते इति सूत्रार्थः। णिपदेन हेतुमण्णिजेव गृह्यते। उत्तरत्र भक्षेरहिंसार्थस्य न इति प्रतिषेधात्। तस्य चौरादिकत्वेन स्वार्थणिचः नैयत्येन णिजभावप्रयोगस्य अभावात् ।

अत्र शब्दकर्मणाम् इत्यत्र कर्मपदेन किं ग्राह्यम्? यतः कर्मपदेन क्वचित् क्रिया गृह्यते, क्वचिच्च कर्मकारकं गृह्यते, कर्तरि कर्मव्यतिहारे इत्यत्र क्रियाव्यतिहार एव ग्राह्यः इति, वेश्शब्दकर्मणः इत्यत्र कर्मकारकमेव ग्राह्यमिति च सिद्धान्तितत्वेन कृत्रिमाकृत्रिमन्यायस्यायं न विषयः। तदुक्तं भाष्ये शब्दकर्मेति कथमिदं विज्ञायते – शब्दो येषां क्रियेति, आहोस्विच्छब्दो येषां कर्मेति? इति। शब्दक्रियाणामणौ कर्तुः णौ कर्मत्वमिति चेद् ह्वयत्यादीनां प्रतिषेधो वक्तव्यो भवति । ह्वयति देवदत्तः, ह्वाययति देवदत्तेन, क्रन्दति देवदत्तः, क्रन्दयति देवदत्तेन, शब्दायते देवदत्तः शब्दाययति देवदेवदत्तेन इत्यादौ अणौ कर्तुः देवदत्तस्य णौ कर्मत्वं प्राप्तं तस्य निषेधो वक्तव्यः। तेन देवदत्तशब्दान्न द्वितीया। किन्तु यथाप्राप्तैव कर्तृकरणयोस्तृतीयेति तृतीया।

शब्दस्य यद्यपि गुणत्वेन प्रसिद्धिरस्ति तथापि ह्वेञ् स्पर्धायां शब्दे च

इत्यभियुक्तोक्त्या शब्दनमत्र व्यापारः साध्यमानावस्थः क्रियारूप एव ग्राह्यः। एवं च शब्दनरूपव्यापाराश्रयस्य देवदत्तस्य अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां कर्मत्वं प्राप्नोतीति तस्य प्रतिषेधः। स्पर्धायां ह्वेञः अकर्मकत्वपक्षे अकर्मकत्वप्राप्तस्य कर्मत्वस्य अनेन वार्तिकेन निषेध इति चेन्न। स्पर्धारूपार्थे अस्य शब्दक्रियार्थकत्वस्यैवाभावे कर्मत्वाप्राप्तेः। तथा च शब्दे इत्यर्थे ह्वयति देवदत्तः इत्यत्र पुत्रमित्यादेः कर्मणः सत्त्वेन अयं सकर्मक एव।

शब्दायते इति, शब्दं करोति इत्यर्थे शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इत्यनेन क्यङ्, शब्दाय इत्यस्माल्लटि रूपम्। शब्द उपसर्गादाविष्कारे च इति चुरादिः परस्मैपदी, अस्य प्रतिशब्दयति इत्यादिकं रूपम्, चाद्भाषणेपि। प्रतिशब्दयति प्रतिश्रुतमाविष्करोतीत्यर्थः। एवं चास्य शब्दनरूपार्थवत्त्वाभावेन न प्राप्तिः। द्वितीये भाषणार्थकत्वेपि शब्दायते इति रूपं न भवति। भाष्ये शब्दायते इत्येव ह्वयत्यादिषु पठितम् । तस्य परिगणनत्वे चौरादिकस्यास्य ग्रहणं न भवति। उपलक्षणं चेदस्यापि शब्दनरूपक्रियार्थकत्वेन कर्मत्वप्राप्तौ वार्तिकेन निषेध आवश्यकः, अणौ शब्दयति देवदत्तः, णौ शब्दयति देवदत्तेन इति प्रयोगसिद्ध्यर्थम्, यदीदृशः प्रयोगः अवर्तिष्ट । शब्दायते इत्यत्र शब्दनव्यापारार्थकत्वेन यथा प्राप्नोति कर्मत्वं तथा शब्दाय इत्यत्र शब्दरूपकर्मणोन्तर्भावादकर्मकत्वेन च प्राप्तमपि कर्मत्वं निषिद्ध्यते इति द्वेधा प्राप्तस्यापि कर्मत्वस्य अनेन वार्तिकेन निषेध इति कैयटाशयः। ह्वेञः स्पर्धायां शब्दव्यापारार्थकत्वाभावो यदि प्रामाणिकस्तर्हि तदर्थे अणौ कर्तुः णौ कर्मत्वस्यैवाप्राप्तिरिति नैतद्वारणार्थो निषेधः। यदि हि शब्दव्यापारार्थकता तर्ह्यनेन निषेधः भवति।

शब्दनरूप-धात्वर्थान्तर्भूतकर्मकत्वेन अस्य ह्वेञ्धातोरकर्मकत्वमिति तु न युक्तम्, पुत्रादेः बाह्यकर्मणः सत्त्वात्। धात्वर्थोपसंगृहीतत्वेन अकर्मकत्वप्राप्तस्य कर्मत्वस्यापि अनेन वार्तिकेन निषेध इति, पुत्रादिरूपबाह्यकर्मणः अत्र प्राप्तिरेव न

भवतीति प्राचीनानामाशयः। ह्वेञ् शब्दे इत्यर्थनिर्देशेन तदानीं ह्वेञः सकर्मकत्वे, तदर्थकशब्दार्थे शब्दाय इत्यस्य कथमकर्मकतेति अन्तर्भूतशब्दरूपकर्मणः अभावेपि बाह्यकर्मणः पुत्रादेः सत्त्वेन सकर्मकतैवास्य युक्ता। अतः शब्दनरूपक्रियायाः अत्र सत्त्वेन सूत्रेण प्राप्तैव कर्मसंज्ञानेन वार्तिकेन निषेद्धव्या इति नव्यानामाशयः। क्रन्दयतीत्यत्र च निषेध आवश्यक इति प्रथमवार्तिकस्य स्वरूपम्। शृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात् इति द्वितीयं वार्तिकम्। शृणोति विजानाति उपलभते इत्यादौ अशब्दक्रियत्वादेतेषां धातूनाम् अणौ कर्तुः णौ कर्मत्वस्य अप्राप्तौ वचनेन कर्मत्वं वक्तव्यमिति वार्तिककारस्य आशयः। शृणोत्यादयो हि शब्दोपलभ्यार्थार्थकाः, न शब्दक्रियार्थकाः।

शृणोत्यादीनां बुद्ध्यर्थकत्वेन अणौ कर्तुः णौ कर्मत्वं सिद्धमिति चेन्न ज्ञानसामान्यार्थकानामेव तत्र बुद्धिपदेन ग्रहणात्। शृणोत्यादयः ज्ञानविशेषवाचकाः इति बुद्ध्यर्थकत्वमाश्रित्य तेषां कर्मत्वं न सिद्ध्यति। शब्दक्रियाणामित्यर्थे एतेषां कर्मत्वं वक्तव्यम्। शब्दकर्मकाणामित्युक्तौ तु प्रयोजकव्यापारविवक्षायां यदा प्रकरणवशात् शब्दविषयार्थकता तदा कृत्रिमकर्मणो ग्रहणे एतेषां शब्दकर्मार्थकत्वेन कर्मत्वं सिध्यति। शृणोति-जानात्यादीनां शब्दविषये श्रावणज्ञाने यदा वृत्तिः तदानीमपि अणौ कर्तुः णौ कर्मत्वमिष्यते, बुद्ध्यर्थकत्वेन च न सिध्यति। बुद्धिपदेन ज्ञानसामान्यार्थकानामेव तत्र ग्रहणात्। दृशेश्चेत्युपसंख्यानमपि अत एवारब्धम्। तस्य ज्ञानविशेषवचनत्वेन बुद्ध्यर्थकत्वेन कर्मत्वाप्राप्तिरिति।

एवं च क्रियाग्रहणे ह्वयत्यादीनां प्रतिषेधः शृणोत्यादीनामुपसंख्यानं च कर्तव्यमिति, तदपेक्षया कृत्रिमकर्मणो ग्रहणे न वक्तव्यावश्यकतेति चेद् तर्हि जल्पतिप्रभृतीनामुपसंख्यानं कर्तव्यम्। जल्पत्यादयः लाडनपूर्वके जल्पने शब्दनक्रियायां वर्तन्ते। पुत्रं जल्पतीत्यादौ कृत्रिमकर्मणः अभावेन तेषामुपसंख्यानं कर्तव्यम्। किञ्च दृशेः उभयथापि अणौ कर्तुः णौ कर्मत्वाप्राप्तिरेव। क्रियाग्रहणे वा

कृत्रिमकर्मग्रहणे वा अस्य न सिध्यति। दर्शनं न शब्दनक्रिया, तत्र च कर्म न शब्दरूपं कर्म । ज्ञानविशेषार्थकत्वेन न बुद्ध्यर्थकत्वनिमित्तिका कर्मत्वसिद्धिः। ज्ञानसामान्यार्थकत्वे तु तदा बुद्ध्यर्थत्वेन सिध्यत्येव। जल्पति देवदत्तः, जल्पयति देवदत्तम्, आभाषते देवदत्तः, आभाषयति देवदत्तम्, पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणम् इति उदाहरणानि।

अदिखादिनीवहीनां प्रतिषेध उक्तः। आद्ययोः भक्षणार्थकत्वेन, नीवह्योः गत्यर्थकत्वेन कर्मत्वे प्राप्ते निषेधः। न गतिहिंसार्थेभ्यः इति सूत्रे भाष्ये “न वहिर्गत्यर्थः। देशान्तरप्रापणक्रियोत्र वहिः'' इति उक्तम्। गतिर्नान्तरीयकतया प्रतीयते न त्वसौ धात्वर्थः इति कैयटः। नान्तरीयकतया प्रतीयमानस्यापि गमनस्य धात्वर्थत्वमाश्रित्य ह्वह्योरप्रतिषेधः इति तत्र वार्तिकं प्रणीतम्। देशान्तरप्रापणक्रियोत्र इत्यत्र “अत्र” इत्यनेन “न गतिहिंसार्थेभ्यः” इत्यत्रैव तथा नान्तरीयकतया प्रतीयमानस्य न धात्वर्थत्वमिति सूचितम्। अत एव प्रकृतसूत्रे उद्द्योते “ नयतेस्तु गत्युपसर्जनं प्रापणमर्थः इति गत्यर्थत्वमस्त्येव। प्रापयतेस्तु शुद्धं प्रापणमेव वहिवदर्थः इति स न गत्यर्थः इति बोध्यम् ” इत्युक्तम्। अत्ति देवदत्तः, आदयते देवदत्तेन, खादति देवदत्तः खादयति देवदत्तेन, नयति देवदत्तः, नाययते देवदत्तेन इत्यादीनि उदाहरणानि।

वहेरनियन्तृकर्तृकस्य इति वार्तिकान्तरम्। वहेः प्रयोगे अनियन्तृकर्तृकस्य गत्यर्थत्वेन प्राप्तस्य निषेधः इति। वहति भारं देवदत्तः, वाहयति भारं देवदत्तेन। अत्र नियन्ता नाम सारथिः पशुप्रेरकः इत्यर्थः। देवदत्तस्य नियन्तृत्वाभावेन अत्र तस्य कर्मत्वस्य निषेधः। नियन्तृकर्तृकस्य तु निषेधः नास्ति। वहन्ति बलीवर्दाः यवान्, वाहयति बलीवर्दान् यवान्। भक्षेरहिंसार्थस्य इति वक्तव्यम्। भक्षयति पिण्डीं देवदत्तः, भक्षयति पिण्डीं देवदत्तेन इत्युदाहरणम्। अत्र यवानां भक्षणे हिंसा भवतीति न निषेधः।

कालकर्मकाणाम् अकर्मकवचनात् अकर्मकत्वात् अणौ कर्तुः णौ कर्मत्वं सिध्यति इत्याशयेन सिद्धं कालकर्मणामकर्मकवचनात् सिद्धमित्युक्तं भाष्ये। तेषां च कर्मत्वमविशेषेण सकर्मकाकर्मकस्थले सर्वत्र प्राप्नोतीति तेन कर्मणा ये अकर्मकाः तेषां न ग्रहणम्, किन्तु येन कर्मणा सकर्मकाश्च अकर्मकाश्च भवन्ति तेन कर्मणा रहिता एवाकर्मकाः अत्र अकर्मकपदेन ग्राह्या इति, तेषाम् अणौ कर्तुः णौ कर्मत्वमेनेन सूत्रेण विधीयते। कालभावध्वरूपकर्मणा अकर्मकत्वं कस्यापि न भवति। तद्भिन्नं कर्म आस्ते इत्यादौ न भवति इति तत्र अणौ कर्तुः णौ अनेन कर्मत्वं सिध्यति। मासमास्ते देवदत्तः, मासमासयति देवदत्तम् इत्युदाहरणम्।

**********

# त्रिशब्दविचारः

डा. प्रमोद भट्टः

तरति गच्छति मूलकारणेषु सत्त्वरजस्तमस्सु या सङ्ख्या सा त्रिः त्रित्वम् इत्यर्थः । तद्वन्तः त्रयः त्रित्वविशिष्टाः इत्यर्थः आदशतः सङ्ख्या सङ्ख्येये इत्युक्तेः । एकादयः दशघटितमभिव्याप्य स्थिताः सङ्ख्यावाचकाः सङ्ख्येये सङ्ख्याश्रये एव न तु सङ्ख्यायाम् । सङ्ख्यायां तु एकत्वम्, द्वित्वम्, अष्टादशत्वमित्यादि ।

**तॄ प्लवनतरणयोः** इति धातोः **तरतेः ड्रिन्** इत्युणादिसूत्रेण ड्रिन् प्रत्यते सति अनुबन्धलोपे डित्वात् धातोः टिलोपे त्रिशब्दः निष्पद्यते । अयं त्रिशब्दः नित्यं बहुवचनस्यैव वाचकः । त्रयः, त्रीन्, त्रिभिः, त्रिभ्यः, त्रिभ्यः, त्रयाणाम्, त्रिषु इति क्रमेण पुंसि प्रथमायाः आरभ्य सप्तमीपर्यन्तं विभक्तिषु उदाहरणानि ।

तत्र बहुवचने षष्ठीविभक्तौ त्रि आम् इति स्थिते **त्रेस्त्रयः** इति सूत्रस्य प्रक्तिरस्ति । तथा हि त्रेः त्रयः इति पदच्छेदः । द्विपदमिदं सूत्रम् । त्रेः इति त्रिशब्दस्य षष्ठीविभक्त्येकवचनं स्वरूपपरम् । त्रयः इति प्रथमैकवचनं विधीयमानम् अकारान्तं न तु नपुसकं सान्तं **निजां त्रयाणां गुणश्श्लौ** इति सूत्रे त्रयाणामिति निर्देशात् । **आमि सर्वनाम्नः सुट्** इति सूत्रात् आमि इति सप्तम्यन्तमनुवर्तते । एवं च त्रिशब्दस्य त्रयादेशः स्यादामि इति सूत्रार्थः फलति । अयं त्रय इति आदेशः अनेकाल्त्वात् **अनेकाल्शित्सर्वस्य** इत्यनेन त्रिशब्दस्य सम्पूर्णस्य स्थाने भवति । एवं च त्रय आम् इति स्थिते **ह्रस्वनद्यापो नुट्** इति नुटि णत्वे च त्रयाणामिति रूपम् ।

ननु **निजां त्रयाणां गुणश्श्लौ** इति सूत्रे त्रयाणमिति निपातनादेव त्रयाणामिति रूपसिद्धेः सूत्रमिदं व्यर्थं खलु इति चेत् अबाधकान्यपि निपातनानि इत्यर्थज्ञापनेन सूत्रस्य चारितार्थ्यात् ।

ननु **त्रेस्त्रयः** इत्यनेन त्रयादेशविधानं मास्तु । **त्रेरयङ्** इति अयङादेश विधायकमिदं भवतु । तथा हि आमि परे त्रेः अयङि अस्य ङित्वात् ऐः अयङादेशे नुडादिकृते इष्टं रूपं सिद्ध्यति इति चेत् अत्र उच्यते इयङ्, अनङ्, उवङ् इत्यादिवत् ङकारपूर्वस्याकारस्य उच्चारणार्थत्वप्रसङ्गात् इष्टं रूपं न स्यात् ।

ननु निजां त्रयाणामित्यत्र त्रयाणामिति निर्देशात् **त्रेस्त्रयः** इत्यत्र यथा त्रयः इति अदन्तः स्वीक्रियते तथैव अत्रापि अयङादेशे **निजां त्रयाणां गुणश्श्लौ** इति निर्देशात् अयमकारः नोच्चारणार्थकः इति ज्ञाप्यते इति चेत् त्रीन् इव आचरति इति विग्रहे **तत् करोति तदाचष्टे** इति णिचि इष्टवद्भावेन टिलोपे त्रि इत्यस्मात् कर्तरि क्विपि तुकि च त्रित् आम् इत्यवस्थायां ङित्वात् तकारस्य अयङादेशे यणि च त्रयाणामिति न स्यात् । अपि च अधीत्य इत्यादौ युगपत् **प्राप्तावेव वार्णादाङं बलीयः** इत्यस्याः स्वीकारात् प्रकृते अनेन तुकः प्रागेव अयङादेशो अस्तु इति वक्तुं न शक्यते ।

अत्र केचित्तु गौणत्वे तु न त्रयादेशः प्रियत्रीणामिति । एतेषामयमाशयः **आमि सर्वनाम्नः सुट्** इति पूर्वसूत्रात् आमत्र अनुवर्तते । तत्सूत्रं तु **संज्ञोपसर्जनीभूतास्तु न सर्वादयः** इत्यादिना मुख्ये एव प्रवर्तते । अतः तत्सामर्थ्यादत्रापि त्रयादेशः मुख्ये एव इति ।

वस्तुतस्तु सूत्रान्तरसाहचर्ये प्रमाणाभावात् **गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः** इति न्यायाविषयत्वात्, **पदाङ्गीकारे तस्य च तदन्तस्य च** इत्युक्त्या च तदन्तविधिना परमत्रयाणाम्, प्रियत्रयाणामिति च भवतः ।

त्रिशब्दस्य स्त्रीलिङ्गे तु तिस्रः, तिस्रः, तिसृभिः, तिसृभ्यः, तिसृभ्यः, तिसृणाम्, तिसृषु इति सप्तसु विभक्तिषु रूपाणि । अत्रापि पुंवत् बहुवचने एव प्रयोगः । त्रिशब्दस्य स्त्रीत्वविवक्षायां बहुवचने जस्प्रत्यये त्रि जस् इति स्थिते

त्रिशब्दस्य **त्रिचतुरोः स्त्रियां तिसृचतसृ** इति सूत्रेण तिस्रादेशः भवति । तथा हि प्रकरणप्राप्त्या तत्सूत्रं व्याख्यायते । त्रिचतुरोः स्त्रियां तिसृचतसृ इति पदच्छेदः, त्रिपदमिदं सूत्रम् । त्रिश्च चतुश्च त्रिचतुरौ इति स्वरूपपरस्य त्रिचतुश्शब्दस्य इतरेतरयोगद्वन्द्वः । षष्ठीद्विवचनं, त्रिचतुरोः स्थानयोः इत्यर्थः । स्त्रियामिति स्त्रीश्ब्दस्य सप्त्तम्येकवचनम् । तिसा च चतुसा च तयोः समाहारद्वन्द्वः तिसृचतसृ इति । **अष्टन आ विभक्तौ** इति सूत्रात् विभक्तौ इत्यनुवर्तते । **अङ्गस्य** इत्यधिक्रियते । एवञ्च सूत्रस्यास्यार्थः स्त्रीलिङ्गयोः एतयोः एतावादेशौ स्तः विभक्तौ परतः इति फलति । स्त्रियामिति त्रिचतुरोरेव विशेषणं **श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्** इति न्यायात् । सूत्रे यदि विभक्तिपदाननुवृत्तिः स्त्रीलिङ्गयोरेतावादेशौ स्तः इत्यर्थे सति तिसृभिः भार्यः भरणीयः त्रिभार्यः इत्यत्रापि तिस्रादेशः स्यात् । अतः विभक्तिपदानुवृत्तिः आवश्यकी ।

केचित्तु विभक्तौ किम् ? त्रिभार्यः, चतुर्भार्यः इति प्रत्युदाहरणं ददुः तन्मन्दम् । तिस्रः भार्याः, चतस्रः भार्याः यस्येति बहुव्रीहौ स्त्रियाः पुंवदित्यादिना पुंवद्भावे त्रिभार्यादिशब्दसाधनात् । यदि प्रत्युदाहरणं दीयते तर्हि तिसृभिः भार्या त्रिभार्या इति दातव्यम् । त्रि जस् इत्यवस्थायां सूत्रेणानेन तिस्रादेशे तिसृ जस् इति स्थितेऽनुबन्धलोपे तिसृशब्दस्य ऋकारस्य अजादौ रेफादेशे रुत्वविसर्गे च तिस्रः इति रूपम् ।

ननु **इको यणचि** इत्यनेनैव रेफादेशे पुनः रेफादेशविधानार्थम् **अचि र ऋतः** इति व्यर्थमिति चेत् अत्रादौ **इको यणचि** इति यणादेशे प्राप्ते **ऋतो ङिसर्वनमस्थानयोः** इत्यनेन गुणः प्राप्तः, तस्यापवादतया **अचि र ऋतः** इत्यनेन रेफादेशः भवतु इत्येतदर्थं सूत्रमिदम् । न केवलं गुणं बधते सूत्रं दीर्घोत्वमपि । दीर्घोत्वयोः उदाहरणं तिस्रः, प्रियतिस्रः इति । आमि तु तिसृ आम् इत्यवस्थायां नुडागमे **नामि** इति दीर्घे प्राप्ते **न तिसृ चतसृ** इति दीर्घनिषेदार्थं सूत्रमारब्धम् ।

तिसृचतसृ इति सूत्रे लुप्तषष्ठीकं पदम् । **ढ्रलोपे पूर्वस्य दीर्घोऽणः** इत्यतः दीर्घ इत्यनुवर्तते । **नामि** इति सूत्रमनुवर्तते । एवं च सूत्रार्थः तिसृचतसृ एतयोर्नामि दिर्घो न स्यादिति फलति । एवं च दीर्घनिषेधे सति **ऋवर्णान्नस्य णत्वं वाच्यम्** इत्यनेन णत्वे तिसृणाम्, चतसृणाम् इति रूपे भवतः ।

त्रिचतुरोः इति सूत्रे स्त्रियामिति त्रिचतुरोरेव विशेषणम् । स्त्रियामिति तदन्तविशेषणत्वे प्रमाणं नास्ति । यद्यपि **त्रिचतुरोः स्त्रियां तिसृचतसृ** सूत्रम् अङ्गाधिकारे वर्तते । अतः **पदाङ्गाधिकारे तस्य च तदन्तस्य च** इति न्यायेन तदन्तविधिलाभः सुकरः । तथापि त्रिचतुरोरेव प्रत्यक्षश्रुतत्वेन स्त्रियामिति त्रिचतुरोरेव विशेषणतोचित । स्त्रियामित्यस्याङ्गविशेषणत्वे तु स्त्रीलिङ्गः त्रिशब्दगर्भबहुव्रीहौ अव्याप्तिः स्यात् । अतः तन्निराकरणार्थमपि स्त्रियामिति त्रिचतुरोर्विशेषणम् । तेन प्रियाः, त्रयः, त्रीणि वा यस्याः सेति विग्रहे प्रियत्रिशब्दः स्त्रीलिङ्गे वर्तते न तु त्रिशब्दः मतिशब्दवत् । किन्तु आमि प्रियत्रयाणामित्येव रूपम्। **त्रेस्त्रयः** इति त्रयादेशस्य आङ्गत्वेन **पदाङ्गाधिकारे तस्य च तदन्तस्य च** इति न्यायेन त्रिशब्दान्तस्यापि त्रयादेशः प्रवर्तते ।

प्रियाः तिस्रः यस्य सः इति विग्रहे प्रियतिसा, प्रियतिस्रा, प्रियतिस्रः इत्यादीनि रूपाणि । अत्र प्रियाः तिस्रः यस्येति बहुव्रीहौ अन्तर्वर्तिविभक्तेः लुका लुप्तत्वात् तिस्रादेशनिवृत्तौ प्रियत्रिशब्दात् सु । अत्र प्रियत्रिश्ब्दस्य पुंलिङ्गत्वेऽपि त्रिशब्दस्य स्त्रीलिङ्गत्वात् तिस्रादेशः । **ऋदुशनस्पुरुदंसोऽनेहसां च** इति अनङ् । **सर्वनामस्थाने चासम्बुद्धौ** इति दीर्घः । नलोपः । स्त्रियामित्यस्य त्रिचतुरन्ताङ्गविशेषणत्वे अत्राव्याप्तिः स्यात् । प्रियाः तिस्रः यस्य तत्कुलं प्रियत्रि, प्रियत्रिणी, प्रियत्रीणि इत्यत्र समासोत्तरं प्रियत्रि सु इति स्थिते **स्वमोर्नपुंसकात्** इति सोः लुकि प्रत्ययलक्षणाभावात् प्रत्ययपरकत्वाभावात् न तिस्रादेशः **। इकोऽचि विभक्तौ** इति सूत्रे अज्ग्रहणेन **न लुमताङ्गस्य** इत्यस्य अनित्यत्वात् प्रत्ययलक्षणे

तिस्रादेशे प्रियतिसृ इत्यपि रूपम् । द्विवचने प्रियतिसृ औ इत्यवस्थायां शीभावे प्रियतिसृ ई इत्यवस्थायां **नपुंसकस्य झलचः** इति नुमागमः प्राप्नोति । **अचि र ऋतः** इति रादेशश्च प्राप्नोति । परत्वाद्रादेशे प्राप्ते **रादेशात्पूर्वविप्रतिषेधेन नुम्** इति वार्तिकेन पूर्वविप्रतिषेधेन नुमि प्रियतिसृणी इति रूपम् । एवमेव प्रियतिसृणि इत्यत्रापि । तृतीयादिविभक्तिषु **तृतीयादिषु भाषितपुंस्कात् पुंवद्गालवस्य** इति पुंवद्भावविकल्पनात् नुम्रभावे प्रियतिसृणा, प्रियतिस्रा, प्रियतिस्रे, प्रियतिसृणे इत्यादीनि रूपाणि ।

**********

# अपादानविचारः

**श्री अरुण भट्टः**

व्याकरणशास्त्रेऽस्मिन् षड्विधसूत्रेषु विधिसूत्राणि प्राधानानि भवन्ति । विधिसूत्रोपयोगिन्यः नैकाः संज्ञाः विहिताः । तासु अपादानसंज्ञा अन्यतमा । ध्रुवमपायेऽपादानम्[1] इति अपादानसंज्ञाविधायकं सूत्रम् । त्रिपदात्मकमिदम् । वाक्यार्थज्ञाने तद्घटकपदार्थज्ञानस्य अपेक्षितत्वात् आदौ पदार्थावलोकनपुरस्सरं सूत्रार्थः विचार्यते । ध्रु – गतिस्थैर्ययोः इत्यस्माद्धातोः पचादित्वात् नन्दिग्रहि[2] इत्यादिना अचि, कुटादित्वात् गाङ्कुटादिभ्य[3] इति ङित्वात् गुणाभावेन उवङि ध्रुवपदनिष्पत्तिः । स्थैर्यार्थकध्रुव् - धातोः इगुपधत्वात् कप्रत्ययेन[4] निष्पन्नं वा ध्रुवमिति रूपम् । स्थिरमित्यर्थः । अपायो नाम विष्लेषः - विभागः । सूत्रे तु अपादानपदं विश्लेषजनकक्रियापरम् । कारके इत्यधिकृतम् । एवं च विश्लेषजनकक्रियायां यत् ध्रुवं तत् कारकं अपादानसंज्ञकमित्यर्थः । विश्लेषजनकक्रियायां ध्रुवं कारकम् अपादानसंज्ञकमित्युक्तौ तु वृक्षात् पर्णं पतति इत्यादौ विश्लेषहेतुकपतनक्रियायां स्थिरत्वात् वृक्षस्य अपादानत्वे सिद्धेऽपि धावतो अश्वात् पतति इत्यदौ अश्वस्य अध्रुवत्वात् अपादनत्वं न स्यात् । अतः ध्रुवमित्यस्य अवधित्वमर्थः इति स्वीकृतम् । एवं च अपायो विश्लेषः तस्मिन्साध्ये ध्रुवम् अवधिभूतं कारकम् अपादानं स्यात् इति अर्थः पर्यवस्यति ।

इदमेवोक्तं वाक्यपदीये –

---

[1] अष्टाध्यायी – १. ४. २४

[2] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । अष्टाध्यायी – ३. १. १३४

[3] गाङ्कुटादिभ्योऽञ्णिन्ङित् । अष्टाध्यायी – १. २. १

[4] इगुपधज्ञां प्रीकिरः कः ।

ISSN: 2249-538X

**अपाये यदुदासीनं चलं वा यदि वाचलम् ।**
**ध्रुवमेवातदावेशात् तदपादानमुच्यते[1] ॥** इति ।

चलं वा अचलं वा भवतु अपाये - विश्लेषहेतुक्रियायां यत् उदासीनं - अनाश्रयः, अतदावेशात् - क्रियानाश्रयत्वात् तत् अपादानमित्यर्थः । एवञ्च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वम् अवधित्वं, तस्य अपादानसंज्ञा इति फलितः ।

वृक्षात् पर्णं पतति इत्यादौ पर्णस्य अपादानत्ववारणार्थं विश्लेषहेतुक्रियानाश्रयत्वे इति सत्यन्तं दलम् । पर्णस्य विभागानुकूलव्यापारानाश्रयत्वात् न अतिप्रसङ्गः । यस्यपि परत्वात् कर्तृसंज्ञया बाधात् नातिप्रसङ्गः इत्युच्यते तथापि सत्यन्तविशेषणाभावे कर्तृसंज्ञायाः अपादानसंज्ञा अपवाद एव स्यात् । अपादानविषये यत्कारकम् अपायरूपक्रियाश्रयः तदपादानं स्यात् । एवं सति कर्तृसंज्ञा निरवकाशा स्यात् किल इति चेत् , पचादीनां विश्लेषार्थरहितानां धातूनां प्रयोगे सावकाशत्वात् चारितार्थ्यम् । ग्रामं गच्छति इत्यादौ व्यापारानाश्रयत्वात् कर्मणि ग्रामे अतिव्याप्तिवारणाय विश्लेषाश्रयत्वमिति विशेष्यम्। लक्षणे क्रियानाश्रयत्वमात्रोक्तौ धावतो अश्वात् पतति इत्यत्र क्रियाश्रयत्वात् अश्वस्य अपादानसंज्ञा न स्यात् । अतः क्रियायां विश्लेषहेतुत्वविशेषणं देयम् । एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वम् अवधित्वम् इति लक्षणं सम्पद्यते । एवं च वृक्षात् पर्णं पतति इत्यत्र पतनक्रियायाः अनाश्रयस्सन् विभागाश्रयः वृक्षः अतः अपादानत्वम् । धावतो अश्वात् पतति इत्यत्र क्रियाश्रयत्वेऽपि विश्लेषहेतुक्रियानश्रयत्वात् अपादानत्वं सिध्यति ।

एवमपि कुड्यत् पततो अश्वात् पतति चैत्रः इत्यत्र अश्वस्य अपादनत्वं न

[1] साधनसमुद्देशः । १३७

स्यात् । विश्लेशाश्रयस्सन् पतनक्रियायाः अपि आश्रयः अश्वः इति चेत् , विश्लेषस्य तद्विक्लित्तितात्पर्येण तद्विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वम् इति तत्पदनिवेशेनादोषः । अश्वः विश्लेषाश्रयस्सन् अश्वचैत्रयोः यो विभागः तज्जनिकायाः चैत्रनिष्ठक्रियायाः अनाश्रयत्वात् अपादनत्वम् ।

एवमपि उभयकर्मजविभागस्थले विभागसैक्यात् परस्परस्मात् मेषौ अपसरतः इत्यत्र अपादनत्वस्याव्याप्तिः । इति चेन्न । विभागैक्येऽपि क्रियाभेदात् एकस्य पृष्ठतोगमने अन्यस्य निश्चलतां स्वीकृत्य एकक्रियामादाय परस्य अवधित्वं वक्तव्यम् । अत्र विभागस्तु वास्तवसम्बन्धपूर्वकं वास्तव एव किन्तु बुद्धिकल्पितिऽपि गृह्यते इत्यतः माथुराः पाटलिपुत्रेभ्यः आढ्यतराः इत्यादौ बुद्धिकल्पितापायाश्रयेण अपादानत्वं बोद्धव्यम् ।

ननु वृक्षं त्यजति इत्यत्र अपादानत्वापत्ति । तथा हि पूर्वदेशविभागपूर्वकम् उत्तरदेशसंयोगानुकूलव्यापारः त्यज्-धात्वर्थः । तत्र विभागानुकूलव्यापारानश्रत्वस्य वृक्षे सत्वात् अपादानत्वप्राप्तेः वृक्षात् त्यजति इत्यापत्तिः । इति चेत् अत्रोच्यते । धात्वर्थफलाश्रयत्वात् वृक्षस्य कर्मसंज्ञायां[1], विभागाश्रयत्वात् अपादानसंज्ञायां च प्राप्तायां एकसंज्ञाधिकारात्[2] परया कर्मसंज्ञया अपादनत्वस्य बाधात् नातिप्रसङ्गः।

ननु परत्वात् कर्मादयः संज्ञाः अपादानसंज्ञां बाधित्वा भवन्ति इत्युच्यते तर्हि ध्रुवमपायेऽपादानमिति सूत्रे ध्रुवग्रहणं व्यर्थमेव । तथा हि अपाये अपादनमिति सूत्रमलम् । सूत्रे ध्रुवग्रहणाभावे अध्रुवस्यापि अपादानत्वप्राप्तौ परया करणादिना

---

[1] कर्तुरीप्सिततमं कर्म । अष्टाधायी – १. ४. ४९

[2] आकडारादेकासंज्ञा । अष्टाधायी -१. ४. १

बाधात् न भवति । अतः उच्यते “अपादनमुत्तराणि कारकाणि बाधन्ते[1]” इति । कृतेऽपि ध्रुवग्रहणे “धनुषा विध्यति” इत्यत्र धनुषः ध्रुवत्वात् अपादानत्वे प्राप्ते वारणं करणसंज्ञया परत्वादेव वक्तव्यम् । अतः ध्रुवग्रहणं चिन्त्यप्रयोजनम् । अतः अपाये – विश्लेषविषये यत् कारकं तत् अपादानमिति पर्यवस्यति ।

परन्तु ध्रुवग्रहणम् आवश्यकमेव इति नव्याः[2] । सूत्रे ध्रुवपदाभावे वृक्षात् पर्णं पतति इत्यादौ पर्णस्य अपादानसंज्ञायां, कर्तृसंज्ञायां च प्राप्तायां परया कर्तृसंज्ञा[3] इति वक्तुं न शक्यते । इयमपादानसंज्ञा तक्रकौण्डिन्यन्यायेन विशेषविहितत्वात् कर्तृसंज्ञायाङ् अपवादः स्यात् । पचत्यादि प्रयोगेषु कर्तृसंज्ञायाः चारितार्थ्यात् कर्तृसंज्ञाम् अपादानसंज्ञा बाधेत । कृते च ध्रुवग्रहणे ध्रुवस्य अपादानत्वात् पर्णस्य तदप्राप्तिः स्पष्टा एव ।

ध्रुवमित्यस्य स्थिरमित्येवार्थः । सूत्रेऽस्मिन् भाष्ये – “ध्रुवग्रहणं किमर्थम् ? ग्रामादागछति शाकटेन । नैतदस्ति । करणसंज्ञात्र बाधिका भविष्यति” । इत्यादिकं विमृश्य “गतियुक्तेषु अपादानसंज्ञा नोपपद्यते । रथात्प्रवीतात्पतितः । अश्वात् त्रस्तात् पतितः” । इति शङ्का कृता । अस्याशयस्तु - अचलं ध्रुवमेकरूपमिति कृत्वा स्पन्दे तन्नास्ति इत्यतः अश्वस्य अपादानत्वं न स्यात् इति । तदुत्तरे भाष्ये – “कथं पुनः सतोनामाविवक्षा स्यात् ? सतोप्यविवक्षा भवति । अलोमिकैडका । अनुदरा कन्या”। इति समाहितम् । नाम त्रस्तादश्वादित्यत्र अस्वस्य ध्रुवत्वाभावेऽपि अध्रुवस्य विद्यमानत्वेऽपि तस्य प्रथममविवक्षया ध्रुवत्वं सम्पाद्य अपादानत्वं वक्तव्यमित्यर्थः ।

---

[1] आकडारादेकासंज्ञा सूत्रभाष्यम् । अष्टाधायीसूत्रक्रमेण आपादानसंज्ञा आदौ विहिता । एकसंज्ञाधिकारत्वात् परया संप्रदानादिना बाधः भवति ।

[2] नागेशभट्टानां सिद्धान्तः ।

[3] स्वतन्त्रः कर्ता । अष्टाधायी – १. ४. ५४

द्ध्रुवत्वस्य पूर्वोक्तलक्षणस्वीकारे त्रस्तादश्वात् पतितः इत्यादौ अश्वस्य ध्रुवत्वात् सतः अविवक्षा क्रियते इति भाष्यासङ्गतिः स्यात् । किञ्च समाधानभाष्यकारः परिस्पन्दे अध्रुवता नास्ति, ध्रुवत्वमेवास्ति इति लक्षणमेव वदेत्। किञ्च लोकसिद्धार्थातिरिक्तार्थे ध्रुवपदस्य शक्तिकल्पने गौरवात् । अतः ध्रुवमित्यस्य अचलमित्यर्थः । धावतो अश्वत् पतति इत्यादौ अध्रुवत्वस्य अविवक्षणात् सिध्यति । अतः अपाये गतिविषये सति यत् ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति सूत्रार्थः ।

**यदत्र सौष्टवं किञ्चित्तद्गुरोरेव मे नहि ।**
**यदत्रासौष्टवं किञ्चित्तन्ममैव गुरोर्नहि ॥**

**************

# मीमांसाशास्त्रे विशिष्टं व्याख्यानम्

**आचार्यः कुप्पाशिवसुब्रह्मण्य अवधानी**

प्राचार्यः, श्रीवेङ्कटेश्वरवेदविज्ञानपीठम्

धर्मगिरि, तिरुमल

ओं नमो जैमिनिशबरादिभ्यः मीमांसाविद्यासम्प्रदायकर्तृभ्यः वंशर्षिभ्यो नमो महद्भ्यो नमो गुरुभ्यः

**1. उपोद्घातः**

वेदो नाम इष्टप्राप्ति अनिष्टपरिहारयोः अलौकेकोपायबोधकः ग्रन्थराशिः। वेदाङ्गानि षट् – शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पः इति। उपाङ्गानि च षट् – न्याय-वैशेषिक-साङ्ख्य-योग-मीमांसा-वेदान्तानीति। तत्र मीमांसा पूर्वोत्तराभ्यां द्वेधा वर्तते। वेदेषु पूर्वभागानुसारिणी पूर्वमीमांसा, उत्तरभागानुसारिणी उत्तरमीमांसा, यस्याः वेदान्तशास्त्रमिति नाम।

**2. का नाम मीमांसा ?**

मीमांसा नाम वेदार्थविचारः। स च वेदार्थनिर्णयार्थः। तस्य च प्रयोजनं यथावदेव साङ्गप्रधानस्य धर्मस्य अनुष्ठानद्वारा स्वर्गादि प्राप्तिरेव। कर्मानुष्ठानार्थमपेक्षितं वेदार्थज्ञानं मीमांसाशास्त्रं विना व्याकरणेन निरुक्तादिना वा न भवति। यद्यपि अधीतन्यायादितत्त्वस्य वेदवाक्यश्रवणसमनन्तरमेव कश्चिदर्थः प्रतिभाति। तथापि सः किं बाधित उत अबाधितः, अबाधितश्चेत्, किं स एव तत्र विवक्षित उत अन्यः इत्यादि संशयनिरासः मीमांसाशास्त्रेणैव भवति। एतत् “अक्ताः शर्कराः उपदधाति” इत्यादि स्थले सुप्रसिद्धम्। अत एवोच्यते मीमांसा नाम पूजितविचारः। मान-पूजायाम् इति पूजार्थक मानधातोः “मान्वदधान्” इत्यादि सूत्रेण

ISSN: 2249-538X 

सन् प्रत्ययः। अस्य सन् प्रत्ययस्य मानोः जिज्ञासायाम् इति वार्त्तिकात् जिज्ञासार्थकता। जिज्ञासाशब्दस्य च ज्ञानेच्छावाचकत्वेऽपि लक्षणया इच्छासाध्यविचारार्थकता। तथा च मीमांसाशब्दस्य पूजितविचारार्थकता सम्पन्ना। विचारस्य पूजितत्वञ्चात्र तर्कोपष्टब्धत्वम्। तर्कश्च ऊहापोहरूपः न्यायरूपश्च। न्यायश्च लोकव्यवहारसिद्धारीतिः। प्रायश्च पूर्वोत्तरपक्षसाधिका युविनः सैवहि तदधिकरणन्यायेन, अदोऽधिकरणन्यायेन इति न्यायशब्देन भण्यते। मीमांसा च विंशत्यध्यायात्मिका, पूर्वोत्तरत्त्वेन द्वेधा विभक्ता षोडशलक्षणी चतुर्लक्षणी चेति। तत्र मीमांसा वाक्यशास्त्रत्वात् पदशास्त्रवत्, प्रमाणशास्त्रवच्च सर्वोपकारिणी।

### 3. मीमांसा प्राचीनैव

मीमांसा किल बहोःकालात् प्रागेव याज्ञिकानुष्ठानेषु प्रवृत्ता श्रूयते। ऐतरेयब्राह्मणे तावत् अग्निष्टोमगतदीक्षणीयेष्टौ, अग्नाविष्णूदेवताकः एकादशकपालः पुरोडाशः उक्तः। तस्य च अग्निः विष्णुश्च द्वौ देवौ । तत्रेयमाशङ्का कैश्चिद्ब्रह्मवादिभिरुपन्यस्ता। “तदाहुः – यदेकादशकपालः पुरोडाशः द्वे अग्नाविष्णू का एनयोः तत्र क्ल् प्तिः, का विभक्तिः” इति। तत्र अन्यैः ब्रह्मवादिभिः प्रत्युक्तम् – “अष्टाकपालः आग्नेयः, त्रिकपालः वैष्णव” इति। तत्र कथं आग्नेयस्य अष्टाकपालत्वनियमः इत्याकाङ्क्षायाम् – “अष्टाक्षरा वै गायत्री, गायत्रं अग्नेश्छन्दः” इति युक्तिः उदाहृता। अस्यायमर्थः – अग्नेः गायत्रीछन्दसश्च प्रजापतेः मुखात् समकालमुत्पन्नत्वेन सम्बद्धत्वात्, गायत्र्याश्च प्रतिचरणं अष्टाक्षरत्वात्, आग्नेयपुरोडशस्यापि अष्याकपालत्वमिति। अथ वैष्णवस्य कथं त्रिकपालत्वमिति चेत्, तत्राह – “त्रिर्हीदं विष्णुः व्यक्रमीत्” इति यस्मात् विष्णुना सर्वं विश्वं त्रिभिः पादप्रक्रमैः व्याप्तं, तस्मात् विश्वव्यापकपादप्रक्रमत्रित्वसम्बन्धात् विष्णोः पुरोडाशस्य त्रिकपालत्वं युक्तमिति।

**4. मीमांसायाः प्रयोजनम्**

मीमांसाप्रयोजनं स्वयं सूत्रकारः भगवान् जैमिनिरेव "अथातो धर्मजिज्ञासा" इति धर्मज्ञानमित्याह। भाष्याकरः शबरस्वामी च – "धर्माय जिज्ञासा धर्मजिज्ञासा, सा हि तस्य ज्ञातुम् इच्छा, स कथं जिज्ञासितव्यः, को धर्मः, कथं लक्षणः, कान्यस्य साधनानि, कानि साधनाभासानि, किं परश्चेति" इत्याह। "धर्मं प्रतिहि विप्रतिपन्नाः बहुविदः केचिदन्यं धर्ममाहुः। केचिदन्यम्, सोऽयमविचार्यप्रवर्तमानः कञ्चिदेव उपाददानः विहन्येत, अनर्थंञ्च ऋच्छेत्, तस्मात् धर्मः जिज्ञासितव्यः" इति च। एतेन विचारपूवकं निर्णयात्मकं धर्मज्ञानं मीमांसायाः फलमिति ज्ञायते। श्लोकवार्त्तिके च –

"स्थिते वेदप्रमाणत्वे पुनर्वाक्यार्थनिर्णये
मतिः बहुविदां पुंसां संशयान्नोपजायते।
केचिदाहुरसावर्थः केचिन्नासावयन्त्विति
तन्निर्णयार्थमप्येतत्परं शास्त्रं प्रणीयते ॥" इति।

तन्त्रवार्त्तिकेऽपि – "मीमांसा चापि वेदार्थतत्त्वनिर्णयकारणम्" इति सिद्धान्तः। सर्वत्र हि एतद्विचार्यते किमिदं वाक्यम्, अस्य अर्थस्य प्रमाणम्, उत अन्यस्येति" इति च।

मीमांसा हि वाक्यशास्त्रं, यथा व्याकरणं पदशास्त्रं, न्यायः प्रमाणशास्त्रं तद्वत्। प्राप्ताप्राप्तविवेकेन उद्देश्यविधेयभावं विचार्य वेदवाक्यार्थनिर्णयः अस्मिन् शास्त्रे क्रियते। निर्णीते च वाक्यार्थे कर्तव्याकर्तव्यज्ञानं भवति। तदनयारीत्या कर्तव्यस्य धर्मस्य, अकर्तव्यस्य च अधर्मस्य ज्ञानं मीमांसया भवतीति धर्मज्ञानमेव मीमांसायाः प्रयोजनम्। न केवलं धर्मज्ञानं मीमांसायाः प्रयोजनम्, अपि तु आत्मशोधनमपि। अत एव आत्मशोधनाय वेदप्रणिहितो धर्मः इतिकर्तव्यतादिभिः सम्यग्विवेचितः पूर्वमीमांसायाम्। तस्मादेव कारणात् धर्ममनुतिष्ठातृभिः श्रीमती मीमांसैव सर्वदा शरणीक्रियते। अमुमेव विषयमनुनिबध्नन्ति श्रीभट्टपादाः –

"धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।

इतिकर्तव्यताभागं मीमांसा पूरयिष्यति" इत्यादिना, धर्मः साध्यः। वेदाः साधनम्, मीमांसा इतिकर्तव्या। अर्थात् मीमांसया उपकृतेन वेदेन धर्मः सिद्धो भवति, प्रयाजादिभिः उपकृतेन दर्शपूर्णमासेष्टियागेन स्वर्गप्राप्तिवत्।

मीमांसाशास्त्रमेव न केवलं प्रमाणम्, अपि तु तदभिज्ञोऽपि प्रामाणिक इति मनुरवोचत्। यथा –

"यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।
तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ॥" इति ।

अयं श्लोकः प्रथमाध्यायतृतीयपादचतुर्विंशतितमसूत्रव्याख्यावसरे व्याख्यातृभिः उटङ्कितः।

## 5. मीमांसायाः तर्कसङ्ग्रहः लघीयान्

पूर्वमीमांसाशास्त्रे प्रमाणानि तावत् षट् – प्रत्यक्ष, अनुमान, उपमान, शब्द, अर्थापत्ति, अनुपलब्धिनाम्ना। विधिः, अर्थवादः, मन्त्रः, नामधेयं, स्मृतिः, शिष्टाचारश्च इति षट् धर्मे प्रमाणानि। शब्दान्तरम्, अभ्यासः, सङ्ख्या, संज्ञा, गुणः, प्रकरणान्तरम् इति षट्कर्मभेधकानि प्रमाणानि। शृतिः, लिङ्गं, वाक्यं, प्रकरणं, स्थानं (क्रमः) समाख्या इति षट् विनियोगे धर्माङ्गताबोधकानि प्रमाणानि। शृतिः, अर्थः, पाठः, स्थानं, मुख्यत्वं, प्रवृत्तिः इति षट् क्रमे प्रमाणानि। वचनं, नाम, लिङ्गम् इति त्रीणि अतिदेशे प्रमाणानि। स्थानापत्तिः ऊहे प्रमाणम्। प्रत्याम्नानं, प्रतिषेधः, अर्थलोपः इति त्रीणि बाधे प्रमाणानि।

## 6. मीमांसायाः प्रणेतारो महर्षयः

प्रमाणभेदशेषत्वादीनां प्रसङ्गान्तानां पदार्थानां विस्तरेण प्रतिपादिकायाः द्वादशलक्षण्याः प्रकीर्णानां च धर्मविषयाणां प्रतिपादिकायाः सङ्कर्षणकाण्डाख्यायाः चतुर्लक्षण्याः प्रणेता भगवान् महर्षिः जैमिनिः। उत्तरमीमांसायाः चतुर्लक्षण्यास्तु

प्रणेता भगवान् बादरायणः। परमकारुणिकेन भगवता जैमिनिमहर्षिणा “अथातो धर्मे”त्यारभ्य “अन्वाहार्ये”चेत्यन्तं द्वादशाध्यायात्मकं सूत्रं प्रणीय तत्र वेदवाक्यार्थविषयक-संशयापाकारकाः सहस्रं न्यायाः अधिकरणापरपर्यायाः प्रदर्शिताः। सूत्रं च “शास्त्रीयगभीरबह्वर्थप्रतिपादकः सङ्क्षिप्ताक्षरः शब्दसन्दर्भविशेषः” इत्याचक्षते सूत्रलक्षणविदोऽभियुक्ताः, अत एवोच्यते –

“अल्पाक्षरमसन्धिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥” इति ।

मीमांसागुरुपरम्परानुसारं जैमिनिमहर्षिः कृष्णद्वैपयनशिष्यत्वत्, भगवतः कृष्णद्वैपायनस्य द्वापरयुगप्रभवत्वेन प्रसिद्धत्वात् कलियुगारम्भात्प्राक् द्वापरयुगान्तेऽयं जैमिनिमहर्षिः आविर्बभूवेति अभियुक्तोक्तिः। ब्रह्मसूत्रप्रणेतुः साक्षान्नारायणावतारात् वेदव्यासात् बादरायणापरपर्यायात् इयं मीमांसा प्रापिता जैमिनिमहर्षये। तादृशजैमिनिमहर्षिणा च सुप्रसिद्धेः प्रापितत्वात् महती इयं मीमांसा।

## 7. गुरुपरम्परा

शास्त्रदीपिकायाः टीकायां पार्थसारथिमिश्रविरचित-युक्तिस्नेहप्रपूरण्याख्यायां सिद्धान्तचन्द्रिकायां तर्कपादे गुरपरम्परा एवं उक्ता। ब्रह्मा प्रजापतये मीमांसा प्रोवाच, सोऽपि इन्द्राय, इन्द्रः अग्नये, स च वसिष्ठाय, सोऽपि पराशराय, पराशरः, कृष्णद्वापायनाय, सोऽपि जैमिनये, जैमिनिः स्वोपदेशादनन्तरम् इमं न्यायं ग्रन्थे निबद्धवानिति ।

पाठान्तरे – महेश्वरः प्रजापतये मीमांसा प्रोवाच, प्रजापतिरिन्द्राय, इन्द्र आदित्याय, आदित्यो वसिष्ठाय, वसिष्ठात् पराशरादयः इत्यपि दृश्यते।

## 8. मीमांसादर्शने मुख्यानां ग्रन्थानां परम्परा

तत्र प्रथमं जैमिनिमहर्षिसूत्राणि। ततः उपवर्षाचार्यकृता वृत्तिः। ततः श्रीशबरस्वामिकृतं भाष्यम्। ततः तद्विवरणं श्लोकवार्त्तिकम्। तन्त्रवार्त्तिकम्।

टुप्टीकाभिधं च श्रीकुमारिलभटटसम्पादितम्। तदनु विधिविवेकः मण्डनमिश्रकृतः। ततः न्यायसुधा, तन्त्रवार्त्तिकव्याख्या भट्टसोमेश्वरविरचिता। ततः न्यायरत्नाकर, शास्त्रदीपिका, न्यायरत्नमाला च श्रीपार्थसारथिमिश्रकृता। अथ शङ्करमिश्रविरचित शास्त्रदीपिकाप्रकाश, बालप्रकाशौ। अनन्तरं तत्सूनुविरचितः भाट्टालङ्कारः। ततः सविस्तरन्यायमाला श्रीविद्यारण्यस्वामिसम्पादिता। ततः विधिरसायनं श्रीमदप्पय्यदीक्षितसङ्गृहीतम्। ततः भाट्टदीपिका श्रीखण्डदेवकृतिः। ततः तद्व्याख्या प्रभावली, तद्व्याख्या श्रीशम्भुभट्टमूला, इति सङ्ग्रहेण केषांचन ग्रन्थानां निरूपणम्। एवमेव भाट्टदिनकर, भाट्टचिन्तामणि, भाट्टकौस्तुभ, तन्त्ररत्नव्याख्या, वार्त्तिकव्याख्यान्तराणि, अन्यानि पुस्तकानि। भाट्टमतानुसारेण मीमांसा सम्बन्धीनि बहूनि वर्तन्ते।

### 9. शास्त्रप्रवर्तकाः

1. शबराचार्याः

एते मीमांसाभाष्यकाराः। इदं शाबरभाष्यं सहस्राधिकरणद्वादशलक्षण्याः मीमांसयाः वर्तते। भाष्य लक्षणं च –

“सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥” इति ।

तदुपरि परस्थानद्वयं प्राभाकरं भाट्टञ्चेति। सङ्कर्षणकाण्डात्मकचतुर्लक्षण्यामपि शाबरभाष्यमासीदिति, सम्प्रति नोपलभ्यन्ते इति पण्डिताः वदन्ति। श्रीशबरस्वामी काश्मीरकः दीपस्वामिनां पुत्र इति साम्प्रदायिकानां अभिप्रायः। शबरस्वामिनां प्रति श्लोकमेकं श्रूयते –

“ब्राह्मण्यामभवद्वराहमिहिरः ज्योतिर्विदामग्रणी
राजाभर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत्।
वैश्यायां हरिचन्द्रवैद्यतिलकः जातश्च शङ्कुः कृती

शूद्रायाममरः षडेव हि शबरस्वामिद्विजस्यात्मजाः॥”

श्लोकमिदं निर्मूलमिति केचिद्वदन्ति।

2. कुमारिलभट्टपादाः

शाबरभाष्ये वार्त्तिकं प्रणीतमेभिः। एतन्नाममाहत्म्येनैव भाट्टप्रस्थानं, भाट्टमतमिति प्रसिद्धः प्रवादः। मीमांसासम्प्रदायप्रवर्तक आचार्येषु मुख्याः एते। एभिः श्लोकवार्त्तिकं, तन्त्रवार्त्तिकं, टुप्टीका चेति वार्त्तिकत्रयं प्रणीतम्। वार्त्तिकं नाम –

“उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।

तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा मनीषिणः॥” इति।

कुमारिलभट्टकृतं वार्त्तिकं प्रथमपादे श्लोकवार्त्तिकं नाम। तत्र श्लोकाः अष्टाचत्वारिंशदुत्तर अष्टशतोत्तरत्रिसाहस्रम् (3848)। ततः निवीतान्तं (तृतीयाध्यायतृतीयपादान्तम्) तन्त्रवार्त्तिकम्। तदग्रे टुप्टीका इति नाम्ना तद्वार्त्तिकं प्रसिद्धम्। नीवीतोत्तरवार्त्तिकस्य च अनुष्टुप्छन्दोवत् अतिसङ्क्षिप्ताक्षरतया तादृशार्थसूचक अनुष्टुप्टीकेति नाम वदन्तः जनाः अनुष्टुप्टीकेति नाम्नोऽपि संक्षिप्ताक्षरतां सम्पादयितुमिव टुप्टीकेति व्यवहर्तुं प्रारप्स्यते इति केचिद्विद्वांसः। अन्ये तु टुप् इति अल्पार्थे अव्ययम्। टुप् इति टीका टुप्टीकेति वदन्तीत्येवं सम्प्रदायतः अवगम्यते इति भावयन्ति। तस्यास्य कुमारिलभट्टस्य मतं अनुसृत्यैव पार्थसारथिना शास्त्रदीपिका विरचिता – “कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम्” इति ग्रन्थारम्भे स्वयमेवोक्तत्वात्।

सोऽयं कुमारिलभट्टः वेदोदित अग्निहोत्रादिकर्मविरोधिसुगतादिमतं समुच्छेदार्थं मानवरूपेण अग्निभूः गृहदेव एव आविरभूदिति कवयः मन्यन्ते, वर्णयन्ति च तदनुगुणां कुमारिलशब्दव्युत्पत्तिम्। कौ – पृथिव्यां, मारयन्ति – दुष्टान् समुच्छिनत्तीति कुमारो गुहदोवः सः गुहदेवः स्वाभिन्नतया विद्यते अस्येति कुमारिलः।

पिच्छादेः आकृतगणत्वादिलच् – कुमारावतार इति यावत्। अत्रार्थे सुप्रसिद्धः अयं साम्प्रदायिकः श्लोकः।

"इत्यूचिवांसमथभट्टकुमारिलं तं
ईषद्विकस्वरमुखाम्बुजमाह मौनी ।
शृत्यर्थकर्मविमुखान् सुगतान्निहन्तुं
जातं गृहं भुवि भवन्तमहं नु जाने ॥" इति।

श्री जैमनिमहर्षि, शबरस्वामि, कुमारिलभट्टानां मनसि, त्रिवेणीसङ्गम इव अयं त्रिवाणीसङ्गमः। तत्र अवगाहनमात्रेण धर्मं समग्रं प्रकटीकरोति।

3. पार्थसारथिः

यज्ञात्मसूनुः वाचस्पतिमिश्रसमकालिकः अयं महापण्डितः, न्यायरत्नाकरः, श्लोकवार्त्तिकस्य टीका, तन्त्ररत्नं, टुप्टीकायाष्टीका, न्यायरत्नमाला च अनेकप्रकरणात्मकग्रन्थः, विशेषतः प्राभाकरमतखण्डनपरः, शास्त्रदीपिका, द्वादशलक्षणी इत्यादयो ग्रन्थाः प्रणीताः एतैराचार्यैः।

4. अप्पय्यदीक्षिताः

रङ्गराजदीक्षितपुत्राः, सुगृहीतनामानः, एतत्प्रणीतः उपक्रमपराक्रमः, विधिरसायनं च स्वकीयश्लोकव्याख्यानरूपं सुप्रसिद्धम् अस्मिन् तन्त्रे। अनेकेषु शास्त्रेषु सुप्रसिद्धा एते। मीमांसायां मुख्येषु प्रवर्तकेषु अन्यतमा एते इति पूज्यन्ते विद्वद्भिः।

5. खण्डदेवः

एते नव्यमीमांसकाः, जगन्नाथपण्डितराजपितुः मीमांसायां गुरवः रुद्रदेवस्य पुत्राः, दिवाकरभट्टपुत्र विश्वेश्वरापरपर्याय गागाभट्टस्यशिष्याश्च। अन्ते सन्न्यस्य ब्रह्मभूयं गता एते काश्याम्। एतैः मीमांसा कौस्तुभः, भाट्टदीपिका, भाट्टरहस्यं चेति

ग्रन्थत्रयं प्रणीतं मनोज्ञतया। 1647 संवत्सरे आसन् एते। 1722 वर्षे प्रौष्ठपद्यां गुरुवासरे दिवङ्गताः।

6. आपदेवभट्टाः

एते सुप्रसिद्धमीमांसका-, मीमांसान्याप्रकाशकर्तारश्च।

7. वासुदेवदीक्षितः

मीमांसायां एतैः प्रणीता अध्वरमीमांसाकुतूहलवृत्तिः सुप्रसिद्धा। एतैः बहवः श्रौतयागाः अनुष्ठिताः, उल्लिखिताश्च स्वीयग्रन्थेषु।

8. मुरारिमिश्रः

एतत्प्रणीता अङ्गत्वनिरुक्तिः षट्प्रकरणात्मिका नव्यन्यायभाषामयी। तस्याः अयमाद्यश्लोकः।

"नमामि तुलजां स्वीयकुलजाद्यधिदेवताम्।
सर्वाभीष्टफलप्राप्त्यै ब्रह्मादिभिरभिष्टुताम् ॥" इति।

समाप्तिसङ्कल्पश्च – इति श्रीमन्न्यायमीमांसापारावारपारीणमुरारुमिश्रविरचित अङ्गत्वनिरुक्तौ षट्प्रप्रमाणकम् अङ्गत्वनिरूपणम् समाप्तम् इति।

अयं खण्डदेवादपि अर्वाचीनत्वात् अनर्घराघवकाव्यकर्ता न भवतीति पण्डितानां निश्चयः।

**10. मीमांसाविषयः**

अविच्छिन्न श्रीशृङ्गेरीजगद्गुरुपरम्परायां द्वादशतमपीठाधिपैः चतुर्वेदभाष्यकारैः साक्षाच्छङ्करमूर्तिभिः कर्नाटकसिंहासनप्रतिष्ठापनाचार्यैः सर्वतन्त्रस्वतन्त्रेत्यादिसमस्तबिरुदावली-विराजमानैः जगद्गुरु श्रीश्रीश्री

विद्यारण्यमहास्वामिभिः विरचित सविस्तरजैमिनीयन्यायमालायां प्रथमाध्याये ग्रन्थावतरणिकारूपेण सर्वेऽपि मीमांसाविषयः श्लोकैः विशदीकृतः। यथा –

"प्रणम्यपरमात्मानं श्रीविद्यातीर्थरूपिणम्।
जैमिनीयन्यायमाला श्लोकौस्सङ्गृह्यते स्फुटम्॥" इति।

जैमिनिप्रोक्तानि धर्मनिर्णायिकानि अधिकरणानि न्यायाः। ते अस्य ग्रन्थस्य विषयाः। तत्र द्वादशसु अध्यायेषु सर्वे धर्मविषयाः निरूपिताः। द्वादशानामध्यायानां समाहारः द्वादशलक्षणी। लक्षणपदेन अध्याया ग्रह्याः। ते क्रमशः – 1. प्रमाण, 2. भेद, 3. शेषत्व, 4. प्रयुक्ति, 5. क्रम, 6. अधिकार, 7. अतिदेश (सामान्य), 8. विशेषातिदेशः, 9. ऊहः, 10. बाधः, 11. तन्त्रम्, 12. प्रसङ्गाः।

प्रमाणनिरूपके प्रथमेऽध्याये चत्वारः पादाः। तत्र प्रथमे पादे विधिः, द्वितीये अर्थवादः, मन्त्राः, तृतीये स्मृतिः, आचारः, चतुर्थे उद्भित्, चित्रादिनामरूपं प्रमाणं च निरूपितम्।

यागदानादिकर्मभेदनिरूपके द्वितीये अध्याये प्रथमपादे उपोद्घातः, द्वितीये कर्मभेदः, तृतीये रथन्तरादीनां कर्मभेदप्रामाण्यापवादः, चतुर्थे नित्य-काम्यप्रयोगयोः भेदः निरूपितः।

अङ्गत्वप्रतिपादके तृतीयाध्याये सन्ति अष्टौ पादाः। प्रथमे पादे शेषत्व (अङ्गत्व)बोधकानां शृतिलिङ्गानां षण्णां मध्ये शृतिः विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्य-प्रकरणस्थान-समाख्याः। चतुर्थे निवीत-उपवीतत्वादिषु अर्थवादत्व विधित्वादि निर्णयहेतुः, शृत्यादेः परस्परविरोधसद्भावश्च निरूपितः। पञ्चमे प्रतिपत्तिकर्माणि। षष्ठे अनारभ्याधीतानि। सप्तमे प्रयाजादीनि। अष्टमे याजमानानि च निरूपितानि।

क्रत्वर्थपुरुषार्थनिरूपके चतुर्थाध्याये, प्रथमपादे प्रधानप्रयोक्तृत्वम्। द्वितीये अप्रधानप्रयोक्तृत्वम्। तृतीये फलाभावाभावचिन्ता। चतुर्थे राजसूयगतजघन्याङ्ग अक्षद्यूतादिचिन्ता च निरूपिता।

क्रमनिरूपके पञ्चमे अध्याये प्रथमे पादे शृति-अर्थ-पाठ-स्थानमुख्यप्रवृत्तिभिः षट्प्रमाणैः क्रमः निरूपितः। द्वितीये वाजपेययागगतेषु सप्तदशसु पशुषु एकैकधर्मसमापनमित्यादिकर्मविशेषः। तृतीये पञ्चप्रयाजादीनामावर्तनेन ऐकादश्यमित्यादि वृद्धिः, अदाभ्यग्रहचित्रिण्योः अनावृत्तिः इत्यादि वृद्ध्यभावः। चतुर्थे क्रमनियामकानां शृत्यर्थपाठादीनां प्राबल्यदौर्बल्यविचारश्च निरूपितः।

अधिकारनिरूपके षष्ठाध्यायेऽपि सन्ति अष्टौ पादाः। तत्र प्रथमे पादे कर्माधिकारः (अधिकारी), द्वितीये अधिकारिधर्माः, तृतीये द्रव्यस्य प्रतिनिधिरस्ति, देवादीनां नास्ति इत्यादिनिरूपणम्, चतुर्थे पदार्थलोपनम्, पञ्चमे दीक्षा, षष्ठे सत्रनिरूपणम्, सप्तमे देयविचारः, अष्टमे अग्निविचारश्च कृतः।

सामान्यातिदेशनिरूपके सप्तमाध्याये प्रथमपादे प्रत्यक्षवचनातिदेशः, द्वितीये पूर्वोक्तातिदेशस्य शेषः, तृतीये अग्निहोत्रनाम्ना अतिदेशः, चतुर्थे लिङ्गातिदेशश्च निरूपिताः।

विशेषातिदेशनिरूपके अष्टमे अध्याये प्रथमपादे स्पष्टेन लिङ्गेन अतिदेशविषयः, द्वितीये अस्पष्टलिङ्गातिदेशः, तृतीये प्रबललिङ्गातिदेशः, चतुर्थे दर्वीहोमातिदेशश्च निरूपिताः।

ऊहनिरूपके नवमे अध्याये प्रथमपादे ऊहविचारप्राम्भः, द्वितीये सपरिकरः सामोहः, तृतीये मन्त्राणां ऊहः, चतुर्थे तत्प्रसङ्गापादितः ऊहश्च विचारिताः।

बाधनिरूपके दशमाध्यायेऽपि सन्ति अष्टौ पादाः। प्रथमे पादे बाधहेतुः द्वारलोपः, द्वितीये द्वरलोपस्यविस्तारः, तृतीये बाधकारणं कार्यैकत्वम्, चतुर्थे समुच्चयः, पञ्चमे ग्रहादिविचारः, षष्ठे बाधप्रसङ्गागतः सामविचारः, सप्तमे प्रकीर्णविचारः, अष्टमे नञर्थविचारश्च बाधोपयुक्तः विचारितः।

तन्त्रनिरूपके एकादशाध्याये प्रथमपादे तन्त्रोपोद्घातः, द्वितीये तन्त्र आवापौ, तृतीये तन्त्रविस्तृतिः, चतुर्थे आवापविस्तृतिश्च निरूपिताः।

प्रसङ्गनिरूपके द्वादशाध्याये प्रथमे पादे पशुधर्माणां सौमिकवेदेश्च प्रसङ्गः, द्वितीये सवनीयपशोः प्रसङ्गः, तृतीये समुच्चयः, तदपवादप्रसङ्गः, चतुर्थे विकल्पप्रसङ्गश्च निरूपितः।

एवं रीत्या द्वादशाध्यागतेषु षष्टिसंख्याकेषु पादेषु धर्म एव निरूपितः। स च वैदिको धर्मः अधिकारानुसारेण सर्वैः आस्तिकजनैः आचरणीयः रक्षणीयः पालनीयश्च। तेनैव सर्वेषां लोकानां ऐहिकामुष्मिकश्रेयःप्राप्तिः, चित्तशुद्धिः, ज्ञानप्राप्तिः तद्वारा मोक्षसाम्राज्प्राप्तिरिति परम्परया मीमांसाशास्त्रं ब्रह्मानन्दप्रदायकमिति विज्ञापयन् उभयेषां जगद्गुरूणां चरणारविन्देषु पुनः पुनः साष्टाङ्गप्रणामान् व्याहरन् विरमामि।

*********

# दर्शपूर्णमासविचारः

**आचार्यः सुब्राय वि भट्टः**
मीमांसाविभागाध्यक्षः

समस्तस्यापि मनुकुलस्य सुखसाधनं भवति धर्मः । स च धर्मः अतीन्द्रियः वेदैकसमधिगम्यः यागादिरूपः । तदुक्तं कुमारिलभट्टपादैः –

**श्रेयः साधनता ह्येषां नित्यं वेदात् प्रतीयते । तादूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः** ॥ (श्लो. वा.चो.सू-14) " **धर्मेण पापमपनुदति , धर्मे सर्वं प्रतिष्ठितम्** " (म.ना) इत्यादिना धर्मस्य पापनाशकत्वं जगदुत्पत्तिस्थितिकारणत्वञ्च प्रतिपादितं श्रुत्या । वेदबोधितः श्रेयस्साधनताकः स च धर्मः दर्शपूर्णमासज्योतिष्टोमादिरूपः । दर्शपूर्णमासयागादीनां वेदबोधितत्वात् श्रेयस्साधनत्वात् च धर्मत्वम् । तत्र प्रमाणन्तु – **दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत** इत्यादीनि श्रुतिवाक्यानि ।

दशपूर्णमासशब्दः लोके ज्योतिश्शास्त्रे च कालपरत्वेन प्रसिद्धः । कथं तयोः यज्ञपरत्वमिति जिज्ञासायां – श्रुतिवाक्ये पठितः दशपूर्णमासशब्दः यागपरः यजातिपदसामानाधिकरण्यात् ।

अयं विचारः विमृष्टः **भगवता आपस्तम्बेन** स्वकल्पसूत्रे –**"अथातो दर्शपूर्णमासौ व्याख्यास्यामः"** इत्यनेन सूत्रेण । अथेत्युपोद्घातः । यज्ञं व्याख्यास्यामः इति परिभाषायां यज्ञजातिशब्देन सप्त पाकयज्ञसंस्थाः सप्त हविर्यज्ञसंस्थाः सप्त सोमसंस्थाः चेत्येवम् एकविंशतिसंस्थस्य यज्ञस्य व्याख्या प्रतिज्ञाता ।

यद्यपि आधानेष्ट्यनन्तरमेव दर्शपूर्णमासयोरनुष्ठानं, तथापि

आधानेष्टीनामपि दर्शपूर्णमासप्रकृतित्वात् आधानादपि पूर्वं दर्शपूर्णमासव्याख्या क्रियते । अथ, अतः, दर्शपूर्णमासौ वि आख्यास्यामः इति पञ्चपदघटितमिदमधिकरणम् ।

अथशब्दः मङ्गलार्थः ।"**मङ्गलादीनि हि शास्त्राणि प्रथन्ते । अध्येतारः श्रोतारश्चायुष्मन्तो भवन्ति "** इति श्रुतेः । आनन्तर्यार्थो वा लोकवेदवत् । संक्षेपतो यज्ञो व्याख्यातः परिभाषायाम् । विस्तरेण दर्शपूर्णमासावनन्तरं व्याख्यास्येते । "अतः" शब्दो हेत्वर्थः। यस्मात् दर्शपूर्णमासौ अव्याख्यातौ अशक्यौ प्रयोक्तुम् । अक्रियायाञ्च दोषः अतः उच्यते ।

**"दर्शः"** दृश्यते यस्मिन् क्षणे सूर्येण सङ्गतश्चन्द्रमाः सिद्धैः सः क्षणो दर्शः। तद्योगादहोरात्रम् । तत्कालवर्तित्वात् प्रधानसमुदायः । आग्नेयादयः षड्यागाः । **"पूर्णमासः"** मास इति चन्द्रमस आख्या । मासानां मानात् । स पूर्यते यस्मिन् क्षणे सः क्षणः पूर्णमासः तद्योगादहोरात्रम् । तत्कालवर्तित्वात् प्रधानसमुदायः। दर्शश्च पूर्णमासश्च दर्शपूर्णमासौ इति पदविग्रहः । अल्पाच्तरं पूर्वं निपतति इति वचनात् पश्चात्प्रयोगिणोऽपि दर्शस्य पूर्वनिपातः समासे ।

कथं दर्शस्य पश्चात्प्रयोगः? इति चेत् सारस्वतहोमब्राह्मणे **" यत्पौर्णमासीं पूर्वमालभेत प्रतिलोममेनावालभेत "** इति पौर्णमास्याः प्रथमप्रयोगं सिद्धवदनूद्य प्रतिलोम्यमाशङ्क्य सारस्वतहोमाभ्यां प्रतिलोम्यपरिहारात् पूर्णमासस्य प्रथमप्रयोगः। सूत्रकारेणापि अमावास्याधाने दर्शारम्भमनुक्त्वा पूर्णमास्याधाने पौर्णमास्येष्ट्यारम्भः उक्तः ।

विशब्दः विस्तारार्थः । ये तु अधिकविधयः शाखान्तरस्थाः ते अपि कथ्यन्ते। आङ् बलवदर्थे , श्रुत्यर्थसंशयकारणैः बलवद्भिरुपपाद्य विधिं वक्ष्यामः इति। व्याख्यास्याम इति चक्षिङो व्यक्तवागभिधायिनः ख्याञादेशोऽयम् । तथा च अथ –

परिभाषानन्तरं यस्मात् दर्शपूर्णमासावन्तरेण सकलं श्रौतं न प्राप्यते अतः व्याख्यास्यामः इति सूत्रार्थः । अथ मन्त्रब्राह्मणयोः व्याख्यातत्वात् दर्शपूर्णमासयोः अनर्थकः सूत्रकारयत्नः इति । तन्न, दुर्ज्ञातत्वात् श्रुत्यर्थस्य अद्यतनैः अधिकविध्युपसंहारस्य च । अतो नानर्थक इति ।

श्रौतः दर्शपूर्णमासशब्दः कर्मपर इति सिद्धे तद्यागस्वरूपादिविचाराः चिन्तिताः। धर्मविचारार्थं प्रवृत्तेन भगवता जैमिनिना पूर्वमीमांसायां द्वादशलक्षण्याः द्वितीयाध्यायस्य द्वितीयपादे तृतीयाधिकरणे ।

तस्मिन् पौर्णमास्याधिकरणे – दर्शपूर्णमासप्रकरणश्रुतं **" य एवं विद्वान् पौर्णमासीं यजते "** **" य एवं विद्वानमावास्यां यजते "** इति वाक्यद्वयं विषयीकृत्य विचारः प्रवृत्तः ।

**"प्रकरणं तु पौर्णमास्यां रूपावचनात्"** इत्यारभ्य **"लिङ्गदर्शनाच्च"** इत्येवमन्तं सिद्धान्तबोधकषट्सूत्रघटितम् इदमधिकरणम् । उत्सर्गापवादाभ्यां श्रुत्यादिषट्प्रमाणकभावनाभेदनिरूपणमध्यायार्थः । अस्मिन्नधिकरणे अभ्यासापवादः निरूप्यते इति अध्यायसङ्गतिः । प्रकरणान्तरव्यतिरिक्तशब्दान्तरादिभेदकप्रमाणनिरूपणं पादार्थः । अभ्यासप्रमाणस्य अपवादः अत्र निरूप्यते इति पादसङ्गतिः । अधिकरणसङ्गतिस्तु आपवादिकी । पूर्वाधिकरणे **"समिधो यजति"** इत्यादिप्रयाजविधिवाक्येषु अभ्यासात्कर्मभेदः सिद्धान्तितः । अत्र विद्वद्वाक्ययोः समुदायानुवादकत्वं सिद्धान्तितमिति अभ्यासापवादसिद्धान्तात् आपवादिकी सङ्गतिः । एतद्विद्वद्वाक्यद्वयं कर्मविधायकमुत समुदायानुवादकमिति सन्देहः। इदं च विद्वद्वाक्यद्वयं दर्श-पूर्णमास कालविहिताग्नेयादिसमुदायद्वयानुवादकमिति सिद्धान्तः। तदुपरि शङ्कते 'यजते' इति श्रूयमाणं पदं लेट्लकारः । अतः अयं विधिरिति यावत् इति चेत् - यजते

इत्यस्य वर्तमानापदेशत्वेन विधित्वं नास्ति । अप्राप्तार्थकत्वे विधित्वं निश्चेतुं शक्यते। प्रकृते आग्नेयादियागानां प्राप्तानामेव यजिना अनुवादसम्भवेन अप्राप्तार्थत्वं नास्ति। अतः अनुवादकत्वेन न विधित्वम् ।

वाक्ये यच्छब्दैवंशब्दयोः समभिव्याहारात् विधिप्रतिबन्धकत्वमिति चेत्- क्रियाविशेषितकर्तृसमानाधिकरणस्य यच्छब्दस्य क्रियाविशेषपरामर्शस्य एवं शब्दस्य च **"य एवं विद्वानिति"** समभिव्याहृतविद्वत्पदार्थवेदनक्रियाविधिप्रतिबन्धकत्वं न तु यागक्रियाविधिप्रतिबन्धकत्वम् इति चेत् – यच्छब्दस्य तच्छब्दसमभिव्याहारावधिक समभिव्याहृतमात्रवृत्तिविधिप्रतिबन्धकत्वनियमादत्र यागक्रियाविधिप्रतिबन्धकत्वम-स्त्येव।

किञ्च यच्छब्दस्य प्राप्तिद्योतकत्वेन यदि प्रमाणान्तरेण विशेषणस्य विशेष्यस्य विशिष्टस्य वा प्राप्तिः न भवेत् ततः अगत्या विधिरङ्गीक्रियते । अतश्च यच्छब्दोपबन्धात् न विधित्वम् । तदुपरि आक्षिप्यते यदि विद्वद्वाक्याभ्यां यागः विधीयते द्रव्यदेवतयोः प्राप्तिः कथं ? इति यागस्य द्वे रूपे द्रव्यं देवता च । तथा च द्रव्यदेवतयोरभावे कथं यागः सम्पद्यते? इति चेत् – तदुक्तं वार्तिके –

**ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी ।**
**रूपवन्तौ ततो यागौ विधीयेते पृथक्तया ॥** इति(त.वा-२.२.३)

वार्त्रघ्नी पौर्णमास्यामनूच्येते , वृधन्वती अमावास्यायाम् इति वचनेन आज्यभागक्रमाम्नातानामपि मन्त्राणां क्रमं बाधित्वा विद्वद्वाक्यविहितकर्माङ्गत्वेन विधानात् मान्त्रवर्णिकी देवता । ततश्च विद्वद्वाक्यविहितकर्मोद्देशेन मन्त्रविधानात् मान्त्रवर्णिकदेवताप्राप्तिः । क्रमापेक्षया वचनस्य प्रबलत्वेन वचनेन दुर्बलक्रमं बाधित्वा अत्रैव मन्त्रविनियोगः संभवति अतश्च मान्त्रवर्णिकाग्नीषोमदेवतायाः प्राप्तिः।

एवं **"सर्वस्मै वा एतद्यज्ञाय गृह्येत यद्ध्रुवायामाज्यम्"** इति ध्रौवाज्यस्य साधारणत्वं श्रुतम् ।अतश्च ध्रवापात्रस्थाज्यस्य द्रव्यत्वात् आभ्यां द्रव्यदेवताभ्याम् रूपवत्वात् यागान्तरमत्र विधीयते ।

वार्त्रघ्नीवृधन्वतीमन्त्राणां अव्यवस्थया लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वेन प्राप्तानां व्यवस्थापेक्षत्वेन अपेक्षितव्यवस्थाविधायकत्वे लाघवात् न अनपेक्षितमन्त्रविधायकत्वं युक्तम्। तथा सत्यपूर्वविधित्वापत्या गौरवापत्तेः । तस्मात् आभ्यां वचनाभ्यां मन्त्रप्राप्त्या न मान्त्रवार्णिकदेवताप्राप्तिः । अतः न देवताप्राप्तिः । अतः रूपाभावात् अनयोः विद्वद्वाक्ययोः न कर्मविधायकत्वम् ।

ननु क्रमापेक्षया वचनस्य प्रबलत्वेन, वचनेन दुर्बलक्रमं बाधित्वा अत्रैव मन्त्रविनियोगः संभवति इति चेत् – ब्राह्मणवाक्येन तयोर्बाधः भवितुमर्हति तथापि **"अबाधेनाऽप्युपपत्तौ बाधायोगात्"** अत्र स्वरसत एव अन्वयसंभवे बाधो न युक्तः ।

किञ्च ब्राह्मणवाक्यमपि स्वरसेनाऽऽज्यभागपरतामेव मन्त्रस्याऽवगमयति। अन्यथा पौर्णमास्यमावास्याप्रातिपदिकयोः कर्मपरत्वे लक्षणापत्तेः । सप्तम्याः प्राधान्यलक्षकत्वापत्तेश्च । अपूर्वविधित्वाङ्गिकारे अश्रुतदेवताविधिकल्पने अश्रुतयाज्यान्तरकल्पने आज्यभागयोश्च अश्रुतानुवाक्याक्ल्पने च गौरवापत्तेश्च । अतो मन्त्रचतुष्टयस्याऽप्याज्यभागाङ्गतया अनियमेन प्राप्तस्य नियममात्रं विधिवाक्येन क्रियते , लाघवात् ।

ननु अनयोः वाक्ययोः कर्मविधायकत्वम् **।' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत**' इति फलवाक्येन प्रयाजादिसाधारण्येन सर्वेषामाग्नेयादीनामेतद्वाक्य-विहितकर्मणोश्च फलसम्बन्धः। राजसूयन्यायेन नाम्नः सङ्कोचकत्वानुपपत्तेः प्रकरणात् सर्वेषामेव यागानां फलसंबन्धः न तु षण्णामेवाग्नेयादीनामिति चेत् – यदि सर्वेषां फलसम्बन्धः तदा सर्वेषां समप्राधान्यं स्यात् । ततः विकृतौ सौर्ये **" प्रयाजे**

**प्रयाजे कृष्णलं जुहोति** ” इत्यनेन प्रयाजानुवादेन कृष्णलरूपविशेषविधिः नोपपद्यते। यदि तु विद्वद्वाक्यविहितकर्मणोरेव प्राधान्यं ततः आग्नेयादीनामङ्गत्वेऽपि सौर्यस्य ऑषधद्रव्यकत्त्वे आग्नेयविकृतित्वात् तद्धर्माणामवघातादीनाम् अतिदेशेऽपि प्रयाजादीनाम् अनङ्गत्वेन आग्नेयादिसमत्त्वात् सौर्यादिष्वप्राप्तेः प्रयाजानुवादेन कृष्णलविधेरनुपपत्तिः स्यात् । अतः नैतौ कर्मान्तरविधी । किन्तु समुदायद्वयानुवादकौ एतौ । तर्हि सर्वस्य वाक्यस्यानुवादकत्वे अनधिगतार्थगन्तृत्वरूपप्रामाण्यानापत्तिः।शक्यार्थानुवादकत्वेऽपि अनधिगत-समुदायादिबोधकत्वेन प्रामाण्यमुपपद्यते इति मन्त्राधिकरणे निरूपितमिति न दोषः।

एवञ्च रूपराहित्यात् विद्वद्वाक्यद्वयं कर्मान्तरविधायकं न भवति किन्तु पूर्वप्रकृतेष्वाग्नेयादिषु षट्सु त्रिकरूपौ द्वौ समुदायौ अनुवदति। कालवाचिभ्यां पौर्णमास्यमावास्यशब्दाभ्यां यागानुवादानुपपत्तिः इति चेत् तत्तत्कालविहितयोः यागत्रिकयोः उपलक्षितत्त्वात्। अनुवादस्य प्रयोजनं तु समुदायसिद्धिः। तत्सिद्धौ च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति फलवाक्ये षड्यागविवक्षया द्विवचननिर्देशः उपपद्यते। अनुवादपक्षे पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाम् अमावास्यया यजेत इति वाक्यवैयर्थ्यम् इति तन्न, कालविधानसम्भवेऽपि एकैकस्य त्रिकस्य सहप्रयोगविधानात् सार्थक्यम्। आग्नेयोपांशुयाजाग्नीषोमीयाणां त्रयाणां पौर्णमासीकालविहितानां सहप्रयोगः पौर्णमास्या इत्यनेन तृतीयैकवचनान्तेन विधीयते। एवम् अमावास्या वाक्येन अमावस्या कालविहितानाम् आग्नेयसान्नय्ययागानां सहप्रयोगः विधीयते। एवमेव **उग्राणि ह वा एतानि हवींषि अमावास्यायां संभ्रियन्ते आग्नेयं प्रथमम् ऐन्द्रमुत्तरे** इति वाक्यशेषे त्रयाणामेव उग्रत्त्वापरपर्यायप्राधान्यव्यपदेशादपि विद्वद्वाक्यद्वयस्य न विधायकत्वम्।

विद्वद्वाक्याभ्यां समुदायद्वयानुवादकत्वेन दर्शपूर्णमासकालविहितानां त्रयाणां त्रयाणां यागानां समुदायद्वयरूपप्रयोगद्वयं सिध्यति। एवमनङ्गीकारे तु,

आग्नेयादिवाक्येषु, कालविधानात् कालस्य प्रयोगान्वयिगुणत्वेन कालयुक्ताग्नेयादीनां पूर्वान्तराङ्गसाहित्येन प्रत्येकमेव प्रयोगसिध्या षट्प्रयोगविधयो भवेयुः ।

लिङ्गदर्शनविरोधादपि न विद्वद्वाक्यद्वयस्य कर्मविधायकत्वम् । तथा हि- **"चतुर्दशपौर्णमास्यामाहुतयो हूयन्ते , त्रयोदश अमावास्यायाम्"** इति वचनेन आहवनीयाधिकरणकवषट्काराहुतीनां पौर्णमास्यां चतुर्दशत्वम् अमावास्यायाञ्च त्रयोदशत्वं प्रतिपादितम् । यथा - पञ्च प्रयाजाः, त्रयोऽनुयाजा:, द्वौ आज्यभागौ, प्रधानयागत्रयम्, एकं स्विष्टकृदिति पौर्णमास्यां चतुर्दशाहुतय:। अमावास्यायां तु दधिपयसो: सम्प्रतिपन्नदेवताकत्वेन सहप्रक्षेपात् त्रयोदशत्वम्। विद्वद्वाक्याभ्यां यागविधायकत्वे एवं सङ्ख्यानिर्देशरूपं लिङ्गं बध्यते। आभ्यां समुदायानुवादकत्वे दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति फलवाक्ये श्रुतं द्वित्वमुपपद्यते। समुदायानुवादप्रयोजनञ्च तन्त्रेण यजिना अनेकोपादानात् समुदायद्वयसिद्धि:। तस्यापि प्रयोजनं फलवाक्ये आग्नेयादिषण्णामेवफलसम्बन्धसिद्धि:। प्रातिपदिकस्य षट्सु कालयोगेन प्रसिद्धत्वात् । द्विवचनस्य स्वशक्याश्रयसमुदायघटक-समुदायिवृत्तित्वसम्बन्धेन बहुत्वलक्षणातात्पर्यग्राहकमेव च शक्यसम्बन्धघटकसमुदायसिद्धिद्वारा विद्वद्वाक्यद्वयम्। समुदायानुवादकत्वाभावे आग्नेयद्वयस्यैव कालयोगेन द्वित्वावगमेन फलवाक्यस्थयजिना तयोरनुवादात् तयोरेव फलसम्बन्ध: स्यात्। तदा च " फलवत्सन्निधौ अफलं तदङ्गमिति" न्यायेन अन्येषां चतुर्णां प्रधानानामपि तदन्गत्वं स्यात्। समुदायानुवादकत्वे षण्णामाग्नेयादीनामधिकारवाक्यश्रुत: फलसम्बन्ध: सिध्यतीति सिद्धान्त:।

॥इति शम्॥

**********

ISSN: 2249-538X 

# काम्यकर्मणां भूयोभ्यासाधिकरणम्

डा. सूर्यनारायणभट्टः

**कर्मण्यारम्भभाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः** इत्यनेने सूत्रेण इदमधिकरणं समारभ्यते ।

काम्यानां कर्माणां भूयो भूयः फलकामनायां पुनः पुनः आवृत्तिः उत न इति विचारःपुनः पुनः आवृत्तिरिति सिद्धान्तः। एकं फलं दत्वा कर्म नश्यति निवृत्तं भवति । पुनः तदेव फलम् अपेक्षितं चेत् काम्यस्य कर्मणः पुनरावृत्तिः कारणीयेति सिद्धान्तः ।

परमत्र पूर्वपक्षी इत्थमाह – सकृदनुष्ठितं कर्मैव भूयो भूयः फलकामनायां तावत्तिष्ठति पुनः पुनः अनुष्ठानं कर्मणः नावश्यकम्। दर्शपूर्णमासादावेव विचारः कर्तुं शक्यते । दर्शपूर्णमासौ स्वर्गोद्देशेन अनुष्ठीयेते । स्वर्गोद्देशेन सकृत् दर्शपूर्णमासानुष्ठानं कृतं तेन एकवारं स्वर्गस्तु भविष्यति । पुनः स्वर्गकामना तु वर्तते मया पुनः स्वर्गः प्राप्तव्य इति । तर्हि अस्यां दशायां पुनः स्वर्गप्राप्तये तादृशदर्शपूर्णमासानुष्ठानं न कर्तव्यम् । पूर्वं कृतमेव कर्म तिष्ठति । ननु सकृदेवानुष्ठितं पुनः पुनः कथं स्वर्गं जनयेत् इति चेत् - यतो हि कर्मणः क्षणिकत्वात् कर्मजन्यापूर्वस्य फलजनकत्वं स्वीकृतम्, तदपूर्वन्तु फलप्राप्तिपर्यन्तमेव तिष्ठति फलप्राप्तेरनन्तरं नश्यति नष्टं सत् कथं पुनः फलं जनयतीति न हि केवलं कामनामात्रेण फलं तु न लप्स्यते इति शङ्कायां –

यद। तु कृतस्य कर्मणः फलमेव न प्राप्तं ततः पूर्वमेव पुनः फलाकांक्षा, तदा यदपूर्वं वर्तते यच्च फलं जनयिष्यति तदपूर्वमेव फलान्तरमपि जनयिष्यति इति उपपद्यते – अपि च एकमपूर्वं एकमेव फलं जनयतीति न किञ्चित् नियामकं वर्तते ।

यदि तथा नियमः नाङ्गीक्रियते तर्हि फलधारापत्तिः स्यादिति चेत् प्रतिबन्धकवशात् फलधारापत्तिः स्वीकर्तुं न शक्यते ।

अस्योपरि सिद्धान्तपक्षतः आक्षेप: - फलधारापत्तिनिवारणार्थं प्रतिबन्धकं किञ्चित् कल्प्यते - मया तु एकमपूर्वं एकं फलमुत्पाद्य नङ्क्षतीति नियमः स्वीक्रियते अतः विशेषः कोऽपि नास्ति इति चेत् - नियमः कल्पनीयः इति नियमः नास्ति परन्तु प्रतिबन्धकं तु अवश्यं कल्पनीयं भवति यतो हि यदा अपूर्वं जायते तदुत्तरक्षणे स्वर्गः कुतो न जायते? प्रतिबन्धकवशदित्येव वक्तव्यम् । अतः उभयोरपि मते प्रतिबन्धकं कल्पनीयमिति अविशेषतः प्रतिबन्धकवशात् फलधारापत्तिः नास्तीति स्वीकारे न दोषः न च नियमः।

ननु एकेन अपूर्वेण यदा फलव्यक्तिः जायते तदा इदमपूर्वं नश्यति कारणाभवात् द्वितीया फलव्यक्तिः कथं जायते इति न शङ्कनीयम् । **क्षीयन्ते चास्य कर्माणि, ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन** इत्यादि श्रुतिस्मृतिभिः तत्त्वज्ञानस्यैव तन्नाशकत्वेन फलस्य तन्नाशकत्वं नास्त्येव । अतः फलं अपूर्वस्य नाशकमित्यत्र प्रमाणं नास्ति । अतः सकृत् फलोत्पत्या किमर्थं अपूर्वस्थ नाशः तत्तु तिष्ठत्येव । यदि फलैकनाश्यत्वमङ्गीक्रियते तदा पश्वर्थं प्रयाजाः अनुष्ठिताः तत्र प्रयाजजन्यानि अपूर्वाणि सन्ति – पशूपकारजननं तस्य उद्देश्यम् । परं प्रसङ्गात् पशुपुरोडाशयागस्यापि सिद्धिः अङ्गीक्रियते । यदि पशूपकारं जनयित्वा अपूर्वाणि नश्यन्तीति स्वीकारे प्रसङ्गसिद्धिः बाध्येत वैपरीत्यं च स्यात् । अतः फलं जनायित्वा अपूर्वं नश्यतीति वक्तुं न शक्यते । अतः फलोत्पत्यनन्तरमपि अपूर्वस्य सत्वात् फलान्तरकामनायां सत्यां तेनैव अपूर्वेण फलान्तरं जायत इत्यत्र न किञ्चित् बाधकम् - अथवा अपूर्वं मध्ये प्रकल्प्य तस्य कथं नाशः इत्यादिविचारः कृतः, तदपेक्षया अपूर्वमेव न कल्प्यते येन यागः कृतः तस्य फलं यागात् आत्मनः फलम् ।

अर्थात् यागः फलं जनयतीति न, यः यागमनुष्ठितवान् तस्य फलं भवतीति एकस्मिन् जन्मनि सकृदेव काम्यं कर्म इति प्राप्ते -

कथ्यते यागतः आत्मनः फलमिति वक्तुं न शक्यते यागकरणानन्तरम् अपूर्वमस्वीकृत्य आत्मनः फलमित्युच्यते तर्हि यागात् पूर्वं परं च आत्मा अस्तीतिकृत्वा कोऽपि विशेषः नास्ति अतः यागानुष्ठानं विनापि फलोत्पत्तिः स्यात् । तथा नास्ति यागध्वंसस्य फलजनकत्वं स्वीक्रियते चेत् ध्वंसस्यैव फलजनकत्वमिति अपूर्वाधिकरणसिद्धान्तभङ्गात् अपूर्वमेव अङ्गीकर्तव्यम् अपूर्वं यदा स्वीकृतं तस्य ज्ञानैकनाश्यत्वम् इति न, अन्येनापि नाशः भवितुमर्हति । तथा चेत् पशुयागे आज्यभागयागकरणमेव अनावश्यकम्। यदा प्रसक्तिरेव नास्ति तदा न तौ पशौ करोतीति निषेधश्च कः प्रसङ्गः ? एवमेव पापाचरणात् नरकादिप्राप्तिः सर्वदा भवति -यावत् ज्ञानेन नाशः न भवति तावत्तिष्ठति । अथवा कामनाभावात् नरकं न भवति कामनावशात् स्वर्गः भवति इति चेत् तदपि न, फलकामना फलं प्रति न कारणं, किं तु प्रवृत्तिं प्रत्येव कारणम्। अतः एतादृशाव्यवस्था परिहाराय फलस्य अपूर्वनाशकत्वं स्वीकर्तव्यम् । अतः जीवन्मुक्तिशास्त्रमपि उपपद्यते । जीवन्मुक्तिशास्त्रं यदस्ति ज्ञानोत्तरमपि प्रारब्धकर्मवशात् बहुकालं तेन स्थातव्यं भवति ।यदि ज्ञानैकनाश्यत्वं स्वीक्रियते तर्हि ज्ञानेन सर्वमपि नष्टम् इति तदा प्रारब्धस्यापि अनुवृत्तिः न स्यात्, फलनाश्यत्वे तु उपपद्यते । अतः ज्ञानोत्तरमपि शरीरं ध्रियते व्यवहारश्च क्रियते।

अत्रापि फलं फलमित्युक्ते उद्देश्यभूतमेव फलं स्वीकर्तव्यं न तु आनुषङ्गिकम्। यतो हि स्वर्गोत्पत्तेः पूर्वं स्वर्गभोगार्थं देवशरीरमपेक्षितम् । आनुषङ्गिकफलप्राप्त्यनन्तरम् अपूर्व यदि नश्येत् तर्हि स्वर्गभोग एव न स्यात् । अतः या देवशरीरोत्पत्तिः वर्तते सा उदेश्यभूतं फल न भवति आनुषङ्गिकमेव । अतः प्रयाजैः पशुपुरोडाशस्य उपकारो जनितः परं इदं न उद्देश्यम्। पश्वर्थानुष्ठानानन्तरमेव नश्याति तस्यैव उद्देश्यभूतत्वात्। प्रसङ्गात् आनुषङ्गिकः पशुपुरोडाशस्यापि

उपकारः सिध्यतीति न दोषः ।अतः एकेन कर्मणा उद्देश्यभूतम् एकमेव फलं भूयो भूयः फलकामनायां आवृत्या अनुष्ठानेन सिध्यतीति सिद्धम् । अतः **तेषां ये प्रथमं यजेरन्, तेषां गौरतिरात्रः ,ये द्वितीयं तेषामायुः** इति मन्त्रलिङ्गमप्युपद्यते इति सर्वं सुमङ्गलम्।

**आधारग्रन्थाः**

१. भाट्टदीपिका
२. भाट्टकौस्तुभः
३. जैमिनीयन्यायमाला
४. जैमिनिसूत्रवृत्तिः

**********

# “अथातो धर्मजिज्ञासा ” इति सूत्रार्थविचारः

डा. वेङ्कटेशताताचार्यः

महर्षिणा जैमिनिना प्रणीतस्य पूर्वमीमांसाशास्त्रस्य[1] “अथातो धर्मजिज्ञासे” तीदमाद्यं सूत्रम् । अस्य शाबरभाष्योक्तरीत्या अर्थविचारः प्रस्तूयते ।

अथ, अतः, धर्मजिज्ञासेति त्रीणि पदानि अस्मिन् सूत्रे सन्ति ।[2] “तत्र लोकेऽयमथशब्दो वृत्तादनन्तरस्य प्रक्रियार्थो दृष्ट” इति भाष्येण अथशब्दस्य आनन्तर्यार्थकत्वं लोके प्रसिद्धमिति बोध्यते । वृत्तात् = पूर्ववृत्तात्, अनन्तरस्य = अव्यवहितस्य, प्रक्रियार्थः=आरम्भार्थः इति व्याख्यानेन अथशब्दस्य पूर्ववृत्तानन्तरप्रारम्भकर्मत्वमर्थः, तेन “अतः पूर्ववृत्तानन्तरप्रारम्भकर्मीभूता धर्मजिज्ञासा कर्तव्ये”ति कर्तव्येति पदाध्याहरेण सूत्रार्थो लभ्यते । अत्र अतश्शब्दार्थोऽग्रे विचारयिष्यते । अत्र आनन्तर्यप्रतियोगिभूतं पूर्ववृत्तं किमिति जिज्ञासायां भाष्ये उच्यते – तत्तु वेदाध्ययनमिति । कथं वेदाध्ययनमेव पूर्ववृत्तत्वेन गृह्यत इत्यत्रोक्तम् – तस्मिन् हि सति साऽवकल्पते इति । वेदाध्ययने कृते एव सा (धर्मजिज्ञासा) सम्भवति, अतः तदेव पूर्ववृत्तत्वेन स्वीक्रियत इत्यर्थः । धर्मजिज्ञासा हि यद् धर्मस्य अनुष्ठानौपयिकं निष्कृष्टं ज्ञानं तद्विषयिणी इच्छा । धर्मश्च वेदप्रमाणक इति [3]“चोदनालक्षणोऽर्थो धर्मः” इत्यनेन वक्ष्यते । साङ्गवेदाध्ययनेन आपाततो धर्मज्ञाने सति निष्कृष्टज्ञानविषयिणी इच्छा भवति । न हि सर्वथा अज्ञातेऽर्थे पूर्णतया वा ज्ञातेऽर्थे जिज्ञासा उदेति । किञ्च धर्मजिज्ञासायां जातायां धर्मज्ञानार्थं वेदवाक्यानामेव अनेकविधो विचारः क्रियते । स च विचारः नानधीतवेदेन कर्तुं

---

[1] मीमांसासूत्रम् – १-१-१

[2] शाबरभाष्यम् - १-१-१

[3] मीमांसासूत्रम् – १-१-२

शक्यते । अतः वेदाध्ययने कृते एव धर्मविषयकनिष्कृष्टज्ञानविषयकेच्छारूपधर्मजिज्ञासायाः, तादृशजिज्ञासाप्रयोज्य-विचारस्य च सम्भवात् धर्मजिज्ञासापदार्थसामर्थ्यादेव अथशब्देनोक्तमानन्तर्यं वेदाध्ययनप्रतियोगिकमिति ज्ञायते । एतदेवाभिप्रेत्योक्तम् – [1]"तादृशीं तु धर्मजिज्ञासामधिकृत्याथशब्दं प्रयुक्तवानाचार्यः या वेदाध्ययनमन्तरेण न सम्भवति । कथम्? वेदवाक्यानामनेकविधो विचार इह वर्तिष्यते" इति । धर्मजिज्ञासामुपक्रमे सूत्रयित्वा वेदवाक्यार्थविचारकरणात् सा जिज्ञासा वेदप्रतिपाद्यार्थरूपधर्मविषयिणीति ज्ञायते । तद्विषयिणी च जिज्ञासा तस्य वेदाध्ययनजन्यापातप्रतीतिं विना न सम्भवतीति वेदाध्ययनस्य जिज्ञासापूर्वभावित्वं सिद्धमिति भावः ।

एवं सामर्थ्यादेव जिज्ञासायां वेदाध्ययनोत्तरत्वस्य सिद्धत्वात् न सूत्रकारेण धर्मजिज्ञासायां वेदाध्ययनोत्तरत्वं तदानन्तर्यं च विधीयते । धर्मजिज्ञासायां वेदाध्ययनोत्तरत्वविधाने वेदाध्ययनात् पूर्वं धर्मजिज्ञासायाः प्रतिषेधः फलिष्यति । परन्तु आनन्तर्योत्तरकालिकत्वयोः विधायिन्योः वचनव्यक्त्योः भेदात् "अथातो धर्मजिज्ञासे"ति सूत्रस्य वाक्यभेदः स्यात् । "यस्य कस्यचित् कर्मणोऽनन्तरं क्रियमाणा धर्मजिज्ञासा वेदाध्ययनोत्तरं कार्ये"ति वचनव्यक्त्या आनन्तर्यमनूद्य उत्तरकालिकत्वं विधीयते । "वेदाध्ययनोत्तरं क्रियमाणा धर्मजिज्ञासा वेदाध्ययनानन्तरं कार्ये"ति वचनव्यक्त्या वेदाध्ययनोत्तरत्वमनूद्य वेदाध्ययनानन्तर्यं विधीयते । एवमुभयविधाने शाब्दबोधभेदात् सूत्रस्य आवृत्तिः कार्येति वाक्यभेदः स्पष्टः । अतः आनन्तर्यमेव विधातव्यम् । धर्मजिज्ञासायां वेदाध्ययनोत्तरत्वं तु पूर्वोक्तरीत्या सामर्थ्यादेव प्राप्तत्वात् न विधीयते । आनन्तर्यमपि सूत्रेण न वेदवाक्यवद्विधीयते, सूत्राणां न्यायसिद्धार्थमात्रबोधकत्वेन अपूर्वार्थविधायकत्वाभावात् । किन्तु स्वाध्यायविधिप्राप्तमेव धर्मजिज्ञासायां

[1] शाबरभाष्यम् – १-१-१

वेदाध्ययनानन्तर्यं स्पष्टं बोध्यते । तथाहि – [1]“स्वाध्यायोऽध्येतव्यः” इति स्वाध्यायविधिस्तावत् यागानुष्ठानादिसाधनार्थज्ञानरूपदृष्टप्रयोजनाय स्वाध्यायाध्ययनं विधत्ते । तच्चार्थज्ञानं नाक्षरराशिग्रहणरूपेणाध्ययनमात्रेण सम्भवतीति तादृशार्थज्ञानं प्राप्तुमिच्छा कर्तव्या, अन्यथा अध्ययनस्य पूर्वोक्तप्रयोजनकत्वासम्भवात् । तया च इच्छया अनुष्ठानौपयिकार्थज्ञानप्राप्तये विचारे प्रवृत्तिर्भवतीति विचारशास्त्रारम्भस्य अध्ययनविधिप्रयुक्तत्वमिति सूत्रकाराभिप्रायः । एवञ्च वेदाध्ययनानन्तरं “वेदमधीत्य स्नायादि”ति स्मृत्या गुरुकुलान्निवृत्तिरूपे समावर्तने प्राप्ते सूत्रकारेण “वेदमधीत्य त्वरितेन न समावर्तितव्यम् , किन्तु अध्ययनप्रयोजनीभूतार्थज्ञानाय वेदवाक्यार्थविचारः कर्तव्यः” इति न्यायसिद्धोऽयमर्थः “अथातो धर्मजिज्ञासे”त्यनेन बोधितः । अत्र स्मृतिवाक्ये “स्नायादि”ति पदेन समावर्तनं स्वीक्रियते लक्षणया, समावर्तने विशिष्टस्य स्नानस्य विधानात् ।

ननु वेदाध्ययनानन्तरं गुरुकुले स्थित्वा वेदवाक्यार्थविचारे क्रियमाणे [2]“वेदमधीत्य स्नायादि”ति स्मृतेर्बाधः स्यादिति चेदत्रेमानि समाधानानि उच्यन्ते – प्रथमं तावदिष्टापत्तिः प्रदर्शिता भाष्यकारेण – [3]“अतिक्रमिष्याम इममाम्नायम् , अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकं कल्पयेमे”ति । अयमस्याभिप्रायः – अध्ययनविधिना अनुष्ठानौपयिकार्थज्ञानार्थत्वं वेदाध्ययनस्य बोधितम् । तच्च अध्ययनानन्तरं विचारेऽक्रियमाणे न सम्भवतीति अध्ययनानन्तरं विचारः कर्तव्य इति अध्ययनविधिबलात् लभ्यते । स्मृत्युक्तरीत्या अध्ययनानन्तरं समावर्तने क्रियमाणे अध्ययनविधिरूपश्रुतिलभ्यं विचारस्य अध्ययनानन्तर्यं बाध्यत इति स्नानस्मृतिः श्रुतिविरुद्धा भवति । श्रुतिविरुद्धा च स्मृतिरप्रमाणं भवतीति स्नानस्मृतेर्बाधो न

[1] तैत्तिरीयारण्यकम् – २/१५

[2] आपस्तम्बगृह्यसूत्रम्

[3] शाबरभाष्यम् – १-१-१

दोषायेति ।

द्वितीयं समाधानं तावत् – “अधीत्य स्नायादि”त्यत्र यः त्वाप्रत्ययः सः [1]“समानकर्तृकयोः पूर्वकाले” इति पूर्वकालतायां स्मर्यते न त्वानन्तर्ये । अतः वेदाध्ययनानन्तरं विचारं कृत्वा समावर्तने क्रियमाणेऽपि न स्मृतिबाध इति । स्नायादित्यत्र धातोः समावर्तने लक्षणामस्वीकृत्य स्नानरूपमुख्यार्थबोधकत्वं स्वीकृत्य तृतीयं समाधानमुच्यते – वेदमधीत्य स्नायादिति स्मृत्या यदि वेदाध्ययनानन्तरं स्नानं विधीयते तर्हि तस्य अदृष्टार्थत्वापत्तिः । तदपेक्षया ब्रह्मचारिणो ये अस्नानादिनियमाः कृतास्तेषामवध्यपेक्षायां वेदाध्ययनरूपोऽवधिः अनया स्मृत्या समर्प्यत इति स्वीकुर्मः । एवञ्च स्नानं मधुभक्षणादीनामुपलक्षणम् । वेदमधीत्य स्नानमधुभक्षणादिकं कुर्यादिति स्मृतिवाक्यादर्थः प्रतीयते । परन्तु अस्यार्थस्य रागप्राप्तत्वात् वाक्यस्य लक्षणया वेदाध्ययनपर्यन्तं स्नानमधुभक्षणादिकं न कुर्यादित्यर्थः स्वीक्रियते । अस्य चार्थस्य वेदाध्ययनानन्तरं विचारकरणे नैव विरोधः । तथा च वेदाध्ययनानन्तरं गुरुगृहे स्थित्वा अस्नानादिनियमं विना अर्थविचारं कृत्वा समावर्तनं कुर्यादिति लभ्यते ।

अतश्शब्दो वृत्तस्यापदेशको हेत्वर्थ इत्यतश्शब्दो भाष्ये व्याख्यातः । अतश्शब्दो वृत्तस्यार्थस्य हेतुत्वं बोधयतीति भावः । अत्र च वृत्तः (पूर्वमुक्तः) अर्थः वेदाध्ययनम् , अथशब्देन वेदाध्ययनानन्तर्यस्य उक्तत्वात् । अतः वेदाध्ययनस्य जिज्ञासां प्रति हेतुत्वमतश्शब्देन बोध्यते । तच्च हेतुत्वं त्रिभिः प्रकारैः भवति । तथाहि – वेदाध्ययनम् अनुष्ठानौपयिकार्थज्ञानार्थं विहितं तादृशार्थज्ञानसाधनीभूतविचारमन्तरा व्यर्थं भविष्यतीति तादृशविचारप्रयोजिकां जिज्ञासां प्रयोजयतीति वेदाध्ययनस्य जिज्ञासां प्रति हेतुत्वे प्रथमः प्रकारः । द्वितीयस्तावदेवम् – धर्मजिज्ञासा हि

[1] पाणिनिसूत्रम् – ३/४/२१

धर्मज्ञानविषयिणी इच्छा । सा च विचारद्वारा धर्मज्ञानप्रयोजिका । धर्मस्य च वेदप्रमाणकत्वेन वेदवाक्यविचार एव धर्मज्ञानजनक इति वेदवाक्यविचारप्रयोजकजिज्ञासाऽपि वेदाध्ययने सत्येव सम्भवतीति वेदाध्ययनं जिज्ञासायां हेतुर्भवतीति । जिज्ञासां प्रति सामान्यतो ज्ञानस्य हेतुत्वेन तादृशज्ञानजनकत्वेनापि अध्ययनं जिज्ञासायां हेतुर्भवतीति तृतीयः प्रकारः ।

धर्मस्य जिज्ञासा धर्मजिज्ञासेति शेषषष्ठ्या समासः । षष्ठ्यर्थः सम्बन्धः प्रयोज्यप्रयोजकभावः । अत एव "धर्माय जिज्ञासा धर्मजिज्ञासे"त्येवं भाष्ये भावार्थो वर्णितः । धर्मानुष्ठानप्रयोजिका जिज्ञासेत्यर्थः । तत्र विषयोऽपि धर्म एव । धर्मविषयकजिज्ञासयैव धर्मानुष्ठानप्रयोजकज्ञानद्वारा धर्मानुष्ठानसम्भवात् । तथा च वेदाध्ययनानन्तरं वेदाध्ययनस्य कृतत्वात् धर्मजिज्ञासा कार्येति सूत्रार्थः ।

**********

# न्यायशास्त्रस्योपयोगिता

**आचार्यः नरहरि के. भट्टः**
**न्यायविभागाध्यक्षचरः**
**श्रीकालभैरवेश्वरवेदागमसंस्कृतमहापाठशाला**
**आदिचुञ्चनगिरिः**

विदितमेवेदं समेषां शास्त्रेषु कृतभूरिपरिश्रमाणां विद्वन्मतल्लिकानां यत् जगतीह जनिमतां सर्वेषां प्राणिनां, **'सुखं मे भूयाद् दुःखं मनागपि मा भूत्'** इति वाञ्छया सुखावाप्तये दुःखनिवृत्तये च कर्मसु स्वाभाविकी प्रवृत्तिः । तत्र च लौकिकसुखस्य यत्किञ्चिद्दुःखनिवृत्तेर्वा अनित्यतया नेदं परमपुरुषार्थः इति नित्यनिरतिशयसुखस्य आत्यन्तिकदुःखनिवृत्तेर्वा परमपुरुषार्थत्वमामनन्ति दार्शनिकमहर्षयः इति । **'ज्ञानादेव हि कैवल्यम्'** इत्युक्तरीत्या स च पुरुषार्थः आत्मतत्त्वज्ञानैकसाध्यो नान्यथा । **'कर्मणैव हि संसिद्धिमास्थिता जनकादयः'** इत्यस्यापि निष्कामकर्मणा चित्तशुद्धिमवाप्य ज्ञानद्वारा कैवल्यमभजन्त इत्यत्रैव तात्पर्यम् । एतादृशात्मतत्त्वज्ञानस्य (विद्यायाः) उपाया एव विद्यास्थानानीत्युच्यन्ते । तदुक्तम् –

**अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।**
**पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश ॥** इति । ( वा. पु. )

अत्र न्यायविस्तरशब्दः कणादोपज्ञवैशेषिकदर्शनस्याप्युपलक्षणम् । याज्ञवल्क्येनाप्युक्तम् –

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥** इति । (या. स्मृ. १.३)

अयुर्वेदधनुर्वेदगान्धर्ववेदाथर्ववेदाख्याः चत्वारः उपवेदाश्चेति विद्यास्थानानि अष्टादश

इत्यप्यमामनन्ति । तथा च एतेषु आत्मतत्त्वप्रदिपादकेषु अष्टादशविद्यास्थानेषु महर्षिगौतमोपज्ञं न्यायदर्शनमप्यन्यतमम् । तदुक्तं – नव्यन्यायशास्त्रप्रवर्तकेन गङ्गेशोपाध्यायेन **"जगदिदं दुःखपङ्कनिमग्नम् उद्दिधीर्षुः परमकारुणिको मुनिः अष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं प्रणिनाय"** इति (त. चि) । संसाराख्यदुःखपङ्कादुद्धरणोपायः इयमान्वीक्षिकी ।

न्यायशास्त्रेऽस्मिन् प्रत्यक्षानुमानोपमानशब्दाख्यानां चतुर्विधप्रमाणानां निरूपणात्, प्रमेयार्थानां परीक्षणात्, प्रमोत्पत्तिप्रकारस्य च अनितरशास्त्रसाधारणतया प्रतिपादनाच्च प्रमाणशास्त्रमिति, प्रत्यक्षागमाभ्याम् ईक्षितस्य अनु ईक्षणम् अन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या इति व्युत्पत्त्या प्रत्यक्षप्रमाणेन आगम(शब्द)प्रमाणेन च सिद्धस्याप्यर्थस्य पुनः नानाविधाभिर्युक्तिभिः अनुचिन्तनात् आन्वीक्षिकी इति च शास्त्रस्यास्य अन्वर्थनामान्तराण्यपि परिदृश्यन्ते । अत एव हि श्रूयन्ते "**प्रमाणैरर्थपरीक्षणं न्यायः**"(न्या. भा), **"प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः"** इत्याद्युक्तयः ।

कोऽयमपवर्गः? किमस्य साधनम्? कथं वा तदधिगमः? इत्यादिजिज्ञासायां तत्र महर्षिगौतमेन प्रणीतानि न्यायसूत्राणि प्रमाणानि भवन्ति । यथा **"तदत्यन्तविमोक्षोऽपवर्गः"** (न्या. सू. १.१.२२) मोक्षः निःश्रेयसपरमपुरुषार्थः इत्यादिपदैरभिलप्यमानोऽपवर्गः दुःखानाम् आत्यन्तिकनिवृत्तिस्वरूप एव । तत्र साधनजिज्ञासायामुक्तम् **"प्रमाणप्रमेयसंशय... तत्त्वज्ञानान्निःश्रेयसाधिगमः"** (न्या. सू. १.१.१) इति सूत्रप्रणयित्रा महर्षिगौतमेन प्रमाणादिषोडशपदार्थानां तत्त्वानुभवस्य निःश्रेयसनिदानत्वं व्यवस्थापितम् । अत्र च तत्त्वज्ञानशब्देन तत्त्वस्य ज्ञानमिति व्युत्पत्त्या प्रमाणादिषोडशपदार्थतत्त्वविषयकं ज्ञानं, तत्त्वं ज्ञायते अनेनेति व्युत्पत्त्या पदार्थतत्त्वप्रतिपादकं शास्त्रं च विवक्षितम् । तथा च न्यायशास्त्रमिदं

प्रमाणादिषोडशपदार्थतत्त्वज्ञानद्वारा आत्यन्तिकदुःखनिवृत्तिरूपापवर्गसाधनमित्युक्तं भवति । कथं वा अस्मात् मोक्षाधिगमः? इति चेदुक्तम् – **"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायादपवर्गः"** (न्या. सू. १.१.२) इति सूत्रेण तत्त्वज्ञानात् मिथ्याज्ञानादिनिवृत्तिद्वारा मोक्षाधिगमः प्रतिपादितः । दुःखसाधनस्य जन्ममरणादिरूपसंसारस्य आत्मातिरिक्तपदार्थेषु देहादिषु आत्मत्वबुद्धिरूपं मिथ्याज्ञानमेव निदानं भवति । मिथ्याज्ञानवशात् रागद्वेषमोहात्मकस्य दोषस्योत्पत्तिर्भवति । वित्तवनितादिषु अनुकूलत्वभ्रमः मोहः । तत्प्राप्तिविषयको रागः इच्छा । प्रतिकूलेषु द्वेषः । इमे हि मिथ्याज्ञानप्रभवाः । दोषभूषितचित्तस्तु जीवः कर्मणि प्रवृत्तः सन् धर्ममधर्मं वा अर्जयति । धर्मवशात् प्रशस्तम्, अधर्मवशाच्च निन्दितं जन्म प्राप्नोति । जन्मवशाच्च दुःखानामुत्पत्तिः इति दोषादिकं प्रति मिथ्याज्ञानादीनि कारणानि भवन्ति । शास्त्राध्ययनादिना आत्मतत्त्वज्ञाने जाते, मिथ्याज्ञानादिरूपकारणानां विनाशसम्भवात् कार्यभूतस्यापि दोषादेरनुत्पत्त्या, कर्मणि प्रवृत्त्यभावेन धर्माधर्मादिरनुत्पत्त्या जन्मान्तरासम्भवात् प्रारब्धजन्मनश्च भोगादिना नाशे दुःखनामात्यन्तिनिवृत्तिः अपवर्गः सिद्ध्यति इति; गौतमोपज्ञस्य न्यायशास्त्रस्य परमं प्रयोजनम् । गौतमीये न्यायदर्शने प्रमाणादिषोडशपदार्थाः प्रतिपादिताः, तत्समानतन्त्रे वैशेषिकदर्शने तावत् द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्तपदार्थाः निरूपिताश्चेदपि, प्रमाणादिषोडशपदार्थानां सप्तसु पदार्थेषु अन्तर्भावः न्यायदर्शनस्यापि सम्मत एवेति न तद्विरोधः । सप्तपदार्थेष्वन्तर्भावप्रकारश्च दिनकर्यादिग्रन्थेषु स्पष्टं प्रतिपादितः । कणादोपज्ञे वैशेषिकदर्शनेऽपि **"यतोऽभ्युदनिःश्रेयससिद्धिः स धर्मः"** (वै. सू. १.१.२) इति सूत्रेण धर्मस्य अभ्युदयद्वारा निःश्रेयससाधनत्वप्रतिपादनात् **"धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्"** (वै. सू. १.१.४) इति सूत्रेण धर्मविशेषजन्यं पदार्थतत्त्वज्ञानं निःश्रेयससाधनमिति प्रतिपादनाच्च अस्यापि दर्शनस्य

पदार्थतत्त्वज्ञानद्वारा अपवर्गसाधनत्वं व्यवस्थापितम् । तथा च **“तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय”** इति उक्तदिशा गौतमोपज्ञस्य न्यायदर्शनस्य कणादोपज्ञस्य वैशेषिकदर्शनस्य पदार्थतत्त्वज्ञानाऽत्मतत्त्वसाक्षात्कारद्वारा मोक्षसाधनत्वरूपं परमं प्रयोजनं सिद्ध्यति । शास्त्रस्यास्य सत्यप्येवम् अलौकिके प्रयोजने सन्ति बहूनि लौकिकान्यपि दृष्टप्रयोजनानि । शास्त्रान्तराध्ययने प्रवृत्तानां छात्राणाम्, अध्यापकानां च विना न्यायशास्त्रं वैशेषिकशास्त्रं वा तच्छास्त्रतात्पर्यज्ञानं न जायते एव यतो हि शास्त्रान्तरे च गौतमीयप्रमाणप्रतिपादनपद्धतिः कणादीयपदार्थव्यवस्थापनरीतिश्च बहुधा उपयुक्ता वर्तते । एवं भारतीयप्राचीनभौतविज्ञानशास्त्रे प्रविविक्षूणां छात्राणाम् अनुसन्धाननिरतानां च दर्शनस्यास्याध्ययनम् अत्यन्तमनिवार्यम् । अत एव उद्गीयते अभियुक्तैः – **“काणादं पाणिनीयञ्च सर्वशात्रोपकारकम्”** इति । अत्र काणादपदं गौतमीयन्यायशास्त्रस्यापि उपलक्षणम् । एवं न्यायभाष्यकारो वात्स्यायनोऽपि न्यायशास्त्रस्य प्राशस्त्यमित्थं वर्णयति यथा –

**“प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥“**इति ।

आन्वीक्षिकी न्यायविद्या त्रयीवार्तादण्डनीतीनाम् इतरविद्यानां प्रदीप इव तदर्थप्रकाशकत्वात् । एवं सर्वासां विद्यानाम् उपकारिणी अत एव आश्रयश्च भवति राजा भृत्यादीनामिव । भारतीयानामस्माकं परमं प्रमाणं भवति वेदराशिः । शास्त्रमिदं नानाविधाभिर्युक्तिभिः वेदनिन्दकबोद्धादिनास्तिकमतनिरसनद्वारा वेदस्य प्रामाण्यं व्यवस्थापयति । अत एवोक्तं जयन्तभट्टैः –

**“तदेवमुपदेष्टव्याः पदार्थाः संशयादयः ।**
**तन्मूलन्यायनिर्णयवेदप्रामाण्यसंविदे ॥**
**तेनागमप्रमाणत्वद्वाराऽखिलफलप्रदा ।**
**इयमान्वीक्षिकीविद्या विद्यास्थानेषु गण्यते ॥“** इति ।(न्या. मं)

शास्त्रेऽस्मिन् प्रमाणानां निरूपणं पदार्थप्रतिपादनं बहुविस्तरेण नानाविधयुक्तिजालैश्च कृतं वर्तते । एतदध्ययनेन अध्येतृणां बहुमुखं प्रयोजनञ्च सिद्ध्यति । अत एवोक्तम् अभियुक्तैः -

**"मोहं रुणद्धि विमलीकुरुते च बुद्धिम्**
**सूते च संस्कृतपदव्यवहारशक्तिम् ।**
**शास्त्रान्तराध्ययनयोग्यतया युनक्ति**
**तर्कश्रमो न कुरुते कमिहोपकारम् ॥"** इति ।

अत एव सर्वैरपि छात्रैः नानाप्रयोजनकं शास्त्रमिदम् अवश्यमध्येतव्यमिति शम् ।

**********

# परामर्शः

**आचार्यः का. ई. मधुसूदनः**

**न्यायविभागाध्यक्षः**

अनुमितौ जननीयायां व्याप्तिज्ञानरूपस्य करणस्य व्यापारः परामर्शः । स च व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपः । यथा धूमेन लिङ्गेन पर्वते वह्न्यनुमितौ वह्निव्याप्यधूमवान् पर्वतः इत्याकारकं ज्ञानं परामर्शः । वह्निव्याप्यो धूमः, धूमवान् पर्वतः इत्यादिज्ञानद्वयात् न वह्न्याद्यनुमितिः भवति विना परामर्शम् । भवति च वह्निव्याप्यवान् पर्वतः इत्यादितोऽपि व्याप्यतावच्छेदकधर्मविशेषाविषयकात् ज्ञानात् सा । तस्मात् न व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानं कारणम्, किन्तु विशिष्टज्ञानमेवेति नैयायिकसिद्धान्तः । तत्रेदं विचार्यते किञ्चित् ।

व्याप्तिविशिष्टपक्षधर्मतेत्यत्र व्याप्तिवैशिष्ट्यं प्रकारितारूपं विवक्षितम् । तथा च व्याप्तिप्रकारकंपक्षधर्मताज्ञानं परामर्शः इति सिद्ध्यति । न च धूमो वह्निव्याप्यः द्रव्यवांश्च पर्वतः इत्यादिज्ञानस्यापि वह्निव्याप्तिप्रकारकत्वात पक्षे पर्वते धूमरूपद्रव्यविषयकत्वाच्च वह्न्यनुमितिजनकत्वापत्तिरिति वाच्यम् । यतः व्याप्तिप्रकारकत्वपक्षधर्मताविषयकत्वयोरवच्छेद्यावच्छेदकभावः विवक्ष्यते । तथा च व्याप्तिप्रकारकत्वावच्छिन्नपक्षधर्मताविषयकत्वविशिष्टज्ञानमेवानुमितजनकम् । उक्तसमूहालम्बनं च न तथाविधम्, विशृंखलतया भासमानव्याप्तिपक्षधर्मतयोः ये विषयिते तयोः अवच्छेद्यावच्छेदकभावविरहात् । अतो नोक्तापत्तिः । न चैवमपि वह्निव्याप्यकालीनधर्मवान् पर्वत इति ज्ञानस्य वह्न्यनुमितिजनकत्वापत्तिरिति वाच्यम् ।येन सम्बन्धेन यस्य प्रकारता तत्सम्बन्धविषयकत्वेनैव तत्प्रकारकत्वस्य अवच्छेद्यावच्छेदकभाव इति नियमाङ्गीकारेण तद्वारणसम्भवात् । न चैवं सत्यसम्भवः, वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञानेऽपि पर्वताद्यनुयोगिकसंयोगादेः

धूमादिसम्बन्धतयैव भानेन पक्षधर्मताविषयकत्वधूमरूपव्याप्यप्रकारकत्वयोः अवच्छेद्यवच्छेदकभावे सत्यपि पक्षधर्मताविषयकत्वव्याप्तिप्रकारकत्वयोः अवच्छेद्यावच्छेदकभावविरहात् इति वाच्यम् । पक्षविशेष्यकत्वावच्छिन्न-हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारताकत्वविशिष्टज्ञानस्य पक्षधर्मताज्ञानपदेन विवक्षणीयतया अदोषात् । पक्षविशेष्यकत्वावच्छिन्नहेतुतावच्छेदक-सम्बन्धावच्छिन्नहेतुनिष्ठप्रकारताकत्वावच्छिन्नं यत् व्याप्तिप्रकारताकत्वं तद्विशिष्टज्ञानं परामर्श इति लाभात् वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शे धूमे साक्षात् व्याप्तेः विशेषणत्वेन तद्विषयकत्वयोरवच्छेद्यावच्छेदकभावस्य अक्षतत्वात् ।

न चैवमपि पर्वतो वह्निमानित्यनुमितिजनके इन्धनसमानाधिकरणात्यन्ताभाव-प्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणेन्धनवान् पर्वत इति परामर्शे अव्याप्तिः दुर्वारा, साध्यतावच्छेदके वह्नित्वे स्वविशेषणेन्धनसमानाधिकरणाभाव-प्रतियोगितानवच्छेदकत्वासत्वेन व्याप्त्यप्रसिद्धेरिति वाच्यम् । साध्यतावच्छेदके प्रकृतहेतुव्यापकतावच्छेदकत्वविषयकत्वे सति प्रकृतहेतौ साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यविषयकत्वस्य व्याप्तिविशिष्टेत्यनेन विवक्षितत्वात् । वह्निमान् इन्धनादित्यत्र इन्धनव्यापकतावच्छेदकत्वस्य इन्धनत्वे वह्नित्वावच्छिन्नसामानाधिकरण्यस्य च प्रकृतहेतौ इन्धने प्रसिद्धत्वात् ।

न च तथापि इदमाकाशवत् आत्मन इत्यत्र अवृत्तिसाध्यहेतुकस्थले अनुमितिजनकपरामर्शे अव्याप्तिः, आत्मरूपहेत्वधिकरण आकाशरूप-साध्याधिकरणयोरप्रसिद्ध्या हेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरपि अखण्डयोरप्रसिद्धत्वादिति वाच्यम् । व्याप्तिघटकानां साधनाधिकरणादिपदार्थानाम् अधिकरणाधेयत्वादिपदार्थांशे तत्तत्सम्बन्धावगाहित्वस्य विवक्षणेन अदोषात् । तत्तदंशे तेन सम्बन्धेन तत्तत्प्रकारकत्वं च आत्माधिकरणनिष्ठाभाव-प्रतियोगितानवच्छेदकाकाशत्वावच्छिन्न समानाधिकरणात्मवदिदमिति

भ्रमात्मकपरामर्शे अस्त्येवेति ।

न चैवमपि पर्वतो वह्निमान् धूमादित्यत्र धूमत्वेन धूलीपटलावगाहिपरामर्शस्यानुमितिजनकस्यासंग्रहापत्तिः । तत्रादिकरण्यांशे हेतोः धूमस्याप्रकारकत्वादिति वाच्यम् । हेत्वादिप्रकारतायाः हेतुतावच्छेदकाद्यवच्छिन्नायाः विवक्षणेन तस्याः धूलीपटलादिसाधारण्यसम्भवात् ।

न च तथापि अधिकरणं धूमवत्, वृत्तिः अधिकरणीया, अत्यन्ताभावः वृत्तिमान्, प्रतियोगिता अत्यन्ताभावीया इत्येवं विशृंखलरीत्या व्याप्तिघटकयावत्पदार्थविषयके ज्ञाने अनुमित्यजनकेऽतिव्याप्तिरिति वाच्यम् । धूमत्वाद्यवच्छिन्नप्रकारतानिरुपितविशेष्यत्वावच्छिन्ना या अधिकरणप्रकारता तन्निरुपितविशेष्यतावच्छिन्ना या वृत्तित्वप्रकारता इत्यादिरीत्या साध्याधिकरणवृत्तित्वपर्यन्तस्य निवेशेनोक्तदोषविरहात् । वह्निव्याप्यधूमवान् पर्वत इति विशिष्टप्रकारकज्ञानस्य उक्तसमूहालम्बनज्ञानात् वैलक्षण्यसिद्धये विशिष्टप्रकारकज्ञाने अन्तराभासमानाधिकरणाधिपदार्थे विशेषणनिरूपितविशेष्यत्व विशेष्यान्तरनिरूपितप्रकारत्वयोरवच्छेद्यावच्छेदकभावाङ्गीकारात् ।

साध्यादिभेदेन लक्षणभेदस्य आवश्यकतया यल्लिङ्गकयत्साध्यकानुमितौ व्यापकताघटकहेतुतावच्छेदकमारभ्य यद्विशेषणपर्यन्तांशे प्रमात्मक एव परामर्शः कारणम्, तत्र तद्विशेषणविशिष्टपर्यन्तविषयस्य खण्डशः निवेशे गौरवात् प्रयोजनाभावाच्च लाघवेन विशिष्टत्वेनैव विषयिताविशेषणतया कारणतावच्छेदकत्वमिष्यते । तादृशविशिष्टविषयिताघटितधर्मावच्छिन्ना एव तत्र परामर्शस्य कारणता । यत्र हेतुतावच्छेदकांशे भ्रमादनुमितिः प्रसिद्धा तत्रैव सकलपदार्थानां खण्डशः निवेश इति विवेकः ।

ननु विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन परामर्शस्य न कारणत्वम्,

विशेषणतावच्छेदकप्रकारकनिश्चयं विना विशिष्टवैशिष्ट्यबोधसंभवेऽपि विशेष्ये विशेषणम् , तत्र च विशेषणान्तरमिति रीत्या परामर्शः संभवति , तत्र विशेष्णज्ञानविधया प्रत्येकपदार्थतोपस्थितेरेव हेतुतया विशकलितानां व्याप्तिघटकपदार्थानाम् उपस्थितितः तत्सम्भवात् । तत्र च विशिष्टविशिष्ट्यबोधात्मकपरामर्शस्य व्यभिचारः इति चेत्,

अत्राहुः :- विशेष्ये विशेषणम् इति रीत्या जायमानपरामर्श-साधारणरूपावच्छिन्नकारणताकल्पने धूमांशे इव व्याप्त्यंशे अपि निश्चयत्वं निवेशनीयम् , तदनिवेशे वह्निव्याप्तितदभाववद्धूमवान् पर्वतः इत्याकारकात् व्याप्त्यंशे संशयात्मकात् परामर्शाद् अनुमित्यापत्तेः वारयितुमशक्यत्वात् इति गौरवम् । न च विशेषणतावच्छेदकांशे संशयः सिद्धान्तविरुद्ध इति वाच्यम् । तादृशांशस्यापि मिश्रशिरोमणिसंमततायाः साधारणग्रन्थे भट्टाचार्यैरभिहितत्वात् । विशिष्टवैशिष्ट्यावगाहिज्ञानस्य कारणत्वे तु परामर्शस्य व्याप्त्यंशे संशयत्वं न संभवति, कारणेन आविशेषणतावच्छेदकप्रकारकनिश्चयेन प्रतिबन्धात् अपि तदं निश्चयत्वं न निवेशनीयम्, प्रयोजनाभावादिति लाघवम् । अतः उपलक्षितवैशिष्ट्यावगाहि ज्ञानात्, क्वचिदपि नानुमितिः । यत्र च विशेष्ये विशेषणमित्यादिरीत्या परामर्शः तत्र अनुमितेरनुभवसिद्धत्वे तदनन्तरोत्पन्नविशिष्टवैशिष्ट्यावगाहिपरामर्शादेव सा उपपादनीया इति ।

**********

# ईश्वरानुमानम्

डा. नवीनहोळळः

जगन्निर्मातृपुरुषधौरेयसिद्ध्या अनुमानस्य चारितार्थ्यमिति नव्यन्यायप्रस्थानप्रवर्तकस्य मणिकृतो हृदयम् । यद्यपि साक्षात् परम्परया वा जगन्निर्मात्रनुमापकानि नैकानि लिङ्गानि भवन्ति यथोक्तम् – कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥ इति आचार्य-उदयनेन कुसुमाञ्जलौ । तथापि तत्र कार्यत्वलिङ्गमेव मणिकृता ईश्वरसाधनाय उपादाय विस्तरेण विवेचितम् । क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवदिति प्रयोगः ।

जगति द्विविधानि कार्याणि भवन्ति । जीवेश्वरोभयकर्तृकाणि कानिचन यथा घटपटादीनि । ईश्वरमात्रकर्तृकाणि कानिचन यथा क्षिति – अङ्कुर- मेघ – जन्यात्मविशेषगुण – शब्द- फूत्कार –घटादिनिर्माणसम्प्रदायादीनि । तत्र आद्यं सकर्तृकत्वेन सर्वलोकसम्प्रतिपन्नं घटादिकार्यं दृष्टान्तत्वेन अवलम्ब्य, विप्रतिपन्नस्य द्वितीयस्य कार्यस्य क्षित्यादेः सकर्तृकत्वं प्रसाध्यते, क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटत्वादिति । उपादानविषयकप्रत्यक्षज्ञानचिकीर्षा-कृतिमज्जन्यत्वं सकर्तृकत्वम् । यद्यत् कार्यं तत्तद् उपादानविषयकप्रत्यक्षज्ञानचिकीर्षाकृतिमज्जन्यम् इति व्याप्तिः। सा च कपालतन्त्वादिविषयकप्रत्यक्षज्ञानचिकीर्षाकृतिमता कुलालकुविन्दादिना जन्ये घटपटादौ अनुभूयते । तद्बलेन क्षित्यङ्कुरादीनां उपादानविषयकप्रत्यक्षज्ञानचिकीर्षाकृतिमान् जनकोऽस्तीति निर्णीयते । सोऽयं क्षित्यादिकर्ता जीवादतिरिक्तः एव, जीवस्य अतथात्वात् इति जीवादतिरिक्त ईश्वरः सिद्ध्यति ।

अत्र चिन्त्यते – क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवद् इत्यत्र

पक्षाननुगमः । एवं कार्यं प्रति उपादानविषयकप्रत्यक्षचिकीर्षाकृतिभिः कर्तुः अन्यथासिद्धत्वेन उपादानविषयकप्रत्यक्षचिकीर्षाकृतिमज्जन्यत्वस्य घटादौ विरहात् दृष्टान्ते घटादौ साध्यवैकल्यम् ।

ननु कार्यं सकर्तृकं जन्यत्वात् घटवदिति अनुमानं निर्दुष्टं सम्भवति । अत्र क्षित्यङ्कुरादीनां कार्यत्वेन अनुगमात् । घटः आत्मजन्यः उत्पत्तिमत्त्वात् ज्ञानवदिति अनुमानेन ज्ञानदिमतः कुलालात्मनो घटकारणत्वसिद्धेश्च । न च उक्तानुमानम् आत्मसमवेतत्वरूपोपाधिग्रस्तत्वाद् दुष्टम् । पटः आकाशजन्यः उत्पत्तिमत्त्वात् शब्दवत् इत्यनुमानमिव अप्रयोजकत्वशङ्काकबलितञ्च इति वाच्यम् ।

घटकारणीभूता कुलालचेष्टा कुलालात्मसंयोग-असमवायिकारणिका कुलालात्मगतप्रयत्नरूपगुणजन्यत्वात् या क्रिया व्यधिकरणयदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा पर्णगता क्रिया स्वानधिकरणवायुगतसंयोगात् जन्या इत्यनुमानेन कुलालचेष्टां प्रति प्रयत्नवदात्मसंयोगस्य कारणत्वे सिद्धे चेष्टाद्वारा घटं प्रति प्रयत्नवदात्मसंयोगस्य कारणत्वसिद्धेः । प्रयत्नवदात्मसंयोगस्य घटकारणत्वे सिद्धे प्रयत्नवदात्मनोऽपि कारणत्वं निष्प्रत्यूहम् ।

न च चेष्टोत्पत्तौ प्रयत्न एव कारणम् । आत्मसंयोगे सत्यपि प्रयत्नं विना चेष्टायाः अनुत्पादात् इति वाच्यम्। असमवायिकारणं विना भावकार्यस्य अनुत्पादात्। चेष्टायां प्रयत्नस्य असमवायिकारणत्वाभावात् । इत्थञ्च पूर्वोक्तानुमानेन चेष्टायाः कुलालीयायाः आत्मसंयोगजन्यत्वे सिद्धे तेन हेतुना आत्मजन्यत्वं साध्यते । ततश्च घटे चेष्टाद्वारा आत्मजन्यत्वम् आत्मसंयोगजन्यत्वेन हेतुना सिद्ध्यति । घटः आत्मजन्यः आत्मसंयोगजन्यत्वात् ज्ञानवदिति प्रयोगः । अत्र आत्मसमवेतत्वस्य साधनव्यापकत्वात् नोपाधित्वम् । इत्थञ्च कार्यम् आत्मजन्यं कार्यत्वात् घटवदिति अनुमानं फलति । एवं कार्यम् उपादानविषयप्रत्यक्षचिकीर्षाकृतिजन्यं कार्यत्वात्

घटवत् इत्यपि अनुमानं सम्भवति ।

न च कार्यम् उपादानविषयकप्रत्यक्षचिकीर्षाकृतिजन्यं जन्यत्वात् घटवत् इत्यत्र सिद्धसाधनम्। पक्षतावच्छेदकावच्छेदेन अनुमितौ तत्सामानाधिकरण्येन सिद्धेः नव्यमतेऽविरोधित्वेऽपि प्राचीनमते विरोधित्वादिति वाच्यम्। उपादानविषयकजन्यकृतिजन्यभिन्नानि समवेतानि जन्यानि उपादानविषयकप्रत्यक्षज्ञानचिकीर्षाकृतिजन्यानि समवेतत्वे सति प्रागभावप्रतियोगित्वात् यथा घट इति अनुमानस्य निर्दुष्टत्वात्।

अत्र पक्षकुक्षौ भिन्नान्तविशेषणस्य निवेशात् घटादौ सिद्धसाधनं वार्यते । कृतौ जन्यत्वविशेषणनिवेशात् व्याघातः वार्यते । कृतौ उपादानविषयकत्वविशेषणनिवेशात् क्षित्यङ्कुरादयः शब्दफूत्कारादयश्च पक्षकुक्षौ सङ्गृह्यन्ते, पक्षाप्रसिद्धिः वार्यते । अन्यथा क्षित्यङ्कुरादीनाम् अदृष्टद्वारा जीवीयकृतिजन्यत्वात्, शब्दफूत्कारादीनां च अदृष्टमद्वारीकृत्यापि मृदङ्गगोचरकृतिजन्यत्वात् पक्षकुक्षौ अप्रवेशेन पक्षाप्रसिद्धिप्रसङ्गात् । समवेतत्वविशेषणनिवेशात् ध्वंसे अंशतो बाधः निवार्यते । साध्यकुक्षौ उपादानस्य कारणमात्रस्य विवक्षायां तु ध्वंसे बाधविरहात्, पक्षकुक्षौ समवेतत्वविशेषणं नावश्यकम् । जन्यत्वविशेषणनिवेशात् जलीयपरमाणुरूपादौ अंशतो बाधः वार्यते ।

साध्यकुक्षौ प्रत्यक्षचिकीर्षाकृतिषु अदृष्टाद्वारकत्वं विशेषणम् अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोगित्वरूपं देयम्। अन्यथा क्षित्यादीनाम् अदृष्टद्वारा जीवीयप्रत्यक्षचिकीर्षाकृतिजन्यत्वेन सिद्धसाधनप्रसङ्गः। अदृष्टे पुनः स्वजन्यत्वविशेषणं देयम्। अन्यथा घटजनकीभूतस्य कुलालसमवेतस्य कपालविषयकस्य प्रत्यक्षादित्रयस्य तदुत्तरकालानुष्ठितकर्मजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेन घटे दृष्टान्तासिद्धिप्रसङ्गः । एवमपि सिद्धसाधनस्य

वारणाय प्रत्यक्षेच्छाकृतिषु उपादानविषयकत्वं देयम् । अन्यथा शब्दफूत्कारादौ मृदङ्गविषयकप्रत्यक्षेच्छाकृतीनां स्वजन्यादृष्टमन्तरैव कारणत्वात् शब्दफूत्कारादौ सिद्धसाधनप्रसङ्गः ।

नचैवमपि घटे साध्यवैकल्यं दुर्वारम् । तत्र अपरोक्षज्ञानजन्यत्वस्य बाधात् । कृतिसाध्येष्टसाधनताज्ञानविधया घटं प्रति कारणीभूतस्य ज्ञानस्य प्रत्यक्षत्वासम्भवात् । अनागते कृतिसाध्येष्टसाधने घटे इन्द्रियसन्निकर्षासम्भवेन अनुमितिविषयत्वस्यैव उपगन्तव्यत्वादिति वाच्यम् । घटं प्रति चिकीर्षाप्रवृत्तिद्वारा उपादानप्रत्यक्षविधया कारणीभूतस्य ज्ञानस्यैव साध्यकुक्षौ विवक्षिततया साध्यवैकल्यविरहात् । घटनिर्माणे प्रवर्तमानपुरुषस्य अनागतघटविषयकप्रत्यक्षाभावेऽपि कपालप्रत्यक्षं तु भवत्येव, भवेदेव । नान्यथा घटं निर्मातुं शक्नुयात् । उपादानप्रत्यक्षस्य प्रवृत्तिहेतुत्वादेव, यागादौ प्रवृत्तिः हविरादीनां प्रत्यक्षोत्तरमेव भवति, न तु हविरादीनां कृतिसाध्येष्टसाधनत्वानुमितिमात्रेण ।

न च उपादानप्रत्यक्षस्य हेतुत्वं शब्दफूत्कारादिप्रवृत्तौ व्यभिचरितम् । शब्दोपादानस्य आकाशस्य अप्रत्यक्षत्वात् इति वाच्यम् । उपादानपदेन अधिष्ठानस्य विवक्षितत्वात् । शब्दाधिष्ठानस्य मृदङ्गादेश्च प्रत्यक्षत्वात् व्यभिचारविरहात् । न चैवमपि अस्मदीयप्रयत्नात् मनसि उत्पद्यमानायां क्रियायाम् अधिष्ठानसाक्षात्कारस्य हेतुत्वं व्यभिचरितम् । तदुपादानस्य मनसोऽतीन्द्रियत्वात् इति वाच्यम् । तत्र मनोगतक्रियायाः अस्मदीयप्रयत्नाधीनत्वाभावात् । मनोवहनाडीक्रियावशात् स्पर्शवद्वेगवन्नाडीसंयोगः मनसि जायते । ततः मनसि क्रिया उत्पद्यते । नाडीक्रिया अस्मत् प्रयत्नाधीना अदृष्टसहकृतत्वगिन्द्रियेण साक्षात्क्रियते च। अतो न व्यभिचार इति।

**आकरग्रन्थः –** तत्त्वचिन्तामणिः (ईश्वरवादः)

**********

# न्यायकौस्तुभरीत्या इवपदार्थविचारः

डा. श्यामसुन्दरः ए.

चन्द्र इव मुखम् इत्यादौ मुखादौ चन्द्रादिसादृश्यप्रतीतेः सर्वानुभवसिद्धत्वात् सादृश्यमेव इवपदार्थः इत्यभ्युपगच्छन्ति मनीषिणः । मुखादौ चन्द्रसादृश्यं चाऽह्लादजनकत्वादिरूपेण । तत्र इवपदार्थसादृश्ये चन्द्रस्य प्रतियोगितया मुखस्य चानुयोगितयान्वय इति 'चन्द्रप्रतियोगिकसादृश्यानुयोगि मुखम्' इत्याकारकः शाब्दबोधः तादृशवाक्याज्जायते ।

ननु नामार्थयोः भेदेनान्वयबोधस्याव्युत्पन्नत्वात् कथं चन्द्रादेः इवार्थसादृश्यादौ प्रतियोगिताद्यात्मकभेदसम्बन्धेनान्वयः सम्भवति ? इति चेत्, तत्र प्राचीनमतानुयायिनस्तु - नामार्थयोः भेदसम्बन्धेन अन्वयबोधं प्रति प्रकारीभूतविभक्त्यर्थ-निपातार्थान्यतरोपस्थितिः कारणम् इति कार्यकारणभावमङ्गीकृत्य यथा च "चैत्रस्येदं धनम्" इत्यादौ 'स्वामित्वाश्रयचैत्रस्वामिकम् इदं धनम्' इति षष्ठ्यर्थस्वामित्वस्य प्रकारतया संसर्गतया च भानं, तथैव "चन्द्र इव मुखम्" इत्यादौ इवपदोपस्थितस्य सादृश्यस्य चन्द्रे आश्रयतासम्बन्धेन, चन्द्रस्य च सादृश्यसम्बन्धेन मुखेऽन्वयः इति "सादृश्याश्रयचन्द्रसादृश्यवन्मुखम्" इत्याकारकः शाब्दबोध इति वदन्ति । नव्याः पुनः निपातातिरिक्तनामार्थयोरेव भेदेन साक्षादन्वयबोधस्य अव्युत्पन्नत्वात्, निपातात्मकनामार्थस्य नामार्थान्तरेण सहान्वये न किञ्चिद्बाधकम् । नाम्नि निपातातिरिक्तत्वानुपादाने "घटः पटो न" इत्यत्र नञर्थभेदे पटादेः प्रतियोगितादिसम्बन्धेन अन्वयो न स्यात् । तथा च निपातात्मकेवपदार्थे चन्द्रस्य प्रतियोगितासम्बन्धेन अन्वयसम्भवात् चन्द्रप्रतियोगिकसादृश्यानुयोगि मुखम्" इति शाब्दबोधः निराबाध एवेति प्राहुः ।

**प्राचीनमते सादृश्यस्वरूप-तदन्वयविचारः -** सम्प्रदायमते इवार्थसादृश्यं च भेदविशिष्टधर्मवत्त्वरूपं, वैशिष्ट्यञ्च सामानाधिकरण्यरूपम् । धर्मश्चात्र चन्द्रवृत्तिविलक्षणरूपादिवत्त्वमेव, तादृशधर्मप्रकारकज्ञानविशेष्यत्वसम्बन्धेन चन्द्रवृत्तिधर्मवत्त्वस्य मुखेऽन्वयः इत्यर्थः । सामानाधिकरण्यमपि एतादृशसम्बन्धघटितमेव बोध्यं, न तु समवायादिघटितं चन्द्रवृत्तिरूपादेः समवायेन मुखे बाधात् । "चन्द्र इव मुखम्" इत्यत्र चन्द्रस्य चन्द्रत्वावच्छिन्नप्रतियोगितासम्बन्धेन भेदे, आधेयतासम्बन्धेन धर्मे चान्वयः । अत्र यद्यपि चन्द्रभेदविशिष्टे धर्मे चन्द्रस्य आधेयतया अन्वयो न सम्भवति । तथापि केवलधर्मे एव चन्द्रस्य तथान्वयस्वीकारात् न दोषः । तथा चात्र 'चन्द्रप्रतियोगिकभेदविशिष्ट-चन्द्रवृत्तिधर्मवन्मुखम्' इति शाब्दबोधः । विभिन्नविभक्तिकोपमानोपमेयवाचकपदस्थले "चन्द्रस्येव मुखम्" इत्यादौ मुखे चन्द्रसादृश्यान्वयबोधस्य सर्वानुभवविरुद्धत्वात् , सादृश्यान्वयबोधं प्रति उपमानोपमेयवाचकपदयोः समानविभक्तिकत्वस्य तन्त्रत्वं वक्तव्यम् । तथा च "कालिदासस्येव यशः" इत्यादौ यशः पदान्तरमध्याहृत्य अन्वयबोधः उपपादनीयः । "कालिदाससम्बन्धियशःसदृशं यशः" इति तत्रान्वयबोधः ।

ननूक्तरीत्या सादृश्यस्य भेदघटितत्वे, रामरवणयोर्युद्धं रामरावणयोरिव इत्यादिप्रयोगस्य अप्रामाणिकत्वप्रसाङ्गः । रामरावणभेदस्य रामरावणयोर्विरहात् इति चेत्, अत्र भेदविशिष्टधर्मवाचकस्येवशब्दस्य धर्मवत्त्वरूपकेवलविशेष्ये लक्षणास्वीकारान्न दोषः । अतोऽत्र सादृश्यपदं लाक्षणिकम् । अथवा भेदे धर्मे च इवशब्दस्य खण्डशः शक्तिः स्वीक्रियते । निरुक्तभेदस्यात्र बाधात् केवलधर्मबोधः शक्त्यैव प्रतीयते ।

केचन सादृश्यपदार्थं प्रकारान्तरेण निरूपयन्ति तेषामयमभिप्रायः । तैश्च 'चन्द्र इव मुखम्' इत्यादौ इवशब्दस्य भेदे वृत्तिसजातीयधर्मे च शक्तिः स्वीक्रियते ।

उपमानस्य चन्द्रस्य भेदे वृत्तौ चान्वयः । तत्र चन्द्रस्य भेदे अन्वयितावच्छेदकीभूतचन्द्रत्वावच्छिन्नप्रतियोगितासम्बन्धेन, वृत्तौ च निरूपितत्वसम्बन्धेन, भेदस्य तादृशधर्मस्य च उपमेये मुखे आश्रयतासम्बन्धेन चान्वयः । साजात्यं चात्र अनुभवसिद्धाह्लादकत्वत्वादिरूपेण ग्राह्यम् । तथा च "चन्द्रत्वावच्छिन्नप्रतियोगिताकभेदाश्रयत्वे सति चन्द्रवृत्त्याह्लादकत्व-सजातीयाह्लादकत्वाश्रयः मुखम्" इति शाब्दबोधस्तस्माज्जयते । अत्र च उपमानभूतचन्द्रस्य भेदांशे अन्वयितावच्छेदकावच्छिन्नप्रतियोगितासम्बन्धेन अन्वयस्वीकारात् "मुखमिव मुखम्" इति प्रयोगस्य न प्रामाण्यम् । अन्यथा अन्वयिनिष्ठप्रतियोगितासम्बन्धेन अन्वये सति मुखे यत्किञ्चिन्मुखभेदस्य सत्वात् तथा प्रयोगापत्तेः । "कालिदासस्येव यशः" इत्यत्र यशःसम्बन्धिबोधकतया एतस्येति पदाध्याहरस्यावश्यकत्वात्, तादृशवाक्यात् 'कालिदासभिन्नत्वे सति कालिदासनिष्ठयशःसजातीययशस्विनः एतस्य यशः' इति बोधो जायते । अत्र यशसः द्विधा भानेऽपि एतद्वृत्तियशस्त्वेन विशेष्यतया, तादृशसजातीययशस्त्वेन सादृश्यघटकतया च बोध इति न पौनरुक्तिदोषः । "रामरावणयोर्युद्धं रामरावणयोरिव" इत्यत्र भावान्वयबोधो न विवक्षितः बाधात्, तत्र एवकारं उपमानवाचकयुद्धपदं चाध्याहृत्य रामरावणसम्बन्धियुद्धभिन्नं रामरावणयुद्धसादृश्याभाववत् इति अभावप्रकारकान्वयबोधः स्वीक्रियते इति ।

अन्ये तु यथा "घटो न" इत्यत्र नञः एव घटत्वावच्छिन्नप्रतियोगिताकोऽभावः अर्थः घटस्य तात्पर्यग्राहकत्वं, तथैव "चन्द्र इव मुखम्" इत्यत्रापि इव शब्दस्यैव चन्द्रत्वावच्छिन्नप्रतियोगिताकसादृश्यमर्थः, चन्द्रपदञ्च तात्पर्यग्राहकम् । केवलसादृश्यापेक्षया चन्द्रादिप्रतियोगिकसादृश्यस्य गुरुत्वेऽपि, यथा नञः अभावमात्रबोधकत्वे "घटस्य अभाव" इतिवत् "घटस्य न" इति प्रयोगापत्तिः, तथा इवशब्दस्य सादृश्यमात्रार्थकत्वे "चन्द्रस्य सादृश्यम्" इतिवत्

"चन्द्रस्य इव" इति षष्ठ्यन्तप्रयोगापत्तिः स्यात् । इवशब्दात् प्रतियोगित्वाद्यात्मकसम्बन्धबोधासम्भवात् तद्बोधार्थं षष्ठेरावश्यकत्वात् । अतः इवशब्दस्य विशिष्टार्थबोधकत्वमङ्गीकार्यमित्यामनन्ति । इदमसङ्गतं, यतो हि "घटो न" इत्यादिदृष्टान्ते नञः अभावमात्रार्थकत्वेऽपि न दोषः । अभावांशे घटसम्बन्धस्य प्रतियोगित्वस्य संसर्गमर्यादयैव भानसम्भवात्, तस्याः पदादुपस्थितिः नापेक्षिता । नञुपस्थिते अभावांशे एव प्रतियोगितायाः संसर्गतयैव भानम्, अभावपदोपस्थिते तस्मिन् प्रतियोगितायाः प्रकारतयैवेति नियमोपगमेन "घटस्याभावः" इतिवत् "घटस्य न" इति प्रयोगस्यापि न प्रामाणिकता । नञः विशिष्टबोधकतामतेऽपि "घटो न" इत्यादौ पटप्रतियोगिकाभावबोधवारणाय स्वसमभिव्याहृतपदार्थतावच्छेदकावच्छिन्नप्रतियोगिताक एव अभावो नञा बोध्यते इति स्वीकारस्यावश्यकतया नैतन्मते गौरवं दोषाय । अपि च तन्मते, नञः घटादिप्रतियोगिताकाभावबोधकत्वं घटादिपदञ्च तात्पर्यग्राहकम् आहोस्वित् घटादिपदं तादृशाभावबोधकं नञ्पदञ्च तात्पर्यग्राहकमित्यत्र विनिगमनाविरहप्रसङ्गश्चेति नञः अभावमात्रबोधकत्वस्वीकार एव उचितः । प्रकृते इवशब्दस्यापि सादृश्यमात्रार्थकत्वमेव, प्रतियोगित्वांशस्य संसर्गमर्यादयैव भानसम्भवात् । अतः चन्द्रादिप्रतियोगिकसादृश्यं न इवशब्दार्थः । अपि तु सादृश्यमात्रम् इति ।

**उपमानोपमेयोभयविशेष्यकबोधः तन्निराकरणञ्च**

"यथा चन्द्रस्तथा मुखम्" इति वाक्याधीनबोधसमानाकारको बोधः "चन्द्र इव मुखम्" इति उपमानोपमेयभावस्थलेऽपि जायते । यथा चन्द्रस्तथा मुखमित्यत्र यथा 'यादृशधर्मवांश्चन्द्रः तादृशधर्मवन्मुखम्' इतिबोधवत् "चन्द्र इव मुखम्" इत्यत्रापि "मुखसदृशश्चन्द्रः चन्द्रसदृशं मुखम्" इति उपमानोपमेयोभयविशेष्यकः शाब्दबोधो भवति । ननु यथा चन्द्रस्तथा मुखमित्यत्रेव चन्द्र इव मुखमित्यत्र

प्रकारार्थकथाल्प्रत्ययाभावेन वाक्यभेदासम्भवात् उभयविशेष्यकबोधोऽप्रामाणिकः इति चेत्, उक्तरीत्यात्रोभयविशेष्यकबोधानङ्गीकारे “हंसीव धवलश्चन्द्रः” इत्यत्र “हंसीसदृशश्चन्द्रो धवलः” इति उपमेयचन्द्रविशेष्यकबोधमात्रस्वीकारेऽपि बाधकाभावात् तत्र लिङ्गभेदस्य उपमादोषत्वानुपपत्तिप्रसङ्गः । उभयविशेष्यकबोधस्वीकारपक्षे तु अनियतलिङ्गवचनकनामार्थप्रकारक-तादात्म्यसंसर्गकशाब्दबोधं प्रति समानलिङ्गवचनकनामपदजन्योपस्थितेः हेतुत्वात् प्रकृते तादृशोपस्थित्यभावात् पुल्लिङ्गधवलशब्दार्थस्य स्त्रीलिङ्गहंसीपदार्थे अन्वयासम्भवात् लिङ्गभेदस्य उपमादोषत्वमुपपद्यते । “नीलस्य घटः” इत्यादौ नीलादेः घटादावभेदान्वयबोधवारणाय कार्यकारणभावोऽसौ अवश्यमभ्युपेयः इति केषाञ्चिदभिप्रायः, सोऽप्यसमञ्जस एव यतो हि उक्तरीत्या लिङ्गभेदस्योपमादोषत्वाङ्गीकारे “चन्द्र इव मुखं रमणीयम्” इत्यादावपि उपमायाः दुष्टत्वप्रसङ्गः । तत्र उपमानोपमेययोः चन्द्रमुखयोः विभिन्नलिङ्गकत्वेन नपुंसकलिङ्गरमणीयशब्दार्थस्य पुल्लिङ्गचन्द्रशब्दार्थे अन्वयासम्भवात् । यदि तत्र रमणीयञ्च रमणीयश्च रमणीयम् इति द्वन्द्वैकशेषं स्वीकृत्य रमणीशब्दस्योभयत्रान्वयसम्भवान्न दोषः इत्युच्यते तदा एवमेव सर्वत्रापि अदुष्टत्वोपपादनसम्भवात् वामनाचार्योक्तौ “इष्टः पुंनपुंसकयोः प्रायेण” (वा. सू. ४-१२-१३) इत्यत्र प्रायशब्दस्य वैयर्थ्यप्रसङ्गः । अपि च आलङ्कारिकाचार्यैः दण्ड्यादिभिरदुष्टत्वेनाङ्गीकृतस्य “प्राणा इव प्रियोऽयम्” “विद्या धनमिवार्जिता” इत्यादेः दुष्टत्वापत्तिश्च स्यात् ।

“गज इव गच्छति राजा” इत्यादौ गजसादृश्यस्य धात्वर्थगमने “पिक इव रौति चैत्रः” इत्यत्र पिकसादृश्यस्य रवणे च बाधात् नान्वयः, अपि तु तत्र गजपदस्य गजगमने, पिकशब्दस्य पिकरवणे च लाक्षणिकतया “गजगमनसदृशगमनानुकूलकृत्याश्रयो राजा” इति ‘पिकरवणसदृश-

रवणानुकूलकृत्याश्रयश्चैत्रः' इति चान्वयबोधः । अथवा इवार्थसादृश्यं स्ववृत्तिगमनादिसजातीयत्वरूपमिति 'गजवृत्तिगमनसजातीयगमनानुकूलकृतिमान् राजा', 'पिकवृत्तिरवणसजातीयरवणानुकूलकृतिमांश्चैत्रः' इति च शाब्दबोधो जायते, इति शम् ।

**********

# नञर्थविचारः

डा. आर् नवीनः

**संसर्गाभावोऽन्योन्याभावश्च नञर्थ** इति दीधितिः । यद्यपि सादृश्यादयः षडेव नञर्थाः । तदुक्तम् –

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।**

**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥**

इति वचनानुरोधेन षड् नञर्थाः इति सिद्धम् । तथाऽपि लक्षणयैव सादृश्यार्थे प्रयोगनिर्वाहे सादृश्यार्थे शक्तिकल्पनमयुक्तम्, अपि तु अभावान्यत्वरूपार्थद्वये शक्तिः स्वीक्रियते । तथा च नञर्थः द्विविधः – अत्यन्ताभावः अन्योन्याभावश्चेति फलितम् । नञर्थसामान्यस्य अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् । यदि अत्यन्ताभावः अन्योन्याभावो वा अन्वयिनिष्ठप्रतियोगिताक इति उच्यते तर्हि नीलघटवति भूतले घटो नास्तीति व्यवहारस्स्यात्, नीलघटवतः भूतलस्य यत्किञ्चित् पीतघटादिनिष्ठप्रतियोगिताकात्यन्ताभाववत्त्वे अबाधात् । एवं नीलघटः न घटः इति व्यवहारः स्यात् । नीलघटस्य यत्किञ्चित्पीतघटादिनिष्ठप्रतियोगिताकभेदवत्त्वे अबाधात् । अतः अत्यन्ताभावान्योन्याभावयोः अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं स्वीकर्तव्यम् । तथा च नीलघटवति भूतले घटसामान्यान्तर्गतनीलघटस्य सत्त्वात् घटो नास्तीति व्यवहारविरहः सूपपादः । एवं नीलघटे घटसामान्यान्तर्गतनीलघटतादात्म्यस्यैव सम्भवात् नीलघटे घटभेदस्य बाधात् नीलघटो न घटः इति व्यवहारविरहश्च उपपाद्यः सुलभ एव । इह नीलघटवति न पीतो घटः, पीतो घटः न नीलः इत्यादिव्यवहारात् प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ । यत्र येन सम्बन्धेन यत् प्रतीयते नञघटितवाक्यात् तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावः प्रतीयते । यथा पचति चैत्रः, न पचति

चैत्रः इत्यादौ नञघटितवाक्याद् आख्यातार्थकृतेः प्रथमान्तोपस्थापित एव अर्थे अन्वयबोधः, नञ्घटितवाक्यात् तु आख्यातार्थकृतेरेव अभावः प्रथमान्तार्थे प्रत्यायनीयः । चैत्रस्येदम्, चैत्रस्य नेदम् इत्यादौ , षष्ठ्यादेः चैत्रादिनिरूपितं स्वत्त्वादिकमेव प्रथमान्तार्थे नञघटितवाक्यात् बोध्यते । नञ्घटितवाक्यात्तु स्वत्वाभावः बोधनीयः । चैत्रस्येदमित्यादौ षष्ठ्याः स्वामित्वमेवार्थः । तस्य निरूपकतासम्बन्धेन इदं पदार्थे अन्वयः । तथा च चैत्रनिष्ठस्वामितानिरूपकम् इदमिति बोधो जायते इति प्राचां मतम् ।

नव्यास्तु निरूपकतायाः अभावप्रतियोगितानवच्छेदकत्वेन वृत्त्यनियामकत्वात् चैत्रस्य नेदमित्यादौ अन्वयबोधः दुरुपपादः स्यात् । न च आश्रयत्वसंबन्धमादाय अन्वयबोधः सूपपाद इति वाच्यम् । तथा सति चैत्रीयधनेऽपि चैत्रनिष्ठस्वामित्वादेः आश्रयतासम्बन्धेन विरहात् चैत्रस्य नेदमिति प्रत्ययः स्यात् । तस्मात् षष्ठ्यादेः स्वामित्वं नार्थः अपि तु स्वत्वमेवेति वदन्ति । भूतले न घटः इत्यादौ नञर्थान्वयबोधः द्विविधः तात्पर्यमूलकः जायते । यथा भूतले न घटः इत्यादौ तात्पर्यवशात् कदाचित् भूतलादौ घटाभावः, कदाचित् घटादौ भूतलवृत्तित्वाभावः प्रतीयते ।

अत्र केचन एवं वदन्ति यत् सर्वत्र विशेष्ये विशेषणस्याभावः नञा प्रत्यायते। यथा भूतले घटो नास्ति इत्यादौ भूतलवृत्तित्वाभावः मुख्यविशेष्ये घटादौ प्रत्याय्यते, अत एव भूतले घटौ न स्तः, भूतले घटाः न सन्ति इत्यादौ मुख्यविशेष्यवाचकाख्यातपदयोः समानवचनकत्वमुपपद्यते इति । तन्मतं खण्डयति दीधितिकारः – जातौ न सत्ता इत्यादौ जातिसमवेतत्वाभावः सत्तायाम् उक्तदिशा उपपादनीयः भवति । परन्तु तन्न सम्भवति । यतः जातिसमवेतत्वस्याप्रसिद्धत्वात् ।

तस्मात् भूतले न घटः इत्यादौ कदाचित् घटे भूतलवृत्तित्वाभावबोधः कदाचित् भूतले घटाभावबोधः इत्यत्र तात्पर्यस्यैव नियामकत्वं स्वीकर्तव्यम् । अत एव पृथिव्यां गन्धो न जले इत्यादौ पृथिवीवृत्तिः गन्धः जलवृत्तित्वाभाववान् इत्याकारकः

गन्धैकविशेष्यकः बोधो जायते ।

**नञः अत्यन्ताभावार्थकत्वे प्रयोजकानि**

१) नञा प्रातिपदिकार्थस्य अत्यन्ताभावबोधने सप्तम्यान्तानुयोगिवाचकपद-समभिव्याहारः प्रयोजकः । यथा भूतले न घटः इत्यादौ नञा घटात्यन्ताभावः प्रतीयते ।

२) नञा प्रत्ययार्थस्य अत्यन्ताभावबोधने तत्तद्विभक्त्यन्तपदसमभिव्याहारः प्रयोजकः । यथा चैत्रो न पचतीत्यादौ नञा तिङ्प्रत्ययार्थस्य कृत्यादेः अभावबोधने आख्यातविभक्त्यन्तपदसमभिव्याहारः प्रयोजकः , एवं चैत्रस्य नेदमित्यादौ नञा षष्ठ्यर्थस्वत्वादेः अभावबोधने षष्ठीविभक्त्यन्तपदसमभिव्याहारः प्रयोजकः ।

**नञा अन्योन्याभावबोधने प्रयोजकः**

यत्र समानविभक्तिकपदद्वयं श्रूयते नीलः घटः इति , तत्र तदुपस्थापितयोः नीलघटयोः विशेषणविशेष्ययोः अभेदान्वयबोधः अनुभवसिद्धः तत्र समानविभक्तिकपदद्वयमध्ये निपतितस्य नञः अन्योन्याभावः अर्थः । यथा घटो न नीलः इत्यादौ घटो नीलभिन्नः इत्याकारकः बोधो जायते । तथा च नञा अन्योन्याभावबोधने प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्व विरुद्धविभक्तिराहित्यं वा प्रयोजकमित्युच्यते । प्रतियोगि-अनुयोगिवाचकपदसमभिव्याहृतान्योन्याभावार्थकत्वादेव यजतिषु ये यजामहं करोति नानुयाजेषु इत्यादौ अनुयाजभिन्नयजतिषु ये यजामहं करोति इति अन्वयबोधः एकवाक्यत्वानुरोधात् उपपद्यते । अयमेव पर्युदासपक्षेति अभिसन्धीयते यदि अनुयाजेषु ये यजामहकरणनिषेधः प्रतिपद्यत इत्युच्यते तदा ये यजामहं करोति इति वाक्यस्य अनुषङ्गः आश्रितो भवति । तच्च गौरवम् । तस्मात् यजतिषु अनुयाजभेदः नञा बोध्यते इति वक्तव्यम् । न चानुयाजेषु इत्यत्र विभक्तेः निरर्थकत्वमिति शङ्क्यम् । विशेषणविभक्तेः साधुत्वार्थकत्वादिति ।

अत्र केचन मन्यन्ते यत् **यजतिषु ये यजामहं करोति नानुयाजेषु** इत्यादौ नञ्शब्दः पर्युदासपरः भवतीति । तत्र नञः प्रतिषेधार्थकत्वे यजतिसामान्ये ये यजामहकरणं, यजतिविशेषे ये यजामहकरणनिषेधः इत्यर्थः लभ्यते । यजतिपदार्थासङ्कोचेन यजतिषु इत्यादिना अनुयाजेऽपि मन्त्रपाठविधानात् विरोधेन एकस्य अप्रामाण्यापत्तिः । अतिरात्रे षोडशिग्रहणाग्रहणयोरिव अनुयाजे तन्मन्त्रपाठतदभावरूपवैकल्पिकाङ्गद्वयस्य विधायकतया विरोधपरिहारसम्भवेऽपि अनुयाजजन्यपरमापूर्वस्य भावाभावरूपाङ्गद्वयघटितसामग्रीभेदकल्पनेन तत्सामग्रीद्वयप्रयोज्यफलप्रकर्षापकर्षकल्पनेन च गौरवप्रसङ्गः । तस्मात् निरुक्तवाक्यघटकनञः निषेधपरत्वं परित्यज्य भेदपरत्वमिति । **तन्मतं खण्डयति** दीधितिकारः – **विशेषनिषेधे सामान्यविधेः तदितरपरत्वमिति** नियमः ब्राह्मणेभ्यो दधि दातव्यम् , कौण्डियाय न दातव्यमित्यादौ व्युत्पत्तिसिद्धः । तत्र ब्राह्मणशब्दस्य कौण्डिन्येतरब्राह्मणपरत्वं स्वीकृत्य कौण्डिन्येतर ब्राह्मणेभ्यः दधि दातव्यमिति वाक्यार्थः सम्पादनीयः । एवं सम्पादिते वाक्यार्थे विकल्पस्य प्रसक्त्यभावेन विकल्पप्रसक्तिमूलकभेदपरः नञ्शब्द इति यदुक्तं तन्न सम्भवतीति भावः ।

न च “ब्राह्मणेभ्यो दधि दातव्यं कौण्डियाय न दातव्यमि”त्यादावपि विकल्पापत्तिभयात् निरुक्तवाक्यघटकनञा कौण्डिण्यभेदः बोध्यते । तस्य च ब्राह्मणे अन्वयः । तथा च कौण्डिन्यभिन्नब्राह्मणेभ्यो दधि दातव्यम् इति बोधः जायत इति वाच्यम् । नञा अन्योन्याभावबोधने प्रतियोगि-अनुयोगिवाचकपदयोः समानवचनकत्वमावश्यकम् । प्रकृते च कौण्डिन्यब्राह्मणपदयो विरुद्धवचनकत्वात् नञा भेदं बोधयितुम् अशक्यत्वात् । यदि बलात् भेदबोधः अङ्गीक्रियते तदा महतो राज्ञः न महतो राज्ञ इत्यत्र इव महतां राज्ञः न महतां राज्ञः इत्यत्रापि राजनि महदभेदश्च, प्रतीयेत । तस्मात् नञ्शब्दस्य विकल्पापत्तिमूलभेदपरत्वं नास्तीति सिद्धम् ।

**********

# व्यक्तिविवेके पाणिनीयपरामर्शः

**आचार्यः केशवन् के. पि.**
साहित्यविभागाध्यक्षः
गूरुवायूर् परिसरः

संस्कृतालङ्कारशास्त्रे स्थिरप्रतिष्ठस्य ध्वनिसिद्धान्तस्य विमर्शकत्वेनाचार्यो महिमभट्टः प्रसिद्धोऽस्ति। ध्वनिविमर्शनेन चास्य व्यक्तिविवेकस्तदनन्तरमागतैराचार्यैः प्रायस्तिरस्कृतोऽवलोक्यते। परं व्यक्तिविवेके साहित्यशास्त्रविषयकाः व्याकरणविषयकाः दर्शनविषयकाश्चापूर्वाः विचारास्सन्ति ये आचार्यस्यास्य सकलशास्त्रावगाहिपाण्डित्यं विचाराणां मौलिकत्वं च प्रख्यापयन्ति। यं कमपि विषयमसौ प्रतिपादयति तस्यान्तस्तलं यावत् गच्छतीति आचार्यस्यास्य वैशिष्ट्यमस्ति। व्यक्तिविवेकानुशीलनेनावगम्यते यदस्मिन् व्याकरणशास्त्रविषयाणामपि गभीराः विचाराः सन्तीति। महर्षेः पाणिनेः उपदेशानामपूर्वया व्याख्ययापि स्वकीयान् विचारानसौ प्रतिष्ठापयति। महर्षेः पाणिनेः साक्षात्परामर्शः व्यक्तिविवेके प्रधानतया द्वयोः सन्दर्भयोः अवलोक्यते। निबन्धेऽस्मिन् अनन्तरोक्तं सन्दर्भद्वयं प्रदर्श्यते।

सर्वेषां नामपदानां क्रियैवैका प्रवृत्तिनिमित्तमिति महिमभट्टस्यापूर्वः सिद्धान्तः।(1) घटादिशब्दाः घटनादिक्रिययैव घटादिष्वर्थेषु प्रवृत्ता भवन्ति। सैषा घटनक्रिया घटात्मतापत्तिरूपा भवति। धटात्मताप्राप्तिरूपां क्रियाम् अनासाद्य घटत्वजातेः सत्त्वेऽपि घटपदार्थः घटशब्दे प्रवृत्तो न भवति। घटत्वजातिः सामान्येन घटपदार्थस्य घटशब्देन व्यवहारे कारणमस्ति। तथापि घटनक्रियायाः पूर्वं, नित्यत्वात् घटत्वजातेः विद्यमानत्वेऽपि, घटशब्दस्य प्रवृत्तिः न दृश्यते। ईदृशस्थलेषु जातिः प्रवृत्तिनिमित्तमिति सिद्धान्तस्य व्यभिचारः प्रसज्यते। व्यभिचारस्यैतस्य

निवारणार्थमेव तदात्मतापत्तिरूपां क्रियां प्रवृत्तिनिमित्तत्वेन महिमभट्टः स्वीकरोति। यद्यपि सत्त्वप्रधानानि नामानि उच्यन्ते तथापि सर्वेषु नामपदेषु प्रवृत्तिनिमित्तीभूता इयं क्रिया विद्यते। अस्याः क्रियायाः मूलं परमेश्वरस्य नानाविधानां वस्तूनां निर्माणं भवति। परमेश्वरः निर्माता इति जडानां घटादीनामपि तदात्मतापत्तिरूपा क्रिया युज्येत। विषयोऽयं पाणिनेरपि सम्मत इति सङ्ग्रहश्लोके महिमभट्टः स्पष्टतया महर्षेः उल्लेखं करोति। तद्यथा –

**नाम्नः सत्त्वप्रधानस्य धातुकारोऽत एव हि।**
**शब्दवक्त्रैकदेशादेर्धात्वर्थत्वमवोचत॥ इति।**[(2)]

अत्र धातुकारः महर्षिः पाणिनिरेव। सर्वत्र क्रियायाः प्रवृत्तिनिमित्तत्वस्वीकारादेव धातुकारः सत्त्वप्रधानस्य शब्दवक्त्रैकदेशादेः धात्वर्थत्वं कथितवान्। शब्दश्च वक्त्रैकदेशश्च शब्दवक्त्रैकदेशौ। तौ आदिर्यस्य तस्येति शब्दवक्त्रैकदेशादेः। सामान्येन धातूनां क्रियैव अर्थः धातुपाठे दृश्यते। परन्तु अणादयः शब्दार्थः, गडि वदनैकदेशे इत्यादिधातुकारोक्तदिशा नाम्नामपि शब्दवदनैकदेशभवनप्रभृतिक्रियैव प्रवृत्तिनिमित्तमित्यवसीयते। अनेन नामपदेषु अपि क्रिया मूलरूपेण वर्तते इति ज्ञाप्यते। सा चैषा क्रिया महिमभट्टेन प्रवृत्तिनिमित्तरूपेण स्विकृता भवति। प्रकृते धातुकार इति पाणिनेरेव उल्लेखः महिमभट्टेन कृतः। अपि च अत्रैव नामोल्लेखं विनाऽपि पाणिनीयस्य परामर्शोऽस्ति। तद्यथा –

**एवञ्च विपच्य घटो भवतीति क्त्वोऽस्य पूर्वकालत्वम्।**
**घटनापेक्षं ज्ञेयं भवनापेक्षन्तु नासमन्वयतः॥ इति॥**[(3)]

नामपदानां क्रिया प्रवृत्तिनिमित्तमिति सिद्धान्तस्य साधकं प्रमाणान्तरमपि पाणिनीये वर्तते। विपच्य घटो भवति इति वाक्ये विपचन-घटन-भवनक्रियासु विद्यमानासु घटनक्रियापेक्षमेव विपचनक्रियायाः पौर्वकाल्यं भवति। अन्यथा विपच्य इति वक्त्वाप्रत्ययविधिः नैव युज्यते। तेन च महिमभट्टस्य प्रवृत्तिनिमित्तक्रियासिद्धान्तः पाणिनेरपि सम्मत आसीद् इति वक्तुं शक्यते। प्रकृते तु पाणिनेः साक्षादुल्लेखो न

दृश्यते इति पूर्वस्माद् विशेषः।

द्वितीये विमर्शे विधेयाविमर्शस्य तृतीयभेदनिरूपणप्रसङ्गे वारत्रयम् आचार्यशब्देन पाणिनेरुल्लेखो दृश्यते। अम्बिकाकेसरी इत्यत्र विधेयाविमर्शस्य तृतीयः प्रभेदः प्रदर्शितः। समासे विशेषणविशेष्योभयांशसंस्पर्शित्वमस्ति। तथापि यदा विशेषणांशः स्वाश्रयोत्कर्षाधानमुखेन वाक्यार्थचमत्कारकारणतया प्रधान्येन विवक्षितो विधेयधुराम् अधिरोहेद्, इतरस्त्वनूद्यमानकल्पतया न्यग्भावमेव भजेत्, तदा नासौ वृत्तेविर्षयो भवितुमर्हति। अम्बिकाकेसरीत्यत्र विशेषणभूतायाः अम्बिकायाः प्राधान्यं विवक्षितमस्ति। अतोऽत्र समासेन अम्बिकायाः विवक्षितः प्रधानभावः अस्तंगच्छतीति दोषः। ननु सर्वत्र विशेषणस्य अवच्छेदक इति नित्यं गुणभावः, विशेष्यस्य च विधेयत्वं सिद्धं तत् कथमेकत्र तस्य गुणभावः अपरत्र तस्य विधेयत्वमिति युज्यते चेदुच्यते। एकत्र तयोः प्राधान्याप्राधान्यभावः वास्तविकः। अपरत्र तु वैवक्षिकः। अतः वस्त्ववस्तुनोर्विरोधो न भवति। परमनयोः फलभेदस्त्वस्त्येव। एकस्य हि सकलजगद्गम्यः शाब्दिकैकविषयः पदार्थसम्बन्धमात्रम्। अपरस्य पुनः कतिपयसहृदयसंवेदनीयः सन् कवीनामेव गोचरो वाक्यार्थचमत्कारातिशय इति फलभेदः।

महाकविप्रयोगेभ्यः सर्वेषु समासेषु विद्यमानान् एतादृशान् दोषान् महिमभट्टः विस्तरेण प्रदर्शयति। विशेषणानां विवक्षाकृतं प्राधान्यं प्रकाशयितुं तत्र विभक्तेः प्रयोगोऽपेक्षितः। विभक्त्यन्वयव्यतिरेकानुविधायनी हि विशेषणानां विधेयतावगतिः। महिमभट्टस्यामुं विचारं समर्थयितुमसौ पाणिनेरपि सम्मतिं प्रदर्शयति। तद्यथा – "एतदाचार्यस्याप्यनुमतमेवेति ज्ञायते। यदयं "वृषल्याः कामुको" "दास्याः पुत्र" इत्यादौ कामुकादेराक्रोशादपकर्षप्रतिपत्तये समासेऽपि विभक्तेरलुकमाह।" इति।(4) आचार्योऽत्र पाणिनिरेव। तेनैव 'षष्ठ्या आक्रोशे'(5) इति आक्रोशार्थे षष्ठीविभक्तेः समासेऽपि श्रूयमाणत्वमुक्तम्। 'पुत्रेऽन्यतरस्याम्'(6)

इति सूत्रेण दासीपुत्र इत्यपि प्रयोगः क्षेपेऽर्थे विद्यते। विभक्त्यन्वयव्यतिरेकानुविधायिनी हि विशेषणानां विधेयतावगतिरिति तत्कथं युज्यते इति सन्देहः। अत्र महिमभट्टो वदति यद् दासीपुत्र इति लुप्तविभक्तिकात् आक्रोशार्थस्य अवगतिः नैव भवति। यदि लुप्तविभक्तिकात् अपि आक्रोशार्थस्य अवगतिः स्यात्तर्हि 'षष्ठ्या आक्रोशे' इति सूत्रस्यारम्भ एव प्रयोजनरहितः स्यादिति। अतः दासीपुत्रः इत्यस्मात् पदात् पुत्रस्य स्वरूपमेव प्रतीयते नाक्रोशोऽपि। तस्मात् समासे विभक्तिलोपात् विशेषणस्य उत्कर्षापकर्षावगतिः न भवति। उत्कर्षापकर्षनिबन्धना रसादिप्रतीतिरपि न सम्भवति। तेन च रसात्मनः काव्यस्यायं विधेयाविमर्शो दोषः। कृत्तद्धितयोरपि अयमेव नियमः।

अत्र पुनरपि आचार्यपदेन पाणिनेरुल्लेखं करोति महिमभट्टः। "ननु चाचार्येणैवानिष्टनिवृत्त्यर्थं समासविधौ बहुलग्रहणं कृतम्। अतस्तेनैव क्वचिदेवंविधे विषये वृत्तिर्न भविष्यत्यन्यत्र भविष्यतीति किमनेन प्रधानेतरभावकल्पनाप्रयासेन।" इति।(7) 'विशेषणं विशेष्येण बहुलम्'(8) इति सूत्रं वर्तते। अनेनैव सूत्रेण समासस्य विधिः निषेधो वा भविष्यति। पुनः किमर्थं विशेषणस्य प्राधान्यविवक्षायां समासनिषेधः, तदभावे च समासविधिरिति अपूर्वः नियम इति पूर्वपक्षिणां प्रश्नः। उत्सर्गापवादयोरेवायं विषयः न तु बहुलस्य इति महिमभट्टस्य समाधानम्। यत्र क्वचिद् उत्सर्गापवादयोः विषयव्यवस्थानियमः कथञ्चनापि कर्तुमशक्यः स बहुलस्य विषयः। अत्र तु विशेषणविशेष्ययोः उत्कर्षापकर्षप्रतीतिरहिते स्थले समासविधिः उत्सर्गः। विशेषणस्य उत्कर्षस्थले अपकर्षस्थले वा एकार्थीभावस्याभावेन समासस्यापवादः। एवम् अत्र उत्सर्गापवादभावः स्पष्ट एव। अतः नायं बहुलस्य विषयः। विशेषणं विशेष्येण बहुलमिति नात्र घटते। तस्माद् अम्बिकाकेसरी इति प्रयोगे विधेयाविमर्शाख्यो दोषः अस्त्येव। अम्बिकायाः केसरीति वाक्ये उत्कर्षप्रतीतिः अस्त्येव।

'षष्ठ्या आक्रोशे' इति सूत्रेण वृषल्याः कामुकः इति समासे विभक्तेः अलुकं यद्यपि प्रदर्शितवान्, तथापि अनुपदमेव पुत्रेऽन्यतरस्याम् इति सूत्रेण दासीपुत्रः इत्युदाहरणेऽपि क्षेपार्थत्वं पाणिनिः स्वीचकार। 'विशेषणं विशेष्येण बहुल'मिति सूत्रेण समासनिषेधोऽपि साधितः। पुनः उत्कर्षापकर्षप्रतिपादने एव वृत्तेरभावः अन्यथा तु वृत्तिर्भवति इति नियमस्य प्रमाणं किमिति सन्देहः। महिमभट्टेन इदं स्वकपोलकल्पितमिति पाणिनेराचार्यस्य अत्र अनुमोदनं नास्ति इति दोषस्य परिहारोऽपि अनेनोच्यते – न चायमर्थः स्वमनीषिकयैवास्माभिरूपकल्पितः किन्तर्हि, आचार्यस्याप्यभिमत इति। यदयं समासविधौ समर्थग्रहणं कृतवान्।" इति।(9) एवं प्रकरणेऽस्मिन् तृतीयं वारं महिमभट्टः आचार्यशब्देन महर्षेः पाणिनेः उल्लेखं चकार। समासविधेः प्रधानेतरभावविवक्षानिबन्धनतत्प्रतिषेधस्य च उत्सर्गापवादभावेनावस्थानम् इत्येवंरूपः अर्थः महिमभट्टेन स्वमनीषिकया नोपकल्पितः। अयमर्थः पाणिनेरप्यभिमत आसीत्। अत एवासौ 'समर्थः पदविधिः'(10) इति सूत्रे समर्थग्रहणं कृतवान्। तेन च सापेक्षतादिदोषान्तरव्यावृत्त्या सह एतस्य प्रधानेतरभावस्यापि व्यावृत्तिम् मनसि निधाय महर्षिः पाणिनिः सूत्रे समर्थग्रहणं कृतवानित्यवगन्तव्यम्। केवलं तदभिप्रायमनवगच्छद्भिः व्याख्यातृभिः एतन्न व्याख्यातम्। वस्तुतः महर्षेः पाणिनेः अभिप्रायबाह्यं किमपि महिम्ना नोक्तम् इत्यसौ वदति।

प्रकरणेऽस्मिन् आचार्यस्य महिमभट्टस्य सूक्ष्मेक्षिका अस्माभिरनुभूयते। महिमभट्टस्य कुशाग्रा धिषणा कस्यापि विषयस्य अन्तस्तलं यावद् गच्छति। सहृदयशिरोमणिरसौ व्याकरणाचार्योऽपि वर्तते। पाणिनेः व्याख्यातृभिः अदृष्टमप्यर्थं अष्टाध्यायीसूत्रेषु असौ पश्यति।

महिमभट्टेन स्वयं प्रतिज्ञायते यद्व्यक्तिविवेकः काव्यालङ्कारो भवतीति।(11) काव्यशास्त्रसिद्धान्ताः गहनतया सूक्ष्मतया चात्र निरूपितासन्ति। परं

ग्रन्थस्यास्यानुशीलनेनावगम्यते यदत्र व्याकरणविषयकाः विचारा अपि तथैव सूक्ष्मतया गहनतया च निरूपिता सन्तीति।

प्रक्रियासर्वस्वकारः नारायणभट्टपादः द्वयोः सन्दर्भयोः महिमभट्टस्य व्याकरणविषयकान् विचारान् अनुमोदते, व्याकरणगुरुपरम्परायाम् महिमभट्टस्य अन्तर्भावं च करोति।

शब्दानां व्युत्पत्तौ यः कश्चिदर्थः निबद्धनं स्यात्। प्रवृत्तौ तु सत्तासादनलक्षणा एका क्रियैव निबद्धनं भवतीति महिमभट्टस्य सिद्धान्तः अस्माभिः दृष्ट एव। तस्यामेव क्रियायां क्विबाद्याः प्रत्ययाः कर्तृमात्रतः विधेयाः। सिद्धान्तममुम् अनुमोदयन् नारायणभट्टपादः प्रक्रियासर्वस्वे वदति –

कर्तुस्तदात्मताभावे क्विप्क्यङौ महिमाब्रवीत्।
न तूपमानादाचारे तयोरर्थात् प्रतीतितः॥
दयार्द्रो भवतीत्यर्थे दयार्द्रति जनार्दनः।
एवं घटति मृतपिण्डः परिपक्वति दाडिमः॥
कृष्णत्यर्जुन इत्यादौ मुख्यतद्भावबाधनात्।
तद्वदाचरतीत्यर्थो लभ्यते लक्षणावशात्॥
क्यङि चैवं भवेद्भ्वर्थे मृत्पिण्डोऽयं घटायते।
विरलायत इत्यादिश्चैवं सिद्ध्येदयत्नतः॥
आचारार्थेऽपि वा भ्वर्थो निर्वाह्यो भेदकल्पनात्।
योऽन्यो दयार्द्रास्तत्तुल्यमाचरन् हि दयार्द्रति॥ इति।(12)

अत्र न तूपमानादाचारे तयोरर्थात्प्रतीतितः इति सम्पूर्णः पादः व्यक्तिविवेकात्तथैव स्वीकृतोऽस्ति।

एवमेव प्रक्रियासर्वस्वस्य समासखण्डेऽपि महिम्नः उल्लेखोऽस्ति। तद्यथा –

सामर्थ्यादुपमानेनैवास्य नित्यसमासगीः।
न तद्विशेषणैः शब्दैर्नवीनमिव पङ्कजम्॥
नवीनं पङ्कजमिवेत्यर्थो वाच्यो हि सर्वथा।
पूर्वैकपद्ये तन्न स्यात् पृथगेव पदं ततः॥
महिमा त्वीदृशस्थानेष्विवशब्दं निनिन्द, तत्।
युक्तं नित्यसमासत्वात् प्रयोगाः किन्तु दुस्त्यजाः॥ इति।[13]

उपमानवाचिना पदेनैव इवशब्दस्य प्रयोगो युक्तः। न तु तद्विशेषणैः इति महिमभट्टस्य मतमत्र अनूदितमस्ति। क्रमभेदस्य अनौचित्यस्य निरूपणे –

उत्खाततद्रुममिव शैलं हिमहतकमलाकरमिव लक्ष्मीविमुक्तम्।
पीतमदिरमिव चषकं बहुलप्रदोषमिव मुग्धचन्द्रविरहितम्॥

इति श्लोके प्रथमः इवशब्दः शैलम् इत्यनन्तरमेव युज्यते। न तु द्रुममिव इति। अतोऽत्र क्रमभेदो दोषः। उपमानवाचिभ्यः शब्देभ्य एवानन्तरमिवशब्दः प्रयोक्तव्यः न साधारणधर्मवाचिभ्यः शब्देभ्य इति महिमभट्टस्य सिद्धान्तमेव नारायणभट्टपादः स्वीकरोति।

एवं व्यक्तिविवेकाख्यो निबन्धः व्याकरणशास्त्रप्रतिपादकोऽपि भवति। महिमभट्टश्च व्याकरणाचार्येषु गणनीय इति निबन्धेऽस्मिन् प्रतिपादयितुं प्रयासः कृतः।

**पादटिप्पण्यः**

(1) व्यक्तिविवेकः महिमभट्टः मधुसूदनीव्याख्यासहितः
जयकृष्णदासहरिदासगुप्तः चौखम्बा संस्कृत सीरीज़ आफीस्, बनारस्
1940, पृष्ठसंख्या – 23-31

(2) तत्रैव पृष्ठसंख्या – 35

(3) तत्रैव पृष्ठसंख्या – 35

(4) तत्रैव पृष्ठसंख्या – 207

(5) अष्टाध्यायी – 6-3-21

(6) तत्रैव – 6-3-22

(7) व्यक्तिविवेकः पृष्ठसंख्या - 227

(8) अष्टाध्यायी – 2-1-57

(9) व्यक्तिविवेकः पृष्ठसंख्या - 228

(10) अष्टाध्यायी – 2-1-1

(11) इति श्रीराजानकमहिमभट्टविरचिते व्यक्तिविवेकाख्ये काव्यालङ्कारे . ...... प्रथमो विमर्शः। पृष्ठसंख्या - 148

(12) प्रक्रियासर्वस्वम् नारायणभट्टपादः सम्पादकः के.पि.नारायणपिषारटी, गुरुवायूर् देवस्वम् प्रकाशानम्, 1998, पृष्ठसंख्या 532

(13) तत्रैव – पृष्ठसंख्या - 340


*************

# रससूत्रव्याख्याने नव्यमतस्य विमर्शः

**डा. राघवेन्द्रभट्टः**

**साहित्यविभागाध्यक्षः**

काव्यस्य मुख्योऽर्थः रसः । भरतमुनिः रसमसूत्रयत् 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति । तदिदं सूत्रं अनेके काव्यविदो व्याख्यन् । तेनास्य नैकानि मतानि समजायन्त यानि वादनाम्ना प्रसिद्धानि । तत्र भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादः नव्यानां भ्रान्तिवादश्चेति प्रसिद्धानि पञ्च मतानि । सूत्रस्थितयोः संयोगनिष्पत्योः पदयोः निर्वचनवैषम्यात् मतबहुत्वमजायत । तेषु मतेषु रसगङाधरोक्तं नव्यानां मतम् अत्र प्रस्तूयये । दोषवशाद् मिथ्याभूतविभावादिभ्यो रसप्रतीतिरिति सूत्रार्थस्य व्याख्यातत्वात्, अर्थात् सहृदये शकुन्तलाविषयकरतेः भ्रान्त्या उपपादनात् भ्रान्तिवादनाम्ना तन्मतमिदं कथ्यते।

रसगङाधरे पण्डितराजो जगन्नाथः प्रथमानने रसस्वरूपनिरूपणावसरे आभिनवगुप्तं भाट्टनायकञ्च मतं निरूप्य नव्यमतमुपास्थापयत् ' नव्यास्तु - काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु, व्यञ्जनाव्यापारेण दुष्यन्तादिरतौ गृहीतायामनन्तरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः' इति । अस्यायमर्थः – प्रथमं कविः नटश्च तत्तद्रससम्बन्धिनो विभावादीन् प्रकाशयति । तेषां प्रकाशने सति व्यञ्जनाव्यापारेण दुष्यन्ते शकुन्तलाविषयिका रतिर्ज्ञायते । ततः सहृदयः सहृदयतामहिम्ना तान् विभावादीनर्थान् भावयते । तथा भावनं भावनेत्युच्यते। एतद्भावनामहिम्ना सहृदय आत्मानं दुष्यन्तं मनुते । एवमात्मनि

दुष्यन्तत्वप्रकारकज्ञानं यदा जायते तदा दुष्यन्तगतरत्यादिः शकुन्तलाविषयिणी अपि आत्मनि सञ्जायते । एवं प्रकारेण दुष्यन्ताभिन्नसहृदयगतः रत्यादिः शृङ्गारादिरसः इति कथ्यते । अत्र सहृदये दुष्यन्ताभेदः मिथ्याज्ञानम् । भावना तादृशज्ञानं जनयति। अतस्तस्या भावनाया दोषत्वम् । शुक्तिकायां रजतत्वज्ञाने कारणस्य चाकचिक्यस्येव अत्र भावनाया दोषत्वम् । नव्यैः साधारणीकरणं निराकृतम्, साधारणीकरणापेक्षया स्वात्मनि दुष्यन्ताभेदस्वीकारे लाघवात्। साधारणीकरणे च शकुन्तलादिपदार्थाः सर्वे साधारण्येन प्रतीयन्ते । अभेदे तु स्वात्मनि दुष्यन्तमात्रमिति अस्मिन् मते लाघवम् । किञ्च यथा शुक्तौ रजतभ्रमे सति साक्षिभास्यमनिर्वचनीयञ्च रजतमेव प्रातिभासिकसत्तां प्रतिपद्यते, तथा विलक्षणभावनारूपदोषेण सहृदये जायमानात् शकुन्तलाविषयकरति-द्वद्दुष्यन्तभ्रमकारणात् रत्यादी रसतां प्रतिपद्यते ।

अत्र शङ्का- शकुन्तलाविषयकरत्यादिः दुष्यन्तस्येव सहृदयस्य आनन्दजनकश्चेदस्तु, शोकादिः कथं सहृदयस्य आनन्दजनकः स्यात् इति । यतः शोकादिः नायके दुःखजनकत्वेन स्थितः सहृदयेऽपि दुःखजनकत्वेनैव सङ्गतः स्यादित्यर्थः। ननु वास्तविकस्यैव शोकादेः दुःखजनकत्वं न तु कल्पितस्य तस्येति न वाच्यम् । रज्जौ सर्पज्ञानाद् भयस्योत्पत्तेः । इति चेदत्र इदं समाधानम् – यदि शृङारप्रधानकाव्येभ्यः इव करुणप्रधानकाव्येभ्योऽपि सुखमेव जायते इत्यनुभवः तर्हि करुणस्थले दुःखप्रतिबन्धकत्वं कल्पनीयम् । यदि दुःखं जायते इत्यनुभवस्तर्हि तदपेक्षया सुखस्य आधिक्येन अनुभूयमानत्वात् सहृदयस्य तत्रापि प्रवृत्तिरिति न दोषः। न च तत्र प्रतिबन्धकत्वकल्पना । पर्यन्ते पुनः शोकादेः आह्लादजनकत्वमेव । तत्र कारणमुक्तं पण्डितराजेन 'अयं हि लोकोत्तरस्य काव्यव्यापारस्य महिमा, यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आह्लादमलौकिकं जनयन्ति । विलक्षणो हि कमनीयकाव्यव्यापारज आस्वादः प्रमाणान्तरजादनुभवात्' इति । तत्र

पुनः जायामानाः अश्रुपातादयः कथमुपपद्यन्त इति चेत् तत्तदानन्दानुभूतेरनुभावास्ते न तु दुःखस्येति मन्तव्यम् । ननु भावनया शकुन्तलादेः साधारण्यमेवोच्यतां दुष्यन्ताभेदज्ञानकल्पना कस्मादिति चेदुच्यते । साधारण्यप्रसङ्गे शकुन्तलाप्रभृतीनां बहूनां पदार्थानां साधारणीकृतिः कल्पनीया । तदपेक्षया दुष्यन्तमात्रस्याभेदज्ञानस्याङ्गीकारे लाघवमस्तीति अभेदज्ञानकल्पनमेवोचितम् ।

एतन्मतानुसारं सूत्रव्याख्या इत्थं सिद्ध्यति – विभावानुभावव्यभिचारिणां संयोगात् भावनारूपदोषविशेषात् रसस्य दुष्यन्ताद्यभिन्नत्वेन गृहीते सहृदये वर्तमानस्य रत्यादेः निष्पत्तिः उत्पत्तिः । ननु निष्पत्तिशब्दस्य उत्पत्तिरिति अर्थः क्रियते चेत् रत्यादिकार्यं प्रति योऽनुभावस्तस्य कारणत्वं न स्यात् रसस्य च कार्यत्वापत्तिरिति चेदत्र समाधानम्- दुष्यन्तगतरत्यादिं प्रति कार्यस्यापि अनुभावे सहृदयगतरत्यादिं प्रति कारणरूपेणैव तिष्ठति । अतो न दोषशङ्का कार्या । किञ्च भावनाया दोषत्वन्तु नव्यैरिव साधारणीकृतिवादिभिरपि अङ्गीकर्तव्यमेव ।

एवं रसगङ्गाधरे निरूपितं नव्यमतमत्र प्रस्तुतम् । परमार्थतो विचारे क्रियमाणे अस्मिन् मते अस्वारस्यं लक्ष्यते। तथा हि सहृदये दुष्यन्ताभेदबुद्धिः भ्रान्तिरूपेत्युक्तम् ।यदि तथा, भ्रान्त्यर्थं सहृदयस्य प्रवित्तिर्दुरुपपादा । तेन च करुणे पुनः आत्मनि नायकाभेदबुद्धिरेव न स्यात् । ततः करुणप्रधाने काव्ये सहृदयस्य जायामाना प्रवृत्तिरेव न सङ्गच्छेत । किञ्च यदुक्तं साधारणीकृतिवादिभिरपि भ्रान्तिरङ्गीकर्तव्या इति तदपि न चारु । साधारणीकृतौ शकुन्तलायाः स्त्रीसाधारणेति ग्रहणम् । तत्र शकुन्तलात्वप्रकारतया स्त्रीत्वधर्मस्य ग्रहणात् स्त्रीत्वस्य च विद्यमानस्यैव व्यापकधर्मस्य स्वीकाराच्च नात्र भ्रान्तिः । भ्रान्तिस्तु अतस्मिंस्तद्बुद्धिः । व्याप्यशकुन्तलात्वधर्मविशिष्टे व्यापकस्त्रीत्वधर्मस्य ग्रहणमिति नात्र तथा । एवं रससूत्रव्याख्यानं नव्यमतानुसारि न हृदयङ्गममिति दिक् ।

**परिशीलितग्रन्थसूची**

१.रसगङ्गाधरः चन्द्रिकाव्याख्योपेतः

२. रसगङ्गाधरः मर्मप्रकाशव्याख्योपेतः

३. काव्यप्रकाशः वामनीटीकोपेतः

४.नाट्यशास्त्रम् अभिनवभारतीसहितम्

५.ध्वन्यालोकः लोचनसहितः

६.शाब्दतरङ्गिणी

७. मीमांसायां काव्यशास्त्रे च वृत्तिः

८. साहित्यवल्लरी

*******

# ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्

डा. चन्द्रकला आर्. कोण्डी

काव्यशास्त्रे अङ्गीकृतेषु अभिधा-लक्षणा-व्यञ्जनानामकेषु त्रिषु व्यापारेषु सङ्केतितार्थाभिधायकत्वम् अभिधाव्यापारस्य, मुख्यार्थस्य बाधे जाते तत्समीकर्तुं तत्सम्बद्धत्वेन अन्यार्थस्य लक्षकत्वं लक्षणाव्यापारस्य, प्रयोजनप्रत्यायकत्वं व्यञ्जनाव्यापारस्येति व्यवस्था । किन्तु प्रयोजनरूपार्थस्य प्रत्यायनार्थं व्यञ्जनाया आवश्यकतां निराकुर्वन्तः अभिधयैव तन्निर्वर्त्यत इति केचन, लक्षणया निर्वर्त्यत इति अपरे प्रतिपादयन्ति । 'सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार' इत्युक्त्वा यावन्तोऽर्थाः शब्दस्य, तावन्तः अभिधयैव ज्ञायन्त इति केचन वदन्ति । 'यत्परः शब्दः स शब्दार्थ' इति वदतां मतेऽपि अभीप्सितार्थस्यैव शब्दार्थत्वादभिधाया एव तत्र प्रवृत्तिः । केषाञ्चन मते बाधितार्थसमीकरणाय प्रयुज्यमाना लक्षणा प्रयोजनमपि लक्षयति, अतः व्यञ्जनाया नावश्यकता ।

एवं वदतां व्यञ्जनाविरोधिनां मतानि 'गङ्गायां घोष' इत्येतत् प्रयोजनवल्लक्षणाया उदाहरणं पुरस्कृत्य सयुक्ति निरस्तानि मम्मटाचार्येण काव्यप्रकाशे । अस्मिन् प्रयोगे मुख्यार्थस्य प्रवाहस्य घोषाधिकरणत्वं न सिद्ध्यतीति, लक्षणया तटः लक्ष्यते । यत् प्रयोजनम् उद्दिश्य 'गङ्गातटे घोष' इत्येनं मुख्यं प्रयोगं त्यक्त्वा 'गङ्गायां घोष' इति अमुख्यप्रयोगः कृतः तस्य प्रयोजनस्य प्रतीतिः व्यञ्जनयैव भवति । 'प्रयोजनं व्यञ्जनाव्यापारगम्यमेव' इत्युक्त्वा मम्मटाचार्येण तद्विरोधिमतानि निरस्तानि । प्रयोजनं सङ्केतितं न भवतीति तत्र न अभिधा,[1] मुख्यार्थबाधादिहेत्वभावात् न लक्षणा[2] इति । एवं प्रयोजनप्रत्यायने अभिधां लक्षणां

---

[1] नाभिधा समयाभावात् । काव्यप्रकाशे द्वितीयोल्लासे

[2] हेत्वभावान्न लक्षणा । तत्रैव


च निरस्य इतोऽपि कश्चन वादस्तेन प्रस्तुतः निराकर्तुम् । स एव विशिष्टलक्षणावादः । एतेषां मते गङ्गाशब्दस्य प्रवाहार्थे अस्तु बाधः, तत्समीकर्तुमारोपितया लक्षणया शीतत्वपावनत्वादीनामपि सङ्ग्रहो भवति । अर्थात् प्रवाहार्थे बाधिते सति केवलं तटः न लक्ष्यते, किन्तु 'शीतत्वपावनत्वादिविशिष्टतटः' लक्ष्यते । अनेन शीतत्वपावनत्वादीनामतिशयप्रत्यायनाय व्यञ्जनाया अङ्गीकारस्यावश्यकता नापतति ।

एतन्निराकृतं मम्मटाचार्येण 'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्' इत्यनया युक्त्या । तच्च वृत्तौ नैयायिकानां मीमांसकानाञ्च मताधारेण स्पष्टीकृतम्- 'प्रत्यक्षादेः नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा' इति । ज्ञानस्य विषयः घट-पट-नीलादिरिति उभयमतेऽपि समानम् । किन्तु फलं नैयायिकानां मते 'संवित्तिः (अनुव्यवसायः)' मीमांसकानां मते 'प्रकटता' ।


**नैयायिकानाम् अनुव्यवसायसिद्धान्तः-**

न्यायसिद्धान्तानुसारं प्रथमतः विषयात्तस्य ज्ञानं जायते (घटरूपविषयात् घटज्ञानमिव ) । घट-नीलादिविषयास्तु प्रत्यक्षप्रमाणेनैव गृह्यन्ते । परन्तु 'ज्ञानस्य ज्ञानम्' (घटज्ञानं मम जातम्-इत्यत्र 'घटज्ञानम्' प्रथमं ज्ञानम्, 'तज्ज्ञानं मम जात'मिति द्वितीयं ज्ञानम् । एवं घटज्ञानस्य ज्ञानम्) कथं जायते इत्यस्य प्रश्नस्य समाधानार्थं नैयायिकैः अनुव्यवसायस्य कल्पना कृता । 'ज्ञानस्य ज्ञानम्' इत्येष एव 'अनुव्यवसाय'पदार्थः । प्रथमतया जायमानं 'अयं घट' इति ज्ञानं व्यवसायात्मकम् । तदनु जायमानं 'घटमहं जानामि' इत्येतत् अनुव्यवसायात्मकम्, व्यवसायात्मकं ज्ञानमनुसृत्य जायत इति । 'अयं घट' इत्यस्य ज्ञानस्य विषयः घटः । 'घटमहं जानामि' इत्यस्य अनुव्यवसायात्मकज्ञानस्य विषयः 'घटज्ञानम्' । एवं व्यवसायात्मकज्ञानस्य विषयः घटादिः, अनुव्यवसायात्मकज्ञानस्य विषयः

घटादिविषयज्ञानम् । व्यवसायात्मकं ज्ञानं 'अयं घटः' इत्यादिकं विषयादुत्पद्यते । अनुव्यवसायात्मकं ज्ञानं व्यवसायात्मकज्ञानात् उत्पद्यते । तस्य प्रक्रिया एवम्-




**मीमांसकानां प्रकटतासिद्धान्तः-** नैयायिकानां संवित्तिसिद्धान्तात् सिद्धान्तात् मीमांसकानां प्रकटतासिद्धान्तः भिद्यते । नैयायिकैर्योऽनुव्यवसायसिद्धान्तोऽङ्गीकृतः तत्स्थाने मीमांसकाः 'ज्ञातता'रूपधर्मस्य उत्पत्तिं मन्यन्ते । 'अयं घटः' इतिज्ञानानन्तरं 'ज्ञातो मया घटः' इत्याकारिका प्रतीतिर्भवति । अस्यां प्रतीतौ घटे वर्तमानो 'ज्ञातता'धर्मः भासते । एष धर्मः घटे घटज्ञानात् पूर्वं नासीत् । घटज्ञानानन्तरमेव घटे स धर्म उत्पन्नः । अतः घटज्ञानजन्यः स ज्ञाततार्धर्मः । अतः घटज्ञानमेव ज्ञाततार्धर्मस्य कारणम् । कारणं विना कार्यं नोत्पद्यतेऽतः घटज्ञानं विना घटे ज्ञाततार्धर्मोत्पत्तिरूपकार्यमपि न भवति । किन्तु घटे ज्ञातताधर्म उत्पन्नः । स च धर्मः 'मया घटो ज्ञात' इत्यस्यां प्रतीतौ भासमानो वर्तते । अतः तस्य कारणं ज्ञानम् अवश्यं भवत्येव । एवं 'ज्ञातता'या 'अन्यथा अनुपपत्त्या' तया (ज्ञाततया) ज्ञानस्य ग्रहणं भवति ।




एवं ज्ञानस्य विषयः यद्यपि एक एव उभयोर्मते तथापि फलविषये भेदा दृश्यन्ते-

१. नैयायिकानां मते संवित्तिः (अनुव्यवसायः) घटादिज्ञानस्य फलम् । मीमांसकानां मते प्रकटता ।

२. नैयायिकानां मते संवित्तिः (अनुव्यवसायः) ज्ञातृधर्मः । मीमांसकानां मते प्रकटता ज्ञेय(घटादि)धर्मः ।

३. नैयायिकानां मते संवित्तिः (अनुव्यवसायः) साक्षात् फलम् अर्थात् 'घटमहं जानामि' इति ज्ञानमेव फलम् । मीमांसकानां मते प्रकटता 'मया घटो ज्ञात' इत्यस्मिन् ज्ञाने भासमानो धर्मः ।

एतदाधारीकृत्य मम्मटाचार्येण विशिष्टलक्षणावादः निराकृतः । ज्ञान-फलयोर्भेदः त्रिधा सम्भवति-

१. घटादिज्ञानं व्यवसायात्मकम्, तत्फलं 'घटमहं जानामि'इत्यनुव्यवसायात्मकम् इति ज्ञानफलयोः **स्वरूप**भेदः ।

२. व्यवसायात्मकज्ञानस्य विषयः 'घटादिः', अनुव्यवसायात्मकज्ञानस्य विषयः 'घटादिविषयज्ञानम्' इति ज्ञानफलयोः **विषय**भेदः ।

३. विषयः ज्ञानात्पूर्वमेव भवति, फलं तु ज्ञानानन्तरं भवतीति तयोः **काल**भेदः ।

एवं ज्ञानस्य विषय-फलयोर्भेदस्तु सिद्ध एव । यतः ज्ञानस्य विषयः घटादिः ज्ञानात् पूर्वमेव भवति । अतः ज्ञानस्य कारणं तत् । घटस्य ज्ञानानन्तरमेव तस्य प्रकटता संवित्तिर्वा जायत इति हेतोः फलं ज्ञानस्य कार्यम् । अतः ज्ञानस्य विषय-फलयोः समानकालिकत्वं नास्त्येव ।

'गङ्गायां घोष' इत्यत्र यदुक्तं विशिष्टलक्षणावादिना शीतत्वपावनत्वादिविशिष्टतटः लक्ष्यते इति तन्न सम्भवति । यतः मुख्यार्थे प्रवाहे बाधिते सति प्रयुक्तः लक्षणाव्यापारः तटमेव लक्षयितुं शक्नोति, न तु शीतत्वपावनत्वाद्यतिशयम् । तत्र प्रक्रिया एवं भवति-लक्षणया तटज्ञाने जाते तत्रस्थे घोषे शीतत्वपावनत्वादीनामतिशयस्य प्रकटता संवित्तिर्वा बुद्धौ जायते । तटज्ञानाभावे मुख्यार्थबाधस्य स्थितत्वात् शीतत्वपावनत्वादीनामतिशयस्य भानमेव न भवति । तस्य ज्ञाने जात एव 'वक्तुर्विवक्षा गङ्गातटे घोष इत्येव यद्यपि वर्तते, तथापि गङ्गायां घोष इति प्रयोगः शीतत्वपावनत्वादीनामतिशयस्य प्रतीत्यर्थ'मिति बुद्धौ भासते । एवं गङ्गाशब्दस्य लक्षणाजन्यज्ञानस्य तटः विषयः शीतत्वपावनत्वादीनामतिशयः फलम् । तेन तटस्य शीतत्वपावनत्वादीनामतिशयस्य च समानकालीनता निरस्ता । अत एव शीतत्वपावनत्व-विशिष्टतटः लक्ष्यते इत्येतन्न सङ्गच्छते ।

काव्येष्वपि यत्र लक्षणामूलव्यञ्जना भवति तत्र एतदनुभूयत एव । उदाहरणार्थं कश्चन केनचित् अत्यन्तम् अपकृतः दूयमानमनसा अपकारिणं प्रति एवं वक्ति-

**उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।**
**विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम् ॥** [1]

---

[1] काव्यप्रकाशः-४/२४ अत्यन्ततिरस्कृतवाच्यस्योदाहरणत्वेन दत्तं पद्यम् ।

अत्र भवता मम कृते बहु उपकारः कृतः, तद्विषये किं वा वक्तव्यम्, भवतः सुजनता सर्वत्रापि प्रथिता वर्तते, हे सखे एवमेव कार्याणि कुर्वन् शतं वर्षाणि यावन्ति जीवनं यापयतु इति । अविवक्षितवाच्यध्वनिः यः लक्षणामूलः भवति तस्य अत्यन्ततिरस्कृतवाच्यध्वनेः इदमुदाहरणं भवति । उपकृतमित्यस्य पदस्य अत्र विपरीतलक्षणया अपकारः अर्थः । तर्हि अपकृतमित्यनुक्त्वा उपकृतमिति उक्तस्य फलं तत्कृतापकारस्यातिशयः । अपकारपदप्रयोगे केवलमपकार एव ज्ञातः स्यात् । किन्तु तस्यातिशयः तद्विरुद्धार्थकपदप्रयोगेणैव स्यादिति तथा प्रयोगः । अत्र उपकृतमित्यस्य पदस्य मुख्यार्थे बाधिते विपरीतलक्षणया अपकार एव लक्ष्यते, अपकारस्यातिशयः तस्य फलम् । अतः विशिष्टलक्षणया अतिशयितापकारः लक्ष्यत इत्येतन्न सङ्गच्छते । इति शम् ।

***********

# काव्यमार्गे स्वरो न गण्यते

**डा. कोम्पेल्लि विनयकुमारः**

"काव्यमार्गे स्वरो न गण्यते" इत्ययं विषयः अभिधामूलव्यञ्जनान्तर्गतः। अभिधामूलव्यञ्जनालक्षणं विश्वनाथाचार्यः साहित्यदर्पणे इत्थं प्रतिपादयामास यत् -

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**

**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया।।इति।। (सा.द.द्वि.प.14)**

एकाधिकस्थले गृहीतशक्तिकत्वात् बह्वर्थस्य विष्णु-सिंह-कपि-शुक-भेक-इन्द्र-चन्द्र-सूर्य-यम-वायु-अश्वप्रभृत्यनेकाभिधेयस्य हरिशब्दस्य एकस्मिन् अर्थे संयोग-वियोगप्रभृतिनियामकपदार्थैः करणैः नियन्त्रिते (अभिधया नियम्य प्रतिपादिते सति) अन्यस्य ज्ञानस्य कारणं सा वृत्तिः अभिधामूलव्यञ्जना इति। अर्थात् संयोगादिनियमितभिन्नशक्यार्थप्रतिपादकत्वम् अभिधामूलव्यञ्जनात्वम् इति।

नानार्थकस्थले मम्मटादिभिः कतिपयैः आचार्यैः ततः प्राग्वर्तिभिः शास्त्रकारैश्च शक्तिनियामकाः संयोगादयः निरूपिताः। तेषां च परिगणनं भर्तृहरिणा वाक्यपदीये ग्रन्थे एवम् अकारि –

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वारादयः।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।इति।।**

यत्र अनेकार्थशब्दस्य कतमः अर्थः अत्र विवक्षितः इति सन्देहे निश्चायककारणभूताः संयोगादयः भवन्ति। ते - संयोगः = सम्बन्धः, विप्रयोगः = विश्लेषः, साहचर्यम् = सान्निध्यम् , विरोधिता = बध्यघातकभावादिः, अर्थः = प्रयोजनम् , प्रकरणम् = प्रस्तावः, लिङ्गम् = वस्तुचिह्नम् , शब्दान्तरसन्निधिः = पदान्तरसाचिव्यम् , सामर्थ्यम् = युक्तिः, औचिची = औचित्यम् , देशः = स्थानम् ,

ISSN: 2249-538X 

कालः = नक्तन्दिवादिः, व्यक्तिः = लिङ्गम् , स्वरः = उदात्तादिः इति।

तर्हि भर्तृहरिकारिकायां "कालो व्यक्तिः स्वरादयः" इत्यत्र स्वरस्य उदाहरणं किम् इत्यपेक्षायां साहित्यदर्पणे विश्वनाथाचार्येण कथितं यत् – "स्वरस्तु वेदे एव विशेषप्रतीतिकृत् न काव्ये, इति तस्य विषयो नोदाहृतः" इति। अर्थात् उदात्तानुदात्तस्वरितरूपध्वनिविशेषः स्वरः वेदे एव अर्थविशेषस्य बोधकः, न तु कविकृतकाव्ये इति हेतोः तस्य स्वरस्य विषयो नैव उदाहृतः इति। स्वराणां वेदे स्वार्थनियामकत्वं विशेषप्रत्यायनेन वर्तते। उक्तं च यथा पाणिनीयशिक्षायाम् –

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**

इति।। वेदे स्वरस्य विशेषप्रतीतिकृत्त्वम् उदाहृतम् । यथा "इन्द्रशत्रुर्वर्धस्व" इति वाक्ये "इन्द्रः शत्रुः (शातयिता) यस्य सः इन्द्रशत्रुः" इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरात् शातयितृत्वम् इन्द्रस्य, "इन्द्रस्य शत्रुः (शातयिता) इन्द्रशत्रुः' इति तत्परुषे शातयितृत्वं वृत्रस्य इति शब्दैक्यम् अर्थभेदः।

"इन्द्रशत्रुः" इत्यत्र बहुव्रीहिसमासे तावत् पूर्वपदप्रकृतिस्वरात् इन्द्रपदादेः इकारस्य उदात्तत्वं निर्दिष्टम् , अतः "इन्द्रशत्रुः" इति पदम् आद्योदात्तत्वेन पठ्यते तदा इन्द्रस्य विजयः भवति। तत्पुरुषसमासे तु समासान्तोदात्ततया शत्रुशब्दान्तर्वर्तिनः उकारस्य उदात्तत्वं निर्दिष्टम् अस्ति, तस्मात् अन्तोदात्तत्वेन पठ्यते चेत् इन्द्रशत्रोः विजयः भवति। इत्थं वेदे स्वरभेदात् अर्थनिर्णयः निर्दिश्यते। काव्ये तु न तथा इति।

अतः अयं स्वरः वेदे एव विशेषप्रतीतिकृत् न तु काव्ये इति प्राचीनमतम्। किन्तु कतिपये विचक्षणाः अर्वाचीनाः भट्टचण्डीदासराघवानन्दप्रभृतयः असहमानाः आहुः यत् काव्येऽपि वेदे इव काक्वादिरूपः (काकुः = विकृतस्वरः, तल्लक्षणम् - "भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" इति। आदिपदात् अनुनासिकादीनामपि ग्रहणम् , तद्रूपः) स्वरोऽपि संयोगादिवत् विशेषप्रतीतिकृत् एव। अर्थात् एकतरार्थप्रत्यायकः एव इति।

न केवलं काक्वादिरूपः, अपि तु उदात्तानुदात्तस्वरितरूपः स्वरोऽपि भरतमुनेः पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेव इति। अर्थात् हास्यशृङ्गारयोः स्वरितोदात्तम् , वीररौद्राद्भुतेषु उदात्तस्वरितम् , करुणभीभत्सभयानकेषु उदात्तस्वरितम् उत्पादयेत् इति। यत्र आदौ स्वरितः पश्चात् उदात्तः इति स्वरितोदात्तः इति उपदेशः यः निर्दिष्टः, तत्र सः तदनुसारेण शृङ्गारादिरसविशेषप्रतीतिकृत् एव। एवं स्वरस्य काव्येऽपि विशेषप्रत्यायकत्वेन अर्थनियामकत्वविषये उदाहरणम् उचितमेव इति मन्यमानाः ते भट्टचण्डीदास-राघवानन्दप्रभृतयः प्रस्तुवन्ति यथा –

**मथ्नामि कौरवशतं समरे न कोपात्**
**दुःशासनस्य रुधिरं न पिबाम्युरस्तः।**
**सञ्चूर्णयामि गदया न सुयोधनूरू**
**सन्धिं करोतु भवतां नृपतिः पणेन।। इति।।**

एतत् वेणीसंहारगतं पद्यम्। अत्र काक्वादिरूपः स्वरः 'मथ्नाम्येव' इति विशेषप्रतीतिकृत् एव इति तन्मतम् । तन्निरसितुम् उपक्रमते विश्वनाथाचार्यः - तन्न, तथाहि – "स्वराः काक्वादयः उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति, न खलु प्रकृतोक्तम् अनेकार्थशब्दस्य एकार्थनियन्त्रणरूपं विशेषम्" इति ।

अर्थात् काव्ये वेदे इव स्वरः अर्थनियामकः इति मतं न समीचीनम्। तत्र विश्वनाथाचार्यः युक्तिमाह - काकुप्रभृतयः उदात्तादयः स्वराः वा व्यञ्जनाप्रतिपाद्यरूपं यथा 'न मथ्नामि' इत्यस्य निषेधरूपे वाक्ये विधिरूपं 'मथ्नाम्येव' इति, न तु अभिधेयरूपं विशेषार्थं प्रतिपादयन्ति।

अत्र प्रकरणसाध्यम् अनेकार्थशब्दस्य एकार्थनियन्त्रणरूपं न विशेषभूतम् इति। अनेकार्थस्य शब्दस्य संयोगादिभिस्तु शक्यार्थविशेषः एव प्रतिपाद्यते। अनेकार्थस्य शब्दस्य काक्वादिभिस्तु वृत्त्यर्थविशेषः प्रतिपाद्यते। अतः नैव स्वरस्य

प्रकृतानुसारित्वम् इति।

शक्यार्थविशेषग्रहणे विनिगमनाभावात् वृत्त्यर्थविशेषः कथं ग्रहीतुं न शक्यते? इत्यत आह विश्वनाथाचार्यः – "यदि क्वचित् अनेकार्थशब्दानां प्रकरणादिनियमाभावात् अनियन्त्रितयोः अपि अर्थयोः अनुरूपस्वरवशेन एकत्र नियमनं वाच्यम् , तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः, न च तथा" इति।

अर्थात् यदि काव्ये क्वचित् अनेकार्थशब्दानां प्रकरणादिनियमाभावात् अनियन्त्रितयोः अपि शक्यार्थयोः अनुरूपोदात्तादिस्वरवशेन, द्वयोरप्यर्थयोः मध्ये एकस्य अनुरूपस्वरवशेन इति, एकोच्चारणे द्वयोः अनुरूपस्वरासम्भवात् एकस्मिन्नर्थे नियन्त्रणं कथनीयम् , तदा प्रकरणाद्यनियन्त्रितशक्यार्थयोः स्वरवशात् एकस्मिन् अर्थे नियमनस्वीकारे तादृशकाव्ये श्लेषानङ्गीकारप्रसङ्गः भविष्यति।

श्लेषः नाम -

**वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः।**
**श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा।।**

श्लिष्टैः पदैः अनेकार्थाभिधानं श्लेषः इति लक्षितस्य श्लेषालङ्कारस्य अर्थभेदेन शब्दभेदः इति दर्शने "काव्यमार्गे स्वरो न गण्यते" इति च नये वाच्यभेदेन भिन्नाः अपि शब्दाः यत् युगपदुच्चारणेन श्लिष्यन्ति, भिन्नं स्वरूपम् अपह्नुवते सः श्लेषः इति, क्षीरनीरन्यायेन सम्भवतः अपि भेदस्य अपलापः श्लेषः इति, एकवृन्तगतफलद्वयन्यायेन अर्थद्वयप्रतीतिः श्लेषः इत्यपि अनङ्गीकारस्य प्रसङ्गः स्यात्। यदि प्रकरणादिवशात् एकत्र अनियन्त्रतयोः शक्यार्थयोः स्वरवशात् एकस्मिन् अर्थे नियन्त्रणं स्वीक्रियेत, तदा श्लेषावसरः एव न प्रसज्येत। श्लेषस्तु एकवृन्तगतफलद्वयन्यायेन अर्थद्वयप्रतीतिः भवति।

काव्यप्रकाशेऽपि व्याख्यातमिदं विवरणकारैः - "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायात्  एकेन शब्देन अर्थद्वयप्रतीत्यसम्भवात्, अर्थद्वयप्रतीत्यर्थे (श्लेषस्थले) एकाकारौ द्वौ शब्दौ स्तः इति अवश्यम् अङ्गीकार्यम्।

तौ एकेन प्रयत्नेन एकदा उच्चार्यतया पृथक्तया नानुभूयेते। अर्थात् एकप्रयत्नोच्चार्यतया भिन्नत्वेन अननुभूयमानत्वमेव श्लेषः इति फलितम्। भिन्नसमासादीनाम् उदात्तादिस्वरभेदनियमात् तदनुसारेण उच्चारणे श्लोषाभावप्रसङ्गः भवति, अतः "काव्ये उदात्तादिस्वरविशेषम् अनादृत्य सर्वेष्वेव समादिषु एकविधमेव उच्चारणम्" इति अङ्गीकृतम्। तस्मात् काव्ये उदात्तादिस्वरः निराकृतः इति।

किञ्चित् उदाहरणं यथा –

**प्रवर्तयन् क्रियाः सर्वाः मालिन्यं हरितां हरन् ।**
**महसा भूयसा दीप्तो विराजति विभाकरः।।**

इत्यत्र प्रकरणादिनियमाभावात् द्वयोरपि शक्यार्थयोः राजसूर्ययोः वाच्यत्वेन अर्थश्लेषस्थले "विराजति विभाकरः" इत्यत्र काक्वा न विराजति इति प्रतीत्या सूर्यस्य विराजनाभावसम्भवात् राज्ञः एव तु तत्सम्भवात् राजपक्षनियमत्वेन अनेकार्थवाचनाभावात् श्लेषानङ्गीकारप्रसङ्गः स्यात्, परन्तु न च तथा। यतः स्वरभेदसत्त्वेऽपि महाकविभिः श्लेषाङ्गीकारात् इति।

अतः स्वरस्य अर्थनियामकत्वे श्लेषाप्रसङ्गात् एव एकस्मात् अर्थद्वयप्रतीतिलक्षणस्य श्लेषालङ्कारस्य निरूपणावसरे आचार्याः आहुः यत् – "काव्यमार्गे स्वरो न गण्यते" इति । अर्थात् काव्यसृतौ उदात्तादिस्वरः अर्थनियामकत्वेन न गृह्यते इति न्यायः।


**आधारग्रन्थाः -**

1. साहित्यदर्पणः
2. काव्यप्रकाशः
3. पाणिनीयशिक्षा
4. वेणीसंहारः
5. वाक्यपदीयम्


**********

# कादंबरीसङ्केतविचारः

डा. एम्. श्रीनिवासमूर्तिः

कादम्बर्याः मूलं गुणाढ्यस्य बृहत्कथायां मकरन्दिका- उपाख्याने दृश्यते । मकरन्दिकोपाख्यानकथासंविधानं बाणेन अनुशीलितं संस्कृतं परिष्कृतञ्च वर्तते कादम्बर्यांम् ।तत्रत्य मकरन्दिका बणभट्टस्य भावनायां कादम्बरी सञ्जाता । मनोरथप्रभा महाश्वेता जाता । सोमप्रभः चन्द्रापीडस्सञ्जातः । रश्मिमान् पुण्डरीको जातः । तत्रत्या चण्डालकन्या अत्र मुक्तालता । बाणेन कादम्बर्यां तस्याः नामकरणं न कृतम् । चण्डालत्वमेव तस्याः पात्रे प्रधानतया स्वीकृतम्। मूले विद्यमानं तस्याः स्वरूपं च सम्पूर्णतया परिवर्तितं वर्तते । मकरन्दिकोपाख्यानस्य मन्त्री प्रभाकरः अत्र शुकनासोऽभवत् । अश्वश्रवो नाम अश्वः ( उच्चैश्रवसः सन्ततिरिति यः प्रोक्तः सः ) कादम्बर्यां इन्द्रायुधनाम्ना विलक्षणशापवृत्तान्तेन कथायां प्राधान्यमूढ्वा चन्द्रापीडस्य वाहनमभवत् ।

एवं मूलकथायां विद्यमानानां पात्राणां नामानि बाणेन परिवर्तितानि । कथायां बहुपरिवर्तनं दृश्यते, कथनेऽपि महान् व्यत्यासः विद्यते। स्थूललक्षणैरेव द्वयोर्मध्ये सादृश्यं न तु तत्त्वतः ।

यदा बाणस्य भावनाप्रपञ्चात् कादम्बरी अवतीर्णा तदारभ्य 'कादम्बरी रसज्ञानाम् आहारोऽपि न रोचते' इति वाक्यं प्रसिद्धिं गतम् । तादृशं वैशिष्ट्यं किमस्ति कादम्बर्यां? इति सन्देहः अवश्यं जायते पाठकानाम्। कथापरिवर्तनेन किमपि प्रयोजनं साधितं स्यात् बाणेन । तत् केवलं साहित्यपरं , कथाप्रतिसन्धानात्मकं भवति चेत् एतावती प्रतिष्ठा लब्धुं न शक्यते । अतः अत्र कथाशिल्पे बाणेन किमपि रहस्यं प्रस्थापितं स्यात् । रामायणमहाभारतादिकथान्तर्गत – आर्षतेजः , सत्यशीलता , जातीयता च तत्र प्रोक्ता स्यात् ।

वेदसंप्रदायप्रवर्तकी विज्ञानशेवलिनी , रसतरङ्गिणी , सौन्दर्यनिर्झारिणी च तत्र भवेत् ।

“ निरन्तररसोद्धारगर्भसौन्दर्यनिर्भरा:
गिर: कवीनां जीवन्ति न कथामात्रमाश्रिता:” ।

इति कुन्तकोक्तदिशा तत्र कथायां किमपि वैशिष्ट्यं स्यात् । तत् किमिति यथाशक्ति यथामति च विचार्यते।

“सोमग्रहांश्च सुराग्रहांश्च गृह्णाति । पुमान् वै सोमः स्त्री सुरा तन्मिधुनम्” इति वैदिकपरिभाषायां स्त्री = सुरा इति पदस्य काव्ये सरसं तत्समानार्थकं नाम वर्तते कादम्बरी इति ।

कथानायिकाया: कादम्बरी इति , नायकस्य चद्रापीडः इति नाम करणेनैव वेदज्ञः जीवितपरमार्थज्ञाता सकलशास्त्रनिष्णातः बाणभट्टः स्वेनोद्दिष्टं कथातत्वं स्फुरयति ।

‘चन्द्रमा मनसो जातः’ इति श्रुत्या चन्द्रः विराट् पुरुषस्य मनस्संजातः इति ज्ञायते । अयमेव ’पुमान् सोमः ’ इति वेदे निर्दिष्टः पुरुषः । उज्जयनीराजकुमारः चन्द्रांशजातः चन्द्रापीडः एव काव्येऽस्मिन् पुरुषः । अयं समस्त पुरुषलोकस्यापि प्रतिबिम्बः । ’स्त्री सुरा ’ इति संकेतेन वैदिकपरिभाषायां प्रोक्ता स्त्री एव अत्र कादम्बरी। एषा समस्तप्राणिलोकगतस्त्रीत्वस्य प्रतिबिम्बः । पुञ्जीभूतसकलजीवलोकस्त्री सौन्दर्यं कादम्बरी । राशीभूतसकलजीवलोकपुरुषसौन्दर्यं चन्द्रापीडः ।

**“द्विधा कृत्वात्मनो देहमर्धेन पुरषोऽवत्।**
**अर्धेन नारी तस्यां स विराजमसृजत् प्रभुः॥“**

इति मनुस्मृति वचनानुसारं स्त्री पुरुषरूपेण परमात्मा द्विधा कृतः इति ज्ञायते ।

सत्यशिवसुन्दररूपस्य पूर्णतत्त्वस्य स्त्रीपुंरूपसौन्दर्ययोः संयोगे विद्यमानः आनन्दः एव रसः भवति चेत् तद् रसस्य समग्रं तत्वमेव काव्येऽस्मिन्

नायिकानायकयोः संयोगः ।

प्रापञ्चिकमायावरणप्रकल्पितवासनानां परम्पराप्रभावेण द्विधाकृतस्य परमेश्वरस्य स्त्रीपुंतत्त्वयोः संयोगस्य विघातः एव दुःखम् । तत्परिहारः एव सुखम् । तदर्थं प्रयत्नः एव जीवलोकस्य कथा । एतत् प्रयत्ने जीविनां बहुषु जन्मसु बहुदेहधारणं , वासनाप्राप्तिः , तद्वासनाक्षयेण तदेकाकार- अखण्डतत्त्वे विलीनत्वात् आनन्दप्राप्तिः च जीवितपरमार्थः ।

प्रकृतौ अन्तर्लीनस्य परमात्मानः दर्शनेन योगिनः आनन्दः जायते । काव्यान्तर्गतरसास्वादनेन सहृदयस्य रसानन्दःजायते। जीवयात्रापरम्परायां मानवः मायावरणे लग्नः गतम् आगामि च जन्म अज्ञात्वा प्रस्तुतजन्मनि अज्ञात्वैव बहूनां जन्मनां फलम् अनुभवन् , पुनः कर्माणि कुर्वन् आगामिजन्मसु वासनाः कल्पयति। एतद् मायावरणम् अपाकर्तुं समर्थम् अमृतस्पर्शं प्राप्नोति चेत् आनन्दः एव सिद्ध्यति। चन्द्रापीडेन तादृशः गुणः सहजतयैव प्राप्तः । पुण्डरीकेण पितृकृतयोगसाधनया प्राप्तः । चन्द्रापीडः पुण्डरीकः च कर्माणां मूलभूतस्य जीवलोकमनस्तत्त्वस्य प्रतिबिम्बः । चन्द्रापीडः परमेश्वरस्य मनसः प्रतिबिम्बभूतं साक्षिचैतन्यं । पुंडरीकः तत्साक्षिचैतन्यस्य प्रतिबिम्बभूतं जीवचैतन्यम् ।

यद्यपि काव्ये नामरूपाभ्यां नायक – उपनायक भेदेन दृश्येते तथापि एतौ प्रत्येकस्मिन् अपि मानवे विद्यमानस्य द्विविध मनस्तत्त्वस्य प्रतिबिम्बभूतौ । सर्वस्यापि मानवस्य जन्मपरम्पराणां कथा इयम् । अत एव विचारशीलानां बुद्धिमतां भारतीयानां सहृदयानां आत्मीयकथा एषा चिरस्थानं प्रप्तवती।

अत्र कथा दिव्यादिव्या वर्तते । दिवः भुवश्च कथा । मानवमनसि स्थितानां इहपरकमनानां कथा । इहजीवितवलयस्य उपरि वलयं परजीवितं । एतदिहपरजीवितवलयाश्रितं भवति विधिवलयं । ऐहिकवलयं जीविनः कर्मभूमिः । परलोकः भोगभूमिः । इहलोककृतकर्मफलानुभवपर्यन्तं तस्याःभोगभूमेः परिमितिः ।

'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति वाक्यमेवात्र प्रमाणं । कर्मानुभवः , पुनः कर्मकरणम् ; एतत् पौनः पुन्यस्य अन्तः कुत्र ? तन्नियामकमेव विधिवलयं । विधिरयं सत्वगुणप्रधानः , ज्ञानमयश्च, परमात्मनः अभिन्नः । ऋषिप्रकृतिः एतद्विधिवलयबद्धा शक्तिः ।एतादृषिषु दिव्यर्षयः विधिं नियन्त्रयितुं वशीकर्तुञ्च समर्थाः। ऐहिकवलयस्थिताः ऋषयः विधिं ज्ञातुं शक्नुवन्ति ।

पुण्डरीकस्य पिता श्वेतकेतुः दिव्यर्षिः । जाबालिः भौमर्षिः । कादम्बरी कथासूत्रं एतत् – वलय -त्रितयम् व्याप्य तिष्ठति । एतत् कथासूत्रं परमेश्वरसंकल्पस्य सङ्केतः ।

बाणस्य एतत् कथासम्भावनाशक्तिः तस्य वैदिकविज्ञानस्य प्राबल्यं सूचयति । संप्रदायज्ञोऽयं कविः , अतः एव स्वस्य प्रणालिकानुसारं तत्तत् - शास्त्रसंकेतान् कथायां पात्रद्वारा सन्निवेशद्वारा समुचितशब्दैः स्फुरयति स्म । (ये विद्वांसस्ते कवयः – इति वाक्यं अत्रानुसन्धेयम् )

"स्त्रीपुमांसौ परिष्वक्तौ पतिश्च पत्नी चाभवताम्" ( बृ.उ.१-४-३)

दाम्पत्यभावः जीवलोके सनातनः सदातनश्च वर्तते । दाम्पत्यभावं विना सृष्टिरेव न भवति ।परमेश्वरे स्त्री पुंरूपौ द्वौ विभागौ वैदिकतत्वानुसारं संसारस्य मूलं । कलातत्त्वानुसारं तावत् नायिकानायकौ , रसानुभूतिकारकौ । पुरुषार्थसधनायां दाम्पत्यं धर्मपरिधौ तिष्ठति । काव्ये तावत् रसाविष्कारे प्रेममूलं भूत्वा कामपरिधौ तिष्ठति ।

'बहुस्यां प्रजायेय' इति परमेश्वरस्य संकल्पः एव दाम्पत्यस्यास्य मूलम् । मकरन्दिकोपख्याने प्रोक्तां केवलकथां स्वीकृत्य बाणः तत्कथान्तर्गततत्वेन मानवजीवितस्य व्याख्यानमकरोत् ।

**********

# दीपकालङ्कारः

**श्री श्रीकरः वि.**

अर्थालङ्कारेषु दीपकस्य प्रथमो लक्षयिता भरतमुनिः । स्वकीये नाट्यशास्त्रग्रन्थे दीपकं लक्षयन् लिखत्यसौ यत्-

**नानाधिकरणस्थानां शब्दानां सप्रदीपनः ।**
**एकवाक्येन संयोगो यस्तद्दीपकमुच्यते ॥ ५८ । १७ ॥**

**ततः आचार्यदण्डी काव्यादर्शे दीपकं लक्षयन् आह, यत्**

**जातिक्रियागुणद्रव्यवाचिनैकत्र वर्तिना।**
**सर्ववाक्योपकारश्चेत् तमाहुर्दीपकम्; यथा॥ ९७ द्वि.प ॥**

दण्डिना क्रियातिरिक्तानां जातिगुणद्रव्यार्थन्यतमवाचिना पदेनाऽप्यनेकपदार्थवाचक दीपनेन दीपकं स्वीकृतम् । तेन मालादीपकविरुद्धार्थदीपकादयो नैके भेदा अप्युदाहृताः ।

**उद्भटभट्टेन स्वीये काव्यालंकारसारसंग्रहे दीपकलक्षणमुपन्यस्तमस्ति यत्-**

आदिमध्यान्तविषया प्रधान्येतरयोगिनः ।
अन्तर्गतोपमा धर्मा यत्र तद्दीपकं विदुः ॥

यत्र सादृश्यप्रयोजको धर्मः आदौ मध्येऽन्ते वा स्थितः प्रस्तुतेनाऽप्रस्तुतेन च संगच्छते तद् दीपकमित्यर्थः ।

**वामनः स्वीये काव्यालंकारसूत्रे दीपकं लक्षयन्नाह यत्-**

उपमानोपमेय वाक्यष्वेका क्रिया दीपकम् (१८.३.४)

**मम्मटाचार्यो दीपकम् इत्थं लक्षयति –**

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥

**विश्वनाथः साहित्यदर्पणे दीपकं लक्षयति-**

अप्रस्तुतप्रस्तुतयो दीपकं निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥ ४८.१० पृ ।

प्रस्तुताप्रस्तुतपदार्थयोरेकेन गुणक्रियादिना साधारणधर्मेण सहान्वयो वर्ण्यमानो दीपकालङ्कारः भवति । दीपकालङ्कारे उपमेयोपमानभावः निश्चितः । अप्रस्तुतस्योपमानत्वात् प्रस्तुतस्योपमेयत्वात् च । परन्तु तुल्ययोगितायां प्रस्तुतैः सह प्रस्तुतानाम् अप्रस्तुतैः सह अप्रस्तुतानाम् एकधर्माभिसम्बन्धः भवति । अपि च उपमानोपमेयभाव ऐच्छिको भवति ।

यत्र साधारणो धर्मः गुणः तादृशस्थलं पण्डितराजजगन्नाथ प्रदर्शयति- सुधायाश्चन्द्रिकायाश्च सजीविन्या महौषधेः । दयावृष्टेश्च ते राजन् विश्वसंजीवनं गुणाः । राजवर्णनपरेस्मिन् पद्ये प्रकृताया दयादृष्टेरप्रकृतानाम् सुधादीनाञ्च विश्वजीवनदायकत्वेन गुणेनसाकम् अन्वयाद्दीपकम् ।

**“मदेन भाति कलभः प्रतापेन महीपतिः”** कलभनरपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियायामन्वयात् क्रिया साधारणो धर्मः भवति ।

**अभावस्थलेपि दीपकस्य उदाहरणं प्रस्तौति पण्डितराजजगन्नाथः यथा**

मृतस्य लिप्सा कृपणस्य दित्सा विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री विधातृसृष्टौ न हि दृष्टपूर्वा ।
अत्र कस्यचित् प्रकृतत्वे दीपकम् ,अन्यथा तुल्ययोगितैव ।

**दीपकालङ्कारे विशेषं श्रीमदप्पय्यदीक्षित एवं निरूपयति यत्**

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्चकृतविद्यश्च यश्च जानाति सेवितुम् ।

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः । इत्यत्र प्रस्तुताप्रस्तुतानां युगपध्द्मान्वयः प्रतिभाति । "मदेन भाति कलभ प्रतापेन महीपतिः " इत्यत्र अप्रस्तुतस्यैव प्रथमं धर्मान्वयः तथापि प्रासङ्गिकत्वं न हीयते । वस्तुगत्या प्रस्तुतोद्देशेन प्रवृत्तस्यैव वर्णनस्याप्रस्तु-तेऽप्यन्वयात् । न हि दीपस्य रथ्याप्रासादयोर्युगपदुपकारकत्वेन जामात्रर्थं श्रपितस्य सूपस्यातिथिभ्यः प्रथमपरिवेषणेन च प्रासङ्गिकत्वं हीयते ।

सुवर्णानि पुष्प्यतीति सुवर्णपुष्पां तथाभूतां पृथिवीं शूरादयःस्त्रयः पुरुषाः कुर्वन्तीत्यर्थः । अत्र सुवर्णानि पुष्प्यतीत्यर्थो बाधितः । पृथिव्यां तेन पुष्पसादृश्यात्सुलभसमृध्दिसम्भारभाजनता लक्ष्यते । तत्प्रयोजनं च शूरकृतविद्यासेवकानामितरजनेभ्यः प्राशस्त्यावगतिः । ततश्च पुष्पाणि यथा सुलभसमृध्दिभाजनानि तथैतेषां सुवर्णमित्यभिप्रायः । अत्र चिन्वन्तीति क्रियापदस्यैकत्वाद्युगपद्धर्मान्वयात् न प्रासङ्गिकत्वं युज्यत इति । तदा उच्यते युगपध्द्मान्वयेऽपि तस्य धर्मस्य प्रस्तुतान्वयतात्पर्येणैव निर्दिष्टतया अप्रस्तुतान्वये तात्पर्याभावेन प्रासङ्गिकत्वोपपत्तेः । न हि यौगपद्यमात्रेण तस्य तद्धीयते । लोके रथ्याप्रासादयोः युगपदुपकुर्वतोऽपि दीपस्य रथ्योद्देशेन आरोपितत्वाभावेन प्रासङ्गिकत्वस्य सम्प्रतिपन्नत्वात् ।

**अनेकासां क्रियाणामेककारकान्वये कारकदीपकम् ।**

वसु दातुं यशो धातुं विधातुमरिमर्दनम् ।
त्रातुं च मादृशान् राजन्नतीव निपुणो भवान् ॥रसगङ्गाधरः॥

अत्र वृत्तिहीनस्य कस्यचिद्दीनस्य वचने वसुदान-स्वत्रणलक्षणयोः क्रिययोः प्रकृतयोः,अरिमर्दनस्य चाप्रकृतस्य, यशोधानस्य चोभययात्मनः साधारणं कर्तृकारकम् ।

यथा वा - **निन्दति मृगाङ्ककिरणान्खिद्यते कुसुमायुधे जुगुप्सते रजनीम् ।**
**क्षीणोपि केवलं क्षीयते जीवेत्प्रियेति मारुतिं पृच्छन् ॥**अलङ्कारकौस्तुभम् ॥
अत्र 'निन्दति' 'खिद्यते' 'जुगुप्सते' 'क्षीयते' इत्यादीनामन्वयः रामे भवति इत्यतः कारकदीपकम् ।

**मालादीपकम्** इत्थं लक्षयति **रसगङ्गाधरकारः-उत्तरोत्तरस्मिन्पूर्वपूर्वस्योपकाराकतायां मालादीपकम् ।** उदाहरणम् यथा-

आस्वादेन रसो रसेन कविता काव्येन वाणी तया ।
लोकान्तः करणानुरागरसिकः सभ्यः सभा च चामुना ॥
दारिद्र्यानलदह्यमानजगतीपीयूषधाराधर !
क्षोणिनाथा ! तया भवांश्च भवता भूमण्डलं भासते ॥

अत्र प्रस्तुतस्य राज्ञः अप्रस्तुतानां रसादीनाञ्च भासनक्रियात्मकेनैकेन साधारण-धर्मेणान्वायद्दीपकम् ।अत्र पूर्वपूर्वस्योत्तरोत्तरं प्रत्युपकारित्वम् अस्ति ।

अत्र केचन वदन्ति - दीपकमपि तुल्ययोगितायामेवान्तर्भवति ।धर्मस्य सकृद्वृत्तेः उभयत्राविशेषात् । प्रकृताप्रकृतत्वादिविशेषस्य चावान्तरभेदसाधकत्वेऽपि अलंकारान्तरतरतायामसाधकत्वात् । अन्यथा श्लेषस्य तद्भेदयोरपि भिन्नालंकारत्वापत्तेः । तस्मात्प्रकृतानामेव प्रकृताप्रकृतानां चैकधर्मान्वय इति तुल्ययोगिताया एव त्रयोभेदा वक्तुमुचिताः । तस्माद्दीपकस्य तुल्ययोगिताया भेदं वदतां प्राचीनानां दुराग्रह इति ।

परन्तु भगवता भरतमुनिना दीपकस्याङ्गीकारात् तत्रैव तुल्ययोगितान्तर्भावस्यौचित्यादिति दिक् इति विश्वेश्वर पण्डितः वदति । एवमेव आदिदीपकं,मध्यदीपकम्,अन्त्यदीपकमिति दीपकभेदः न करणीयः । तथाविधवैचित्र्यस्य सर्वत्रापि सहस्रधा सम्भवात् । एषु प्रकारेषु अतिशयविच्छित्तिः नास्ति इति कविराजविश्वनाथः प्रतिपादयति ।

**परिशीलितग्रन्थाः**

१.कुवलयानन्दः,अप्पय्यदीक्षितः,”रसिकरञ्जनी” टीका सहितः ।चौखम्बा संकृत सीरीज् आफ़िस्,वाराणासी

२.रसगङ्गाधरः,पण्डितराजजगन्नाथकृत,’चन्द्रिका’ संस्कृत-हिन्दीव्याख्योपेतः चौखम्बा विद्याभवन,वारणासी

३.साहित्यदर्पणः,कविराजविश्वनाथः चौखम्बा विद्याभवन,वारणासी

४,अलंकारकौस्तुभ विश्वेश्वरपण्डितः काव्यमाला निर्णयसागर प्रेस्-बम्बई

**********

# सिद्धान्तशेखरः

**आचार्यः ए. श्रीपादभट्टः**
**ज्यौतिषविभागाध्यक्षः**
**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः**

**यत्तेजः पितृधाम्नि शीतमहसः पाथोमये मण्डले**
**संक्रान्तं कुमुदाकरस्य कुरुते काञ्चिद्विकासश्रियम् ।**
**चञ्चच्चञ्चुपुटैश्चकोरनिकरैश्चापीयतेऽसौ चिरं**
**त्रैलोक्यालयदीपको विजयते देवो निधिस्तेजसाम् ।।**

सिद्धान्तशेखरः प्राचीनभारतीयप्रसिद्धज्योतिषग्रन्थेषु अन्यतमः । 1039 क्रिस्ताब्दे श्रीपतिर्नामा ज्योतिर्विद् ग्रन्थमिमं व्यरचयत् । काश्यपगोत्रोद्भवस्य श्रीपतेः पितुर्नाम नागदेव इति। उज्जैनीतः 150 क्रोशस्थिते रोहिणीखण्डे अयं न्यवसदिति ज्ञायते । अयमेव श्रीपतिः जातकपद्धतिं तथा च रत्नमालाख्यं मुहूर्तग्रन्थमपि ग्रथितवानिति तर्क्यते । श्रीपतेर्विषये इतोऽप्यधिकं विवरणं नोपलभ्यते ।

त्रयोदशशताब्दे स्थितेन मक्किभट्टेन गणितभूषणाख्येन स्वीयव्याख्यानेन सिद्धान्तशेखरः समलङ्कृतः । किन्तु व्याख्यानमिदं त्रिप्रश्नाधिकारस्य 75 श्लोकपर्यन्तमेव समुपलभ्यते । सिद्धान्तशेखरोऽयं 1932तमे क्रिस्ताब्दे कलकत्ताविश्वविद्यालयेन प्रकाशितः यश्च श्रीमद्भिः श्रीकृष्णमिश्रामहोदयैः सम्पादितः । मुद्रितग्रन्थस्यावशिष्टभागः सम्पादकमहोदयैः स्वीयविवरणाख्येन व्याख्यानेन संयोजितः । ग्रन्थोऽयं सम्प्रति कुत्रापि नोपलभ्यते । भाग्यवशात् राजमहेन्द्रीपुरनिवासिभिः स्वनामधन्यैः श्रीमधुरकृष्णमूर्तिशास्त्रिपादैः मह्यं मुद्रितपुस्तकस्य प्रतिलिपिः सम्प्रेषिता येनाहं ग्रन्थममुं पठितुं पारितवान् ।

ग्रन्थेऽस्मिन् 20 अध्यायाः सन्ति । ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तमाधारीकृत्य श्रीपतिना सिद्धान्तशेखरः रचितः इति प्रतिभाति । परन्तु विषयनिरूपणावसरे आकर्षकच्छन्दांसि प्रयुज्य लल्लस्य शैलीमनुकरोति श्रीपतिः । ब्रह्मगुप्तविरचितं ब्रह्मस्फुटसिद्धान्तं, लल्लविरचितं शिष्यधीवृद्धिदं च सम्यक् परिशील्य श्रीपतिना सिद्धान्तशेखरः विरचितः । न केवलमयं श्रीपतिः त्रिस्कन्धज्योतिषे एव निपुणः अपि तु व्याकरणे छन्दश्शास्त्रे च परिणतः आसीदिति तत्कृतग्रन्थावलोकनेन स्पष्टं प्रतिभाति । अनन्तरकालिकः प्रसिद्धः भास्करः स्वसिद्धान्तशिरोमणिग्रन्थं श्रीपतेः सिद्धान्तशेखरं बहुधा अवलम्ब्यैव रचितवानिति उच्यते चेत नातिशयोक्तिः । भास्कराचार्यस्य सिद्धान्तशिरोमणेः मध्यमाधिकारः श्रीपतेः सिद्धान्तशेखरस्य साधनाध्यायेन बहुसाम्यमावहति । प्रायः साधनाध्यायोक्ताः एव विषयाः भास्करेण पदानि छन्दांसि च परिवर्त्य निरूपिताः इति ग्रन्थपर्यालोचनेन स्पष्टं प्रतिभाति ।

सिद्धान्तशेखरस्य मध्यमाधिकारे अहर्गणानयने, ग्रहाणामध्यमानयने च बहवः प्रकाराः निरूपिताः। मक्किभट्टस्य व्याख्यानमपि चमत्कारपूर्णं विद्यते । व्याख्यानस्य वैशिष्ट्यद्योतनार्थमिदमेकमुदाहरणं प्रस्तूयते । साधनाध्याये कुदिनस्य परिभाषामित्थं निरूपयति मक्किभट्टः -

"भूमेः सम्बन्धिनो दिवसा इत्यर्थः । भूमिः प्राङ्मुखी भ्रमति । सा च यावत्तावतो वारान् क्षितिजे रविणा सह सम्बन्ध्यते तावन्ति सावनदिनानि भूदिनानीत्युच्यन्ते ।" इति भूमेः दैनन्दिनमक्षभ्रमणं निरूपयति । एतेनेदं स्पष्टं जायते यत् बहवः प्राचीनाः भारतीयज्योतिर्विदः भुवः अक्षभ्रमणं जानन्त एव आसन् किन्तु साम्प्रदायिकानां विरोधभयात् भचक्रभ्रमणमेवाङ्गीचक्रुरिति । कृतयुगादीनां सौरवर्षसङ्ख्यानिरूपणावसरे "कटपयादि" अक्षरसङ्ख्याविधानेन 'ज्ञान' पदं असकृत् प्रयुज्य स्वीयं नैपुण्यं प्रदर्शयति मक्किभट्टः -

| | | |
|---|---|---|
| ज्ञानी निर्जरैः सेव्यः | - | 1728000 । |
| ज्ञानी नीति धारकः | - | 1296000 । |
| ज्ञानिनो वित्तदाः | - | 864000 । |
| ज्ञानेन श्रीलाभः | - | 432000 । |

अहर्गणानयनावसरे केवलं कटपयादि अक्षरसङ्ख्याविधानेनैव स्वकालिकाहर्गणमेकं सोदाहरणं निरूपयति । वारप्रवृत्तिप्रसङ्गे मध्यमाध्याये बहूनां मतान्तराणि प्रदर्शयति श्रीपतिः मध्यमाधिकारे -

**केचिद्वारं सवितुरुदयादाहुरन्ये दिनार्धात्**
**भानोरर्धास्तमयसमयादूचिरे केचिदेवम् ।**
**वारस्यादिं यवननृपतिर्दिङ्मुहूर्ते निशायां**
**लाटाचार्यः कथयति पुनश्चार्धरात्रे स्वतन्त्रे ।। १० ।।**

स्वीयं मतमधोनिर्दिष्टरीत्या निरूपयति मध्यमाधिकारे -

**सृष्टेर्मुखे ध्वान्तमये हि विश्वे**
**ग्रहेषु सृष्टेष्विनपूर्वकेषु ।**
**दिनप्रवृत्तिस्तदधीश्वरस्य**
**वारस्य तस्मादुदयात् प्रवृत्तिः ।। 11 ॥**

श्रीपतिना अपवर्तनस्य सौकर्यार्थं त्रिज्या 3415मिता स्वीकृता । चतुर्विंशतिज्यार्धाः अपि ब्रह्मगुप्तादीनामपेक्षया किञ्चित् भिन्नाः स्वीकृताः । पाठपठितज्याभिर्विनैव दोःकोटिजीवे सम्पादयितुं श्रीपतिः नूतनमुपायमाह यच्च ब्रह्मस्फुटसिद्धान्तं विहाय इतरसिद्धान्तग्रन्थेषु नोपलभ्यते । यथा स्पष्टाधिकारे -

**दोःकोटिभागरहिताभिहताः स्वनाग**
**चन्द्रास्तदीयचरणोनशरार्कदिग्भिः ।।**
**ते व्यासखण्डगुणिता विहृताः फले तु**
**ज्याभिर्विनैव भवतो भुजकोटिजीवे ।। 17 ।।**

अस्य सूत्रं एवं निरूप्यते -

(180° - इष्टभुजांशाः) = क

क x (180 - क ) = ग

10125 - (ग ÷ 4) = द

(ग x त्रिज्या) ÷ द = इष्टज्या

अस्यैकमुदाहरणं मया निरूप्यते -

इष्टभुजांशाः = 50

180 - 50 = 130

130 x 50 = 6500

6500 ÷ 4 = 1625, त्रिज्या = 3415

10125 - 1625 = 8500

(6500 x 3415) ÷ 8500 = स्वल्पान्तरेण ज्या **2611**

एवमेव इष्टज्यायां ज्ञातायां चापसाधनक्रमोऽपि, पठितज्याभिर्विनैव निरूपितः श्रीपतिना,यच्च विस्तारभयात् न प्रदर्श्यते । प्रायः अमुमेव प्रकारमवलम्ब्य ग्रहलाघवकारः गणेशः पठितज्याभि-विनैव कर्म सम्पादयतीति विश्वस्यते ।

त्रिप्रश्नाध्यायः अत्यन्तं विस्तरेण श्रीपतिना निरूपितः । दिग्ज्ञानोपायसन्दर्भे क्रान्त्यक्षांशान् विहायापि दिक्साधनक्रमः निरूपितः । पलभामानेतुं विशिष्टप्रकारः तेनोक्तः यः श्रीपतेः कुशाग्रमतित्त्वं द्योतयति । यथा त्रिप्रश्नाधिकारे -

**अजतुलादिगतस्य विवस्वतो**
**दिनदलप्रभयोर्युतिरर्धिता ।**
**भवति वैषुवती निजदेशजा**
**तदिनवर्गयुतेश्च पदं श्रुतिः ।। 69**

मेषादिगतस्य तुलादिगतस्य च भानोर्ये मध्याह्नच्छाये तयोर्युतिरर्धिता निजदेशजा पलभा भवतीति श्रीपतिः निरूपयति । अत्र सूक्ष्मातिसूक्ष्मफलसाधनमेव श्रीपतेर्लक्ष्यमिति स्फुटं ज्ञायते। यदा छायातः रवेर्भुजांशाः आनीयन्ते तदा पदज्ञानपुरस्सरं राश्यादिकस्य रवेर्ज्ञानार्थं विनूतनोपाय: कमलाकरेण गर्वेण प्रतिपादितः सः उपायः वस्तुतस्तु श्रीपत्याविष्कृत एव । यथा त्रिप्रश्नाधिकारे

**आद्ये पदेऽपचयनी पलभाल्पिका स्यात्**
**छायाल्पिका भवति वृद्धिमती द्वितीये ।**
**अक्षद्युतेः समधिकोपचिता तृतीये**
**तुर्ये पुनः क्षयवती तदनल्पिका च ।। 70 ।।**

एवं पलभा-दिनार्धच्छाये आश्रित्य सुलभप्रकारेण पदज्ञानपुरस्सरं राश्यादिकस्य रवेः ज्ञानोपायः श्रीपतिना प्रतिपादितः । त्रिप्रश्नाधिकारे यथासम्प्रदायं प्रश्नान् आशङ्क्य समाधानानि च प्रदर्शयति ।

व्यासपरिधिसम्बन्धविषयेऽपि व्यासवर्गाद्दशगुणात् मूलं परिधिरिति स्थूलमपि प्राचीनानां मतमेव स्वीकृतम् । ग्रहयुद्धाध्यायस्य प्रथमश्लोके -

**अन्त्यभ्रमेण गुणिता रविबाहुजीवा –**
**भीष्टभ्रमेण विहृता फलकार्मुकेण ।**
**बाहोः कलासु रहितास्ववशेषकं ते**
**यातासवो युगयुजोः पदयोर्धनर्णम् ।।**

इति उदयान्तरकर्मणः सूचनां दत्वा अग्रिमश्लोके अन्यं विषयं निरूपयति । सिद्धान्तशिरोमणौ यावत् अस्य उदयान्तरकर्मणः वैशद्यं प्रस्तुतं तदत्र नोपलभ्यते । भास्कराचार्यैः श्रीपतेरमुमाशयमवलम्ब्यैव उदयान्तरं कर्म प्रतिपादितमिति विद्वांसः प्रतिपादयन्ति । अस्यैव अध्यायस्य 2-4 श्लोकेषु चन्द्रस्य दृग्गणितैक्यसिद्ध्यर्थं संस्कारविशेषं श्रीपतिः प्रतिपादयति यश्चायं संस्कारः आधुनिकानां 'ईवयेशन्

वेरियेशन्' (Equation Variation) इति संस्काराभ्यां स्वल्पान्तरेण साम्यं वहतीति विद्वांस आमनन्ति । श्रीपतिना सिद्धान्तशेखरे व्यक्ताव्यक्तगणिताध्यायौ संयोजितौ विद्यते । भूसंस्थानविषये श्रीपतिना सिद्धान्ते प्रतिपादितविषयाः सर्वेऽपि भास्कराचार्यैः तेनैव क्रमेण सिद्धान्तशिरोमणौ पदान्तरैः प्रस्तुता इति तु विस्मयं जनयति । भास्कराचार्यैः यश्चापूर्वः भुवः आकर्षणशक्तिसिद्धान्तः समुपस्थापितः स सिद्धान्तः प्रायः सिद्धान्तशेखरस्य प्रेरणया तन्मनसि_समुत्पन्न इति प्रतिभाति । यथा गोलाध्याये-

**नभस्ययस्कान्तमहामणीनां**
**मध्ये स्थिती लोहगुडो यथास्ते ।**
**आधारशून्योऽपि तथैव सर्वा**
**धारो धरित्र्या ध्रुवमेव गोलः** ।। 22 ।।

रविचन्द्रयोरुपरागकारणं राहुरिति पुराणमतं निराकर्तुं राहनिराकरणाध्यायः इति पृथगध्याय एव श्रीपतिना सिद्धान्तशेखरे संयोजितः इत्यनेन तस्य वास्तवस्थितिनिरूपणविषये महान् आग्रहः आसीदिति ज्ञातुं शक्यते । यथासम्प्रदायं अस्मिन् अपि ग्रन्थे अन्ते प्रश्नाध्यायमपि संयोज्य जिज्ञासूनां ज्ञानपिपासां संवर्धयति श्रीपतिः ।।

यद्यपि निजपूर्ववर्तिभ्यः ज्योतिषग्रन्थकर्तृभ्यः विशिष्य लल्लब्रह्मगुप्ताभ्यां च बहून् विषयान् समादाय श्रीपतिना सिद्धान्तशेखरः विरचितस्तथापि बहुत्र बुद्धिबलात् अपूर्वानपि कान्श्चन शास्त्रविषयान् विदुषां छात्राणां च विनोदाय असौ आविष्कृतवानित्यत्र नास्ति संशयलेशोऽपि। भास्कराचार्यैः सिद्धान्तशिरोमणौ बहवः श्रीपतिप्रतिपादिताः विषयाः पदान्तरैः भिन्नच्छन्दोभिः निरूपिताः इति श्रीपतेः सिद्धान्तशेखरस्याध्यायनेन स्पष्टं प्रतिभाति । केवलं स्थालीपलाकन्यायेन सिद्धान्तशेखरस्य परिचयः दिङ्मात्रेण प्रबन्धेऽस्मिन् प्रस्तुतः ।।

**********

## ग्रन्थऋणम्


1. श्रीपतिविरचितः सिद्धान्तशेखरः श्रीकृष्णमिश्रामहोदयैः संशोध्य प्राकाश्यं नीताः कलकत्ताविश्वविद्यालयेने मुद्रितः 1932.
2. श्रीभस्कराचार्यविरचितः सिद्धान्तशिरोमणिः वासनाभाष्यसहितः श्रीबापूदेवशास्त्रिभिः संशोधितः चौखम्बा संस्थानेन मुद्रितः-संस्कृत-1999.
3. श्रीकमलाकरभट्टविरचितः सिद्धान्ततत्वविवेकः श्रीवैद्यनाथमिश्रामहोदयैः संसोधितः कामेश्वरसंह दरभङ्गा संस्कृतविश्वविद्यालयेन मुद्रितः 2001.


**********

# ॥ वृष्टिविज्ञानम् ॥

**डा. मुरलिकृष्ण टि.**

भारतं कृषिकर्मप्रधानः देशः । अस्मद्देशीया कृषीवलाः सुसमये वृष्टिरागते सत्येव सुखस्वापम् अवाप्नुवन्ति । अन्यच्च सामान्यतः प्रतिगृहं युगादिपर्वणि पञ्चाङ्गपठनं क्रियते । यत्र अयमपि अंशः प्रधानः यदस्मिन् वर्षे वृष्टिः सुसमये सम्यग्वर्षति किम्? इति । वर्षति चेत् कत्याढकपरिमिता वृष्टिस्स्यादिति गृहप्रमुखः जिज्ञासते । यतस्तस्य कृषिक्षेत्रे समृद्धिस्स्यादिति भावनया । न केवलमस्माकं कृषिक्षेत्राय वा देशाय वा वृष्टिरपेक्षता । अन्यदप्यस्ति महत्कारणम् । तत्परिशील्यतां यथा -

**अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम्।**
**यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन॥**[1]

अस्यार्थस्तु जगति विद्यमानाः प्राणिनः अन्नं विना न जीवन्ति । अन्नवृद्धिश्च वृष्टिकालमनुसृत्य सम्भवति । अर्थात् सस्यानां वृद्ध्या एव अन्नादीनां समृद्धिर्जायते । सस्यानां वृद्ध्यर्थं वृष्टिरनिवार्या । अतः विशेषेण वृष्टिकालश्चिन्त्यः । अयञ्च वराहमिहिरप्रणीतायाः बृहत्संहितायाः एकविंशतेः अध्यायस्य प्रथमः श्लोकः ।

बृहत्संहितायाः एकविंशत्यध्यायादाभ्य अष्टाविंशत्यध्यायपर्यन्तं अष्टसु

---

[1] बृहत्संहिता –21 अ .01 श्लो ;.भगवद्गीतायामप्यस्ति यथा अन्नाद्भवन्ति भूतानि ’ – इति कर्मयोगाख्यस्य तृतीयाध्यायस्य ’पर्जन्यादन्नसम्भवः। यज्ञाद्भवन्ति पर्जन्यो यज्ञाः कर्मसमुद्भवा चतुर्दशःश्लोकः।

अध्यायेषु वृष्टिविषयकाः विवधाः विषयाः प्रस्तुताः।[1] ज्योतिश्शास्त्रस्य संहितास्कन्ध एव एतादृग्विधान् विचारान् प्रस्तोतुमर्हति । अतस्संहितायां मेघानां गर्भधारणं, वृष्टेः कालः, सद्योवृष्टेः लक्षणमित्येते बहवो अंशाः प्रस्तुताः । एवमेव केचन विचाराः लोकरूढ्यामागताश्च वर्तन्ते । तेषां शास्त्रीयं मूलमज्ञातञ्चेदपि प्रत्यक्षसिद्धा इत्यत एतान् सर्वान् विचारानत्र सङ्गृह्य प्रस्तूयते ।

❋ **लोकरूढ्यां विद्यमानाः केचन प्रसिद्धाः अंशाः –** महानक्षत्राणामाधारेण लोके वृष्टेः सम्भवासम्भवत्त्वं कथयन्ति । लोके सूर्यसञ्चारनक्षत्रं महानक्षत्रमिति नाम्ना व्याहरन्ति । एवमेव आर्द्रानक्षत्रवृष्टिः, पुनर्वसुनक्षत्रवृष्टिः इत्यादिना श्रुतं स्यादस्माभिः। अर्थात् सूर्यः आर्द्रायां चरति सति आर्द्रानक्षत्रवृष्टिः इत्याद्युच्यते ।

सामान्यतः सूर्यः मृगशरसि प्रविशति चेत् वृष्टेः आरम्भः ।[2] चित्रानक्षत्रान्ते वृष्टेः पर्यवसानम् । तथा च केषुचित् प्रदेशेषु विशाखापर्यन्तमपि वृष्टिर्जायते इत्युच्यते जनैः । अतः मुख्यतया एतानि नक्षत्राणि वृष्टिनक्षत्राणि ।[3] किन्तु नारदस्तु आर्द्रात आरभ्य मूलान्तं रवेः चारकाले वृष्टिर्भवतीत्याह -

**वर्षत्यार्द्रादिमूलान्तं प्रत्यक्षं प्रत्यहं तथा ।**
**वृष्टिश्च पौष्णभे तस्माद्दशर्क्षेषु न वर्षति ॥**[4]

❋ **मेघानामाधारेण वृष्टेश्चिन्तनम् -** आवर्तः, संवर्तः, पुष्करः, द्रोण इति चतुर्विधाः

---

[1]तत्रोक्ता अध्याया एवं सन्ति -21 ,गर्भलक्षणम् .22. गर्भधारणम् 23 ,प्रवर्षणम् .24 . ,रोहिणीयोगः25 ,स्वातियोगः .26 ,आषाढीयोगः .27 ,वातचक्रम् .28सद्योवर्षणमिति। . अत्र 21 . 22... इत्यादिना प्रदत्ताः सङ्ख्याः बृहत्संहितान्तर्गतानाम् अध्यायानां सङ्ख्या ।

[2] इयञ्च लोकरूढिः केरलकर्नाटकयोः प्रसिद्धः । प्रायः नैर्ऋत्यमान्सून् आश्रित्यैव चिन्त्यते इति मे - मतिः । यतः एषु कालेषु आभारतं वृष्टेरभावात् । अस्मिन्विषये विमर्शो विधेयः ।

[3] अयं लोके प्रचलितः विचारः ।

[4] नारदसंहिता – 35 अ .11 श्लो.

मेघाः सन्ति ।[1] प्रत्येकस्मिन् संवति एकैको मेघः स्वाधिपत्यमवाप्नोति । अमुकसंवति अयं मेघ इति निर्णयस्तु गणिताधीन एव । एतेषां फलानि तु आवर्तसंज्ञकस्य मेघस्याधिपत्ये देशे तत्र तत्र वृष्टिर्जायते । संवर्तः सर्वत्र वर्षति । पुष्करो अल्पां वृष्टिं जनयति । द्रोणस्तु महतीं वृष्टिं प्रयच्छति । विषयममुं पञ्चाङ्गेषु प्रतिवर्षं सफलं निरूपयन्ति ।

❋ **आर्द्रानक्षत्रफलम् -** वृष्टिनक्षत्रेषु आर्द्रानक्षत्रस्यास्ति महत्प्राधान्यम् । **वृष्टिगतेऽर्के नियमेन चार्द्राम्** इत्युक्तिमनुसृत्य आर्द्रायां मेघाः सम्यग्वर्षन्ति अथवा वर्षयुः इति नियमः । लोके सस्याभिवृद्धिं निरीक्षमाणाः कर्षकाः आर्द्रानक्षत्रे अवृष्ट्या दुःखितमनाः भवन्ति । अतः वृष्टेः निर्णये आर्द्रानक्षत्रप्रवेशकालमनुसृत्यापि फलप्रवचनमस्ति । अहनि आर्द्रायां रवेः प्रवेशे जाते विपत्तिः सस्यहानिश्च जायते । सन्ध्ययोः सस्यवृद्धिः, निशि चेत् सर्वसम्पत्प्राप्तिश्चेति नारदस्य वचनम् । तद्यथा –

**विपत्तिः सस्यहानिः स्यादहन्यार्द्राप्रवेशने ।**
**सन्ध्ययोः सस्यवृद्धिः स्यात्सर्वसम्पन्नृणां निशि ॥**[2]

आर्द्रानक्षत्रस्य प्रवेशकाले नानाविधप्राकृतिकलक्षणान्यपि द्रष्टव्यानीति नारदो ब्रवीति । आर्द्रानक्षत्रप्रवेशकालस्य वासराधिपतिरेव **मेघाधिपति** इति नाम्ना अभिधीयते । अर्थात् शुक्रवासरे रविः आर्द्रानक्षत्रं प्रविशति चेत् शुक्रः तस्य संवतः अधिपः भवति । शुक्रस्तु जलग्रहः । अतः मेघाः सम्यक्प्रवर्षन्तीति नियमः ।

❋ **मेघानां गर्भलक्षणं गर्भधारणञ्च –** मेघानां गर्भलक्षणं गर्भधारणञ्च बृहत्संहितायाः एकविंशे द्वाविंशे च अध्याये क्रमशः प्रस्तुते ।

तदादौ मेघानां गर्भलक्षणं विचार्यते । केचिदाचार्याः सिद्धसेनादयः

---

[1] एतानि नामानि पञ्चाङ्गानामवलोकनात्प्राप्तानि । अत्र शौनकसंहितायाः वचनानि प्रमाणभूतानीति पञ्चाङ्गकर्तारः कथयन्ति । 'योऽयं ग्रन्थः मुद्रितो न दृश्यते' इति मे मतिः ।

[2] नारदसंहिता -35 अ .8 श्लो.

कार्तिकमासस्य पूर्णिमान्तमतीत्य मेघानां गर्भदिवसाः भवन्ति इति अकथयन् । किन्त्वस्मिन् सिद्धसेनमते मिहिरस्य श्रद्धा नास्ति । मिहिरस्तु गर्गवसिष्ठपराशरऋषिपुत्रकश्यपानां मतानि अङ्गीकृत्य स्वमतमुपस्थापयति । मार्गशीर्षस्य शुक्ले पक्षे चन्द्रः पूर्वाषाढानक्षत्रे प्रविष्टे सति गर्भधारणमिति गर्गाचार्यमतमेव पुनरुपास्थापयत् यथा –

**मार्गशिरः सितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम् ।**
**पूर्वां वा समपगते गर्भाणां लक्षणं ज्ञेयम् ॥**[1] इति ।

अन्यद्विशेषो नाम मेघानां गर्भाधानात् १९५ दिनानामनन्तरं धृतगर्भाः मेघाः प्रसूयन्ते अर्थात् वृष्टिः जायते इति । अत्र हि प्रमाणं यथा –

**यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात् ।**
**पञ्चनवते दिनशते तत्रैव प्रसवमायाति ॥**

अर्थात् मार्गशिरसितपूर्वाषाढानक्षत्रातः गर्भाधानमारभ्यते इति पूर्वम् उक्तमेव । अतः तस्मादारभ्य यस्मिन् यस्मिन् दिने गर्भः ध्रियते तस्मात् तस्मात् सावनमानेन पञ्चनवत्यधिकैकशतस्य (१९५) दिनानामनन्तरं गर्भः प्रसवं याति । शुक्लपक्षे धृताः गर्भाः कृष्णे पक्षे, कृष्णे पक्षे धृताः शुक्ले, दिने धृताः रात्रौ, रात्रौ धृताः दिने, पूर्वसन्ध्यायां जाताः मेघगर्भाः उत्तरसन्ध्यायाम्, उत्तरसन्ध्यायां जाताः पूर्वसन्ध्यायामित्येवं १९५ दिनानामनन्तरं प्रसवं प्राप्नुवन्ति । एवमेव विविधेषु मासेषु, ऋतुषु, नक्षत्रेषु च धृतगर्भाणां मेघानां वैशिष्ट्यं, नानाविधलक्षणेन मेघानां गर्भपुष्टेः हानेश्च विचारः बृहत्संहितायां विस्तरशः कृतः । मतिमद्भिः तत्सर्वमवधेयम् ।

मेघानां गर्भधारणं मार्गशीर्षमासादारभ्यते इत्युक्तम् । यच्च सामान्यतः शैत्यकाले भवति । यस्मिन् वर्षे शैत्याधिक्यं तस्मिन् महती वृष्टिः, शैत्याल्पत्वे अल्पा

---

[1] बृहत्संहिता -21 अ .6 श्लो.

वृष्टिः इत्यपि लोकोदन्तोऽस्ति । अन्यदप्युच्यते फाल्गुनदशम्याः अथवा एकादश्याः अहनि गर्भं निमित्तीकृत्येव मेघाः दृश्यन्ते । अर्थात् प्राप्तगर्भाः मेघास्सञ्चरन्तीति विस्मयावहः विचारः ।

❈ **तात्कालिकप्रश्नाधारेण वृष्टेः ज्ञानम् –** यस्मिन् समये पृच्छकः दैवज्ञमुपसर्प्य स्वाभीप्सितं विचारमवगन्तुं पृच्छति तदा तात्कालिकलग्नेन आरूढेन[1] वा फलचिन्तनक्रमः तात्कालिकप्रश्नपदेनाभिधीयते । तात्कालिकप्रश्नाधारेण वृष्टेरागमनस्य चिन्तनक्रमः प्रस्तुतो यथा -

**वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो**
**लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे ।**
**सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भः**
**प्रावृट्काले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि ॥[2]**

वृष्टिविषयकप्रश्ने[3] जलचरराशिस्थः (कर्कटकमकरमीनान्यतमे राशौ) चन्द्रः लग्नगतः अथवा शुभग्रहैर्दृष्टः शुक्लपक्षीयः चन्द्रः केन्द्रस्थश्चेत् महती वृष्टिर्जायते। यदि पापग्रहैर्दृष्टः शुक्लपक्षीयः चन्द्रः केन्द्रस्थस्तर्हि अल्पा वृष्टिर्जायते। अत्रोक्तयोर्योगयोर्द्वयोः चन्द्रस्य स्थाने शुक्रं कल्पयित्वा प्राप्ते योगेऽपि महद्वृष्टिर्वाच्या। यथा - जलचरराशिस्थः शुक्रः लग्नगतः अथवा शुभग्रहैर्दृष्टः बलिष्ठः शुक्रः केन्द्रस्थश्चेत् महती वृष्टिर्जायते। यदि पापग्रहैर्दृष्टः शुक्रः केन्द्रस्थश्चेत् अल्पा वृष्टिर्जायते ।

प्रश्नशास्त्रे फलचिन्तायां शकुनानां प्राशस्त्यमुपकल्पितम् । अतः प्रश्नकालजेन निमित्तेनापि (शकुनेन) वृष्टेरागमनं जानीयात् इत्यस्ति । ज्योतिश्शास्त्रे

[1]वराटिकया अङ्गस्पर्शनेन पृच्छकेनारूढस्थानेन वा प्राप्तं लग्नमनुसृत्य तात्कालिकग्रहस्थित्या च विचिन्त्यमानमारूढमिति अत्र गृह्णीयात्।

[2]बृहत्संहिता –28 अ .01 श्लो.

[3]यदि पृच्छकः इत्येतादृशः प्रश्न इति। ?किमद्य श्वो वा सद्यः वृष्टिर्भवितुमर्हति -

प्रत्येकं प्रश्नमुद्दिश्य शकुनान्यपि पृथक्पृथगुक्तानि सन्दृश्यन्ते । अतः प्रभूतवृष्टिसूचकानि शकुनानि अपि बृहत्संहितायां विमृष्टानि ।[1] एवं विचक्षणाः बृहत्संहितायाः सद्योवृष्टिलक्षणाध्याये निरूपितः सर्वोऽपि विचारः समाकलय्य द्वित्रिसंवादं कुर्युः ।

❋ **वृष्टिकालिकात् ग्रहचारात् ग्रहयोगाच्च शुभाशुभफलानि –**वृष्टिकालिकाः ग्रहयोगाः अपि वृष्टेः ज्ञानाय साह्यमाचरन्ति । अत्र नारदसंहितायाः वचनं यथा -

**सद्योवृष्टिकरः शुक्रो यदा बुधसमीपगः ।**
**तयोर्मध्यगते भानौ तदा वृष्टिविनाशनम् ॥**[2]

शुक्रः बुधस्य समीपस्थश्चेत् सद्यः काले वृष्टिर्भवति । शुक्रबुधयोः मध्यगतः रविश्चेत् वृष्टेरभावश्चिन्त्यः । वस्तुतः अयं योगः प्रश्नकाले द्रष्टव्य इति नारदस्याभिमतम् । किन्तु वर्षकालिकग्रहस्थित्या अपि अमुं विषयं कथयन्तीति मयानुभूतम् । कर्षकाणां गृहे इमां स्थितिं (शुक्रबुधयोः मध्यगतस्य रवेः स्थितिं) "भानुमध्यस्थितिः" इति पदेन वर्णयन्ति । अतः कृषिकर्म एव येषां प्रधानं कर्म ते कर्षकाः अथवा तद्गृहस्थाः गृहस्वामी "अहो ! अस्त्यत्र भानुमध्यस्थितिः ! वृष्टिर्भवेद्वा न वा ?" इत्युद्गिरन्ति ।

**सिंहे भिन्ने कुतो वृष्टिरभिन्ने कर्कटे कुतः ।**
**कन्योदये प्रभिन्ने चेत् सर्वथा वृष्टिरुत्तमा ॥**[3]

सिंहसङ्क्रमदिने उत्तमाः मेघाः वर्षन्ति, कर्कसङ्क्रमदिने मेघाः एव न भवन्ति तदात्र वृष्टेरभावः । कन्यासङ्क्रान्तिकाले वायुः वेगेन वाति चेत् वृष्टिरत्युत्तमा स्यात्

---

[1] आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा तोयासन्नो भवति यदि वा तोयकार्योन्मुखो वा ।
प्रष्टा वाच्यः सलिलमचिरादस्ति निःसंशयेन पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः ॥
बृहत्संहिता – 28 अ. 02 श्लो.

[2] नारदसंहिता –35 अ .4 श्लो.

[3] नारदसंहिता –35 अ .12 श्लो.

इति च चिन्तयेत् ।

ग्रहाणां चाराः अपि वृष्टिसूचकाः भवन्ति । अत्र केचन योगास्तादृशाः बृहत्संहितान्तर्गताः विचार्यन्ते यथा -

**प्रावृषि शीतकरो भृगुपुत्रात्सप्तमराशिगतः शुभदृष्टः ।**
**सूर्यसुतान्नवपञ्चमगो वा सप्तमगश्च जलाऽऽगमनाय ॥** [1]

वृष्टिकाले शुक्रात्सप्तमे शुभदृष्टः चन्द्रः स्थितः अथवा शनेः पञ्चम-नवम-सप्तमान्यतमे स्थाने शुभदृष्टः चन्द्रश्चेत् शीघ्रमेव वृष्टिर्वाच्या। तथैव -

**प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसङ्क्रमे च ।**
**पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चार्द्राम्॥** [2]

ग्रहाणामुदयकाले, अस्तकाले, समागमकाले, मण्डलसङ्क्रमणकाले, पक्षक्षये, दक्षिणोत्तरायनयोः अन्त्यसमये, सूर्यस्य आर्द्रानक्षत्रस्थे च भुवि अवश्यं वृष्टिर्भवति। रविणा युताः ग्रहाः **अस्तङ्गताः** । रविणा मुक्ताः ग्रहाः **उदयङ्गताः** । चन्द्रेण सह पञ्चग्रहाणां युतिः **समागमः** । शुक्रचाराध्याये शुक्रस्य षणमण्डलान्युक्तानि । तेषु एकैकस्मिन् मण्डले शुक्रस्य प्रवेशकाल **मण्डलसङ्क्रमणकाल** इत्युक्तः। अमावास्या पूर्णिमा च **पक्षक्षय**पदेन अभिधीयते । कर्कसङ्क्रान्तिः मकरसङ्क्रान्तिश्च यथाक्रमं **दक्षिणमुत्तरञ्चायन**मुच्यते। एवमेव -

**समागमे पतति जलं ज्ञशुक्रयोर्ज्ञजीवयोर्गुरुसितयोश्च सङ्गमे ।**
**यमारयोः पवनहुताशजं भयं ह्यदृष्टयोरसहितयोश्च सद्ग्रहैः ॥** [3]

शुभग्रहाणां दृष्टेः योगस्य च अभावे बुधशुक्रयोः गुरुबुधयोः गुरुशुक्रयोः शनिकुजयोः वा युतिः चारवशात्सम्भवे सति लोके वाय्वग्निजनिता भीतिरुत्पद्यते।

---

[1]बृहत्संहिता –28अ .19श्लो.

[2]बृहत्संहिता –28अ .20श्लो.

[3]बृहत्संहिता –28अ .21श्लो.

तथैव -

**अग्रतः पृष्ठतो वापि ग्रहाः सूर्यावलम्बिनः ।**
**यदा तदा प्रकुर्वन्ति महीमेकार्णवामिव ॥**[1]

ग्रहाः सूर्यस्य अग्रतः पृष्ठतः वा भवन्ति तर्हि वृष्ट्यागमाद्भूः जलमयी जायते। अर्थादतिवृष्टिर्भविष्यति। श्लोके **सूर्यावलम्बिनः** इति पदं प्रयुक्तम्। **'सूर्यावलम्बिनः ग्रहाः इत्युक्तौ अस्तमयाभिलाषिणः ग्रहाः। तथा मन्दग्रहाः अग्रतः शीघ्रग्रहाः पृष्ठतश्च अस्तमयं यान्ति'** इति व्याख्यानकारो भट्टोत्पलः कथयति।

❈ **प्रकृतौ उत्पन्नैः विविधैः निमित्तैः वृष्टेः ज्ञानम् –**विविधाः पक्षिणः प्राणिनः च प्रकृतौ उत्पद्यमानं सूक्ष्मातिसूक्ष्मं वैपरीत्यमवगच्छन्ति । भूकम्पाद्युत्पातानां सम्भवे गो-सर्पादयः प्राणिनः स्वकीयं नैसर्गिकं स्वभावं त्यक्त्वा विपरीतशीलाः लक्ष्यन्तेत्यादिना वयं पत्रिकासु पठितवन्तस्स्याम । अथवा इन्द्रचापः (Rainbow), परिवेषः (Halos), प्रतिसूर्यः (Mock Sun) इत्येवंविधानि प्राकृतिकानि निमित्तानि क्वचिदेव विशिष्टेषु सन्दर्भेषु दृष्टिपथमायान्ति । एतादृशानां निमित्तानां फलानि संहितायां प्रोक्तानि । तदस्मिन् खण्डे प्रस्तूयते । तदादौ रवेः स्वरूपवशात् वृष्टेरागमनं चिन्त्यते यथा -

**उदयशिखरिसंस्थो दुर्निरीक्ष्योऽतिदीप्त्या**
**द्रुतकनकनिकाशः स्निग्धवैडूर्यकान्तिः ।**
**तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान्**
**प्रतपति यदि चोच्चैः खं गतोऽतीव तीक्ष्णम् ॥**[2]

यदि वृष्टिकाले सूर्योदयकालिकः रविः द्रुतसुवर्णोपमः (like Molten Gold) निर्मलवैडूर्यमणेस्सदृशश्च भूत्वा अत्यधिककान्त्या युक्तश्चेत् अथवा

---

[1]बृहत्संहिता –28अ .22श्लो.

[2]बृहत्संहिता –28अ .03श्लो.

मध्याह्नकाले तीक्ष्णातपश्चेत् तस्मिन् दिने महती वृष्टिर्जायते। एवमेव -

**विरसमुदकं गोनेत्राभं वियद्विमला दिशो**
**लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः ।**
**पवनविगमः पोप्लूयन्ते झषाः स्थलगामिनो**
**रसनमसकृन्मण्डूकानां जलागमहेतवः ॥[1]**

अरुचिकरं जलं, गोनयनसदृशः आकाशः, निर्मलाः दिशः, सैन्धवलवणे आर्द्रता, काकस्याण्डवच्छवेतनीलयुक्तः आकाशः, वायोः निरोधः, मत्स्याः प्लवन्तः स्थलगामिनः दृष्टाः, असकृच्छब्दायमानाः मण्डूकाः – एतेषां लक्षणानां दर्शनेन सद्योवृष्टिं वदेत् । अन्यान्यपि निमित्तान्युक्तानि यथा -

**मार्जारा भृशमवनिं नखैर्लिखन्तो**
**लोहानां मलनिचयः सविस्रगन्धः ।**
**रथ्यायां शिशुरचिताश्च सेतुबन्धाः**
**सम्प्राप्तं जलमचिरान्निवेदयन्ति ॥[2]**

बिडालाः स्वनखैः भूमिं लिखन्तः दृश्यन्ते। अयोभाण्डानां कांस्यानां वा मलसमूहः (Accumulation of Rust) मांस-मत्स्यान्यतरगन्धयुक्तः भवति। बालकाः सेतुबन्धान् रचयन्तः दृष्टाः। एषु त्रिष्वन्यतमं लक्षणं दृष्टं तदा सद्योवृष्टिं ब्रूयात् । अस्मिन् विषये बहूनि निमित्तानि सद्योवृष्टिलक्षणाध्याये अभिहितानि । विस्तरभयादत्र दिङ्मात्रमेव प्रदर्शितमस्ति ।

❋ **मेघानां स्वरूपलक्षणेन सद्योवृष्टेः ज्ञानम् –**आकाशे चरन्तः मेघाः विविधाः आकृतीः बिभ्रन्ति । अतस्तैः आकृतिलक्षणैरपि वृष्टेः ज्ञानमुक्तं यथा –

**मयूरशुकचाषचातकसमानवर्णा यदा**

---

[1]बृहत्संहिता –28 अ .04 श्लो.

[2]बृहत्संहिता –28 अ .05 श्लो.

**जपाकुसुमपङ्कजद्युतिमुषश्च सन्ध्याघनाः ।**
**जलोर्मिनगनक्रकच्छपवराहमीनोपमाः**
**प्रभूतपुटसञ्चया न तु चिरेण यच्छन्त्यपः ॥[1]**

मयूरस्य शुकस्य चाषस्य चातकस्य वा वर्णसदृशाः अथवा जपाकुसुमस्य, पङ्कजस्य वा वर्णसदृशाः मेघाः दृश्यन्ते।[2] जलावर्तः, पर्वतः, नक्रः, कूर्मः, वराहः, मीनः – एतादृशाकृतियुक्ताः प्रभूताः मेघाः आकाशस्थाश्चेत् सद्य एव प्रचुरां वृष्टिं सूचयन्ति। एवमेव -

**पर्यन्तेषु सुधाशशाङ्कधवला मध्येऽञ्जनालित्विषः**
**स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः ।**
**माहेन्द्रीप्रभवाः प्रयान्त्यपरतः प्राग्वाम्बुपाशोद्भवा**
**ये ते वारिमुचस्त्यजन्ति न चिरादम्भः प्रभूतं भुवि ॥ [3]**

श्वेतमृत्तिका इव, चन्द्रकिरणसदृशाः, मध्यभागे कज्जलवद् भ्रमरवद्वा कृष्णवर्णोपमाः निर्मलाश्च, उपर्युपरि (नैकपुटाः) स्थिताः, जलकणान्मुञ्चन्तः, सोपानपङ्क्तिसदृशाः, पूर्वस्यां दिश्युत्पन्नाः पश्चिमां दिशं प्रति प्रयास्यमानाः, पश्चिमदिश्युत्पन्नाः पूर्वां दिशं प्रति गम्यमानाः वा मेघाः अकाशे दृष्टिपथमागतास्तर्हि प्रभूता वृष्टिः अचिरेण भविष्यति।

**यद्यमोघकिरणाः सहस्रगोरस्तभूधरकरा इवोच्छ्रिताः ।**
**भूसमञ्च रसते यदाम्बुदस्तन्महद्भवति वृष्टिलक्षणम् ॥[4]**

रवेरुद्गताः किरणाः अस्ताचलपर्वतादुद्गताः श्वेतकिरणा इव दृश्यन्ते तथा

---

[1]बृहत्संहिता –28 अ .14 श्लो.

[2]वर्णविवक्षायामत्र अतिनीलः अतिलोहितो वा वर्ण इति भट्टोत्पलः व्याख्याति ।

[3]बृहत्संहिता –28 अ .15 श्लो.

[4]बृहत्संहिता –28 अ .18 श्लो.

मेघाः भुवं स्पृशन्तीव दृष्टास्तर्हि अतिवृष्टिर्भवति ।

अत्रोक्तेषु गर्भलक्षणं गर्भधारणञ्च मार्गशीर्षादिमासेषु, सद्योवृष्टेः लक्षणं प्राकृतिकनिमित्तेन, मेघानां स्वरूपलक्षणेन, ग्रहाणां चारमनुसृत्य वा अवगन्तव्यम् । उक्तेषु निमित्तेषु कतिपयनिमित्तानि अतिवृष्टिसूचकानि । तथा कानिचन निमित्तानि अनावृष्टिसूचकानि । एतेषां निमित्तानां ज्ञानाय प्रतिदिनमपि अनन्यमनसा बहिरुत्पद्यमानानि प्राकृतिकलक्षणानि निरीक्षेत । अतोऽत्र मिहिरस्य वचो यथा –

**दैवविदवहितचित्तो द्युनिशं यो गर्भलक्षणे भवति ।**
**तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ॥**[1]

❋ **उपसंहारः -** राष्ट्रसमृद्धये कृषिकार्यस्य समृद्धिरनिवार्या । सुसमये वृष्टेः सम्भवे सस्यानां प्रवृद्धिः ततश्च धान्य-फलादीनामुत्पत्तिः । अतः बहवो हि ग्रामवासिनः कर्षकाः निमित्तानि दृष्ट्वा ग्रहनक्षत्रयोः स्थितिञ्चावगत्य वृष्टेस्सम्भवासम्भवत्वं विज्ञायैव कार्यं कुर्वन्त आसन् । अधुनापि केचन तादृशाः कृषीवलास्सन्ति । अन्यच्च प्रकृतमनुसरामश्चेत् वायुविद्याभिज्ञा (Meteorologist) उपग्रहादीनां विविधानां यन्त्राणां साहाय्येन वृष्टेरागमनम् अवगम्य वार्तापत्रिकादिषु विज्ञापयन्ति । प्रतिवर्षं मान्सून् (Monsoon) अमुकदिनाङ्के नैर्ऋत्यदिशि प्रविशति इति इमे विज्ञानिनः प्रख्यापयन्ति च । किन्तु तत्रापि क्वचिद्दोषाः दृश्यन्त एव । किन्तु प्राचीनास्तु नानाविधानि प्राकृतिकनिमित्तानि, ग्रहनक्षत्रयोः गतिञ्चावलम्ब्य तत्स्फुटतया विचारयामासुः । अतः यदि प्राचीनपद्धतिं परिशीलयन्तो विज्ञानिनः यन्त्राणामपि साह्यं स्वीकुर्वन्ति तर्हि लोके वृष्टिम्, अतिवृष्टिम्, अनावृष्टिञ्च पूर्वमेवाभिज्ञातुं प्रभवन्तीति मे मतिः ।

---

[1] बृहत्संहिता –21 अ .3 श्लो.

**** **** **** **** ****

- **आकरग्रन्थसूची -**

१. **बृहत्संहिता (खण्डद्वये) -** सं. कृष्णचन्द्रद्विवेदी, सम्पूर्णानन्दविश्वविद्यालयप्रकाशनम्, वाराणसी।

२. Brihatsamita (In 2 Vols.) - M Ramakrishna Bhat, Motilal Banarsidass Publishers Pvt. Ltd., Delhi

३. **नारदसंहिता –** पं. रामजन्ममिश्र, चौखम्भा संस्कृत भवनम्, वाराणसी

**********

# ग्रहणम्

**डा. प्रसादभट्टः**

विलम्बिनामसंवत्सरस्य आषाढपूर्णिमायाम् अर्थात् २८/०७/१८ तमे दिनाङ्के खग्रासचन्द्रग्रहणमासीत् । तथैव तस्मिन्नेव मासे अमायां भारतादन्यत्र अर्थात् युरोप् इत्यादिदेशेषु सूर्यग्रहणमपि दृष्टम् । तस्मात् दूरदर्शनादिषु बहुविधचर्चाः सम्पन्नाः । बहवः चर्चितवन्तः सूर्यग्रहणं न दृश्यते तस्मात् अनुष्ठानाधिकं कर्तव्यं वा? मम राशौ दोषः अस्ति वा ? दोषे सति किं प्रायश्चित्तमित्यादयः ।

तत्रादौ किन्नाम ग्रहणमिति जिज्ञास्यते । ग्रहणं नाम गगनचारिणां ग्रहबिम्बानां गतिवशात् सम्भाव्यमाना ग्राह्यग्रहकयोः क्रीडा । एकत्र शीघ्रगतिकः ग्राहकः मन्दगतिकं ग्राह्यं गृह्णाति, अन्यत्र शीघ्रगतिकः एव ग्राह्यः मन्दगतिकं ग्राहकं प्रविशति । उभयत्रापि ग्राहकः यदा ग्राह्यं वस्तु गृह्णाति तदा ग्रहणम् ।

**ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ ।**
**समागमः शशाङ्केन सूर्येणास्तमनं सह[1] ॥**

इति भगवता भास्करेणैवोक्तत्वात् कुजादीनां पञ्चताराग्रहाणां परस्परसंयोगेन न ग्रहणसम्भवः । तथैव चन्द्रेण सह तेषां योगः **समागम**शब्देनोच्यते। तथैव सूर्येण सह **अस्तमनम्** इति । तस्मात् पञ्चताराग्रहाणामन्योन्ययोगो वा तेषां चन्द्रेण सह सहवासो वा ग्रहणशब्देन नोच्यते। अतः सूर्यचन्द्रयोः योगेन ग्रहणसम्भवः इति चिन्तयितुम् शक्यते । किन्तु **दर्शस्सूर्येन्दुसङ्गमः** इत्युक्तिसद्भावात् सूर्यचन्द्रयोः योगः प्रत्यमायां भवति किन्तु तत्र सर्वत्र ग्रहणं न दृश्यते । तस्मात् तयोः योगः सर्वदा ग्रहणशब्देन नोच्यते । तर्हि

[1] सू.सि- ग्रहयुत्यधिकारः श्लो.सं १

ग्राहकः ग्राह्यं गृह्णाति इत्यत्र पुनः कः ग्राह्यः कः ग्राहकः इति जिज्ञासायां भगवान् सूर्यः उपदिशति -

**छादको भास्करस्येन्दुः अधःस्थो घनवत् भवेत्**
**भूच्छायां प्राङ्मुखश्चन्द्रः विशत्यस्य भवेदसौ**[1] ॥ इति॥

अर्थात् – **सूर्यग्रहणे ग्राहकः चन्द्रः ग्राह्यः सूर्यः** । ग्राहकः चन्द्रः ग्राह्यं रविं मेघवत् आच्छादयति । तथैव चन्द्रग्रहणे भूच्छायां प्राङ्मुखश्चन्द्रः स्वशीघ्रगत्या प्रविशति । अतः तत्र **ग्राह्यः चन्द्रः ग्राहकः भूच्छाया** इति । अत्र पुनः संशयः यत् **दर्शस्सूर्येन्दुसङ्गमः** इत्युक्तिवशात् यदि प्रति अमायां सूर्यचन्द्रयोः योगः भवति तर्हि किमर्थं ग्रहणं न भवति इति ।

**सूर्यसञ्चारवृत्तं क्रान्तिवृत्तमिति** वदामः । तत्रैव नक्षत्राण्यपि भवन्ति । किन्तु चन्द्रादयः अन्ये ग्रहाः स्वस्वविमण्डले भ्रमन्ति । अर्थात् सर्वेषां कक्षावृत्तं भिद्यते । तस्मात् कदम्बस्थानात् ग्रहोपरिकृतं वृत्तं क्रान्तिवृत्ते यत्र लगति तत्र **तत्तद्ग्रहस्य स्थानमिति** । यदा चन्द्रस्य स्थानं सूर्यस्थितिश्च समाने भवतः तदा अमावास्या । अतः अमान्ते चन्द्रसूर्ययोः राशि-अंशादयः समानाः भवन्ति । किन्तु **सर्वासु अमासु पूर्वापरयाम्योत्तर-अन्तराभावः सूर्यचन्द्रयोर्मध्ये न भवतीत्यतः तत्र ग्रहणं न** सम्भवति । तर्हि कदा ग्रहणसम्भवः इति चेत् तत्र सूर्यसिद्धान्ते उच्यते –

**भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेपि वा ।**
**शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके[2] ॥**

अर्थात् अत्र कियत् शब्दस्य किञ्चित् इत्यर्थः। तदेव अक्षरसङ्ख्यया ११ । सूर्यचन्द्रयोः शरान्तरं यदि ११ अंशापेक्षया न्यूनं तदा ग्रहणम् । अर्थात्

[1] सू.सि- चन्द्रग्रहणाधिकारः श्लो.सं ९

[2] सू.सि- चन्द्रग्रहणाधिकारः श्लो.सं ६

क्रान्तिवृत्तचन्द्रविमण्डलयोः यत्र सम्पातः तत्र तयोः वृत्तयोः पूर्वापरयाम्योत्तररूपान्तराभावः । अतः तस्मिन् स्थाने अथवा तस्य समीपे अर्थात् ग्राह्यग्राहकयोः ११ अंशापेक्षया न्यूनशरान्तरे अमा भवति तदा बृहदाकारयुक्तः सूर्यः तथा भूमेः च मध्ये अल्पकायः चन्द्रः आगत्य मेघवत् सूर्यम् आच्छादयति इत्यतः तदा सूर्यग्रहणम् ।

एवमेव यथा दीपस्य पुरतः किञ्चिद्वस्तु तद्दीपप्रकाशमवरुध्य सूचीरूपां छायामुत्पादयति तथैव सूर्यस्य पुरतः भूमिः आगत्य सूचीरूपां च्छायाम् उत्पादयति । यदा चन्द्रपातसमः रविः तदा एव पूर्णिमा अपि भवति तदा चन्द्रः भूभां प्रविशतीत्यतः तदा चन्द्रग्रहणम् । अत्रापि पूर्वोक्तरूपेण भूभा चन्द्रयोः सामान्यतया एकादशांशकादल्पे शरे ग्रहणसम्भवः इत्युक्तवन्तः ।

तर्हि **राहुकृतग्रहणं केतुकृतग्रहणम्** इति उच्यते खलु तत्कथमिति चेत् क्रान्तिवृत्तविमण्डलयोः **यः पूर्वसम्पातः सः राहुः** अन्यः **पश्चिमसम्पातः केतुः** । यस्य स्थाने अथवा समीपे ग्रहणं भवति तत् तेनकृतग्रहणमिति निर्णयः ।

यदा शरः शून्यम् अथवा अत्यल्पः तदा सम्पूर्णग्रहणम् तथा मानैक्यार्धादल्पे शरे खण्डग्रासः । एवमेव सूर्यग्रहणे कङ्कणग्रहणमिति विशिष्टः सम्भवति । ग्रहणेऽस्मिन् ग्राह्यस्यापेक्षया ग्राहकस्य अत्यल्पः बिम्बः शराल्पत्वात् बृहत्कायकग्राह्यबिम्बस्य मध्यं गच्छति । अर्थात् बृहदाकारकरवेः मध्यभागं अत्यल्पकायकः चन्द्रः यदा गच्छति तदा चन्द्रच्छाया भूमिं न स्पृशति अतः चन्द्रबिम्बपरितः प्रकाशयन् कङ्कणवत् दृष्टो भवति सूर्यः । तदा कङ्कणग्रहणमिति (२६/१२/२०१९ तमे दिनाङ्के सम्भवति) ।

तथैव ग्रहणं कदा अनादेश्यमित्यपि वदति

**इन्दोर्भागः षोडशः खण्डितोपि तेजःपुञ्जच्छन्नभावान्नलक्ष्यः ।**

**तेजस्तैक्ष्ण्यात् तीक्ष्णगोर्द्वादशांशो नादेश्योऽतोल्पो ग्रहो बुद्धिमद्भिः**[1] **॥** इति।

एषः सामान्यग्रहणपरिचयः । सूच्याकारा भूच्छाया चन्द्रकक्षाम् अतीत्य दूरं गच्छतीति चन्द्रग्रहणे छाद्यच्छादकयोः एका एव कक्षा । किन्तु रविग्रहणे छाद्यच्छादकयोः रविचन्द्रयोः कक्षाभेदसद्भावात् ऊर्ध्वाधोरूप-अन्तरं विद्यते इत्यतः चन्द्रः लम्बितः इव दृश्यते । अतः **गर्भीयदर्शान्ततः पूर्वमेव अथवा कालान्तरे पृष्ठीयदर्शान्तः** । एवं तिथेः भिन्नं पूर्वापरान्तरं जायते । एतदेव लम्बनमिति कथ्यते । यथा पूर्वापरान्तरं सम्भवति तथैव याम्योत्तरान्तरमपि शरात् भिन्नं सिध्यति इदमेव नतिः । एते लम्बलावनती कक्षाभेदवशादेव सञ्जायेते । **पूर्वपरान्तररूपलम्बनं तिथौ संस्कार्यम्** । **तथा यम्योत्तरान्तररूपनतिः शरे संस्कार्या** । **लम्बनसंस्कृततिथ्यन्तः दृग्दर्शान्तः** इति **नतिसंस्कृतः शरः स्पष्टशरः** इति च कथ्यते। सूर्यचन्द्रयोः ग्रहणयोरपि तिथ्यन्तकालस्य एव ग्रहणमध्यकालत्वात् उभयत्रापि स्थित्यर्धकालानयनं समानतया भवति । किन्तु सूर्यग्रहणे तत्कालीनलम्बन-जनितसंस्कारः देयः । अतः सूर्यग्रहणे भूयः असकृत्कर्म कर्तव्यं भवति ।

उभयत्रापि ग्रहणे **मानैक्यार्धसमः यदा शरः तदा ग्रहणस्पर्शः**, यदा **मानैक्यार्धदल्पः शरः** तदा ग्राहकः ग्राह्यं गृह्णातीत्यतः **ग्राससम्भवः** । **छाद्यबिम्बादल्पे ग्रासे खण्डग्रहणं छाद्यबिम्बादधिके ग्रासे खग्रासग्रहणम्** । एवम् **खग्रासग्रहणे** स्पर्शसम्मीलनमध्योन्मीलनमोक्षा इति **पञ्चस्थितयः** तथैव **खण्डग्रासे** तु स्पर्शमध्यमोक्षाश्चेति **त्रय एव** विभागाः । यदा **ग्राह्य-ग्राहकयोः स्पर्शः तदा स्पर्शः**। यदा **पूर्णमाच्छादयति तदा सम्मीलनम्** । यदा **मोक्षारम्भः** तदा **उन्मीलनम्** । **तिथ्यन्तकाले मध्यग्रहणम्** । यदा **ग्राहकः ग्राह्यं त्यजति तदा**

---

[1] सू.सि- छेद्यकाधिकारः श्लो.सं १३

**मोक्षः**। **स्पर्शात् मोक्षं यावत् स्थितिः** । **सम्मीलनात् उन्मीलनं यावत्** ग्राहकः ग्राह्यं मर्दयतीति सः कालः **विमर्दकालः** । खण्डग्रहणे पूर्णग्रहणं न भवतीत्यतः सम्मीलन-उन्मीलने न भवतः ।

**ग्रहणयोः भेदाः**

उभयत्रापि ग्रहणे केचन भेदाः दृश्यन्ते । तत्रादौ सपातसूर्यस्य भुजांशाः यदा **मनूनकाः** भवन्ति तदा चन्द्रग्रहणं पाताढ्यार्कभुजांशकाः यदि **नगोनाः** तदा सूर्यग्रहणम् इति **सिद्धान्तशिरोमण्युक्तभेदः** । एवमेव चन्द्रस्य प्राग्दिशिस्पर्शः पाश्चिमे मोक्षः । सूर्यस्य पश्चिमे स्पर्शः पूर्वे मोक्षः । अर्कच्छादकात् चन्द्रछादकः पृथुः अत एव अर्धखण्डितं रविबिम्बं शृङ्गाकारेण दृश्यते । चन्द्रबिम्बः कदापि तथा न दृश्यते । बृहच्छादकादेव चन्द्रग्रहणस्थितिः महती सूर्यग्रहणस्थितिः लघ्वी । चन्द्रस्य खग्रासग्रहणे विदेशान्तरेषु स्थिताः अपि समानतया पश्यन्ति खण्डग्रस्तमपि तथैव पश्यन्ति किन्तु चन्द्रः रविं मेघवत् आच्छादयतीत्यतः कुत्रचित् खग्रासग्रहणं कुत्रचित् खण्डग्रासग्रहणम् अन्यत्र कुत्रचित् ग्रहणमेव न दृश्यते । अत्र कारणं ग्राह्यग्राहकयोः कक्षाभेदः एव भवति । ग्रहणे वर्णे भेदोपि दृश्यते । तद् भास्कराचार्येण उच्यते –

**स्वल्पच्छन्ने धूम्रवर्गः सुधांशोरर्धे कृष्णः कृष्णरक्तोधिकेऽर्धात्**
**सर्वच्छन्ने वर्णः उक्तः पिशङ्गो भानोश्छन्ने सर्वदा कृष्ण एव**[1] **॥ इति** ।

सर्वं गङ्गासमं तोयं सर्वे ब्रह्मसमा द्विजाः । सर्वं भूमिसमं दानं राहुग्रस्ते दिवाकरे । बहुफलं जपदानहुतादिके स्मृतिपुराणविदः प्रवदन्ति हि इत्यादिवचनमाश्रित्य ग्रहणकाले जपादिपुण्यक्रिया अनुष्ठेया इत्यवगम्यते । तत्र पुराणवचनानि – स्थानं स्यादुपरागादौ मध्ये होमसुरार्चने । सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने ॥ अकुर्वाणस्तु नास्तिक्यात् पङ्के गौरिव सीदति । स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने । सन्ध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः । द्वयोरपि च

---

[1]सि.शि - धिकारः श्लो.सं

कर्तव्यं यदि स्याद् राहुदर्शनम् । उषस्युषसि यत् स्नानं सन्ध्यायामुदिते रवौ । चन्द्रसूर्योपरागे च प्राजापत्येन तत्समम् ॥

तथैव मुहूर्तचिन्तामणिकारः गोचरप्रकरणे ग्रहणे सति वैयक्तिकफलं निर्दिशति –

**जन्मर्क्षे निधनं ग्रहे जनिभतो घातः क्षतिः श्रीर्व्यथा**
**चिन्ता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशस्सुखम्**
**लाभोपाय इति क्रमात्तदशुभध्वस्त्यै जपः स्वर्णगो-**
**दानं शान्तिरथो ग्रहं त्वशुभदं नो वीक्ष्यमाहुः परे ॥ इति**[1] ।

एतदेव पुनः वसिष्ठेन – यस्यैव जन्मनक्षत्रे ग्रस्यते शशिभास्करौ । तज्जातानां भवेत् पीडा ये नराः शान्तिवर्जिताः इति ।

अत्र जन्मनक्षत्रे निधनम् इत्युक्तत्वात् सङ्क्रान्तिग्रहणे जन्म–अनुजन्म–त्रिजन्मस्वपि इति कैश्चित् अन्वयः क्रियते । एवमेव पूर्वोक्तघातादिफलचिन्तनम् आत्मानमिति केचित् । द्रव्यस्य इति अपरे । पूर्वोक्तफलमेव यदि अङ्गीकुर्मः तर्हि अत्र जन्मराशौ द्वितीये चतुर्थे पञ्चमे सप्तमे अष्टमे नवमे व्यये च अनिष्ठफलम् । कुत्रचित् “ग्रासात् तृतीयाष्टमगश्चतुर्थस्तथायसंस्थः शुभदः स्वराशिः नवांशधीसप्तमगश्च मध्ये पूज्यो द्विषट्को दशमाद्यसंस्थः” इति लभ्यते । अन्यत्र कुत्रचित् – त्रिषड्दशायोपगते नराणां शुभप्रदं स्यात् ग्रहणं रवीन्द्वोः । द्विसप्तनन्देषु च मध्यमं स्याच्छेषेष्वनिष्टं मुनयो वदन्ति ॥ इत्यादिमतभेदाः सन्ति । अत्र आचरणार्थं योग्यं प्रमाणं किमित्युक्ते स्वदेशीयः सम्प्रदायः । यतो हि अत्रोक्तं सर्वं मुहूर्तग्रन्थप्रमाणमित्यतः **मुहूर्तेषु देशाचारः प्रधानः** तस्मादेव मौहूर्तिकाः ब्रुवन्ति “**न शास्त्रदृष्टया विदुषा कदाचित् उल्लङ्घनीयाः कुलदेशधर्माः**” इति । पूर्वोक्तफलं सर्वं षण्मासपर्यन्तमिति अत्र अनुक्तमपि अवगन्तव्यम् ।

---

[1] मुहूर्तचिन्तामणिः

पूर्वोक्तग्रहणदोषपरिहारार्थं स्कन्धपुराणे – **गोदानं भूमिदानञ्च स्वर्णदानं विशेषतः । ग्रहणे क्लेशनाशाय दैवज्ञाय निवेदयेत्** । इत्युक्तम् । ग्रहणे “**सर्वं गङ्गासमं तोयं सर्वे ब्रह्मसमा द्विजाः**” इत्युक्तत्वात् अत्र पात्रापात्रविचारः द्रव्यविचारः देशविचारश्च न क्रियते इति व्यासमतम् ।

स्नानादिकं कदा कर्तव्यमिति वदति – **ग्रस्यमाने भवेत् स्नानं ग्रस्ते होमो विधीयते । मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते** ॥ इति ।

एवमेव वसिष्ठसंहितायां तथा मत्स्यपुराणे च जन्मनक्षत्रे जन्मराशौ च ग्रहणे सति शान्तिर्विधेया इति उपदिश्य विस्तृतरूपेण उपरागशान्तिविधानं प्रतिपादयति । अतः जन्मनक्षत्रजन्मराशिव्यतिरिक्ते स्थाने ग्रहणे सति वचनाभावात् शान्तिः अनपेक्षिता किन्तु स्वविभवानुरूपदानादिभिः शाम्यतीति मुहूर्तचिन्तामणिकारस्याभिप्रायः ।

**स्नानादिविचारः** – “**सर्वेषामेव वर्णानां सूतकं राहुदर्शने**” इत्युक्तत्वात् तथा धर्मशास्त्रेषु “**द्वीपान्तरे ग्रहणसत्वेपि दर्शनयोग्यत्वाभावात् न पुण्यकालः**” इत्युक्तत्वात् मेघाद्यावरणेन तथा गृहमध्ये स्थितस्य अन्धस्य वा राहुदर्शनाभावात् ग्रहणदोषः नास्तीति न चिन्तनीयम् । यतो हि मेघादिप्रतिबन्धेन चाक्षुषदर्शनासम्भवे शास्त्रादिना स्पर्शमोक्षकालौ ज्ञात्वा स्नानदानाद्याचरेदिति धर्मशास्त्रप्रमाणम् । तदेव लिङ्गपुराणे – **चन्द्रसूर्यग्रहे स्नायात् सूतके मृतकेऽपि च । अस्नायी मृत्युमाप्नोति स्नायी पापं न विन्दति** ॥ इति ।

ग्रहणे स्नानं सचैलम् अमन्त्रकं कार्यम् । सचैलत्वं मुक्तिस्नाने इति केचित्। तत्र सुवासिनीभिः अशिरस्स्नानमुपदिष्टम् । अतः अन्येषां शिरस्स्नानमेव । तत्र पुनः जाताशौचे मृताशौचे च ग्रहणस्नानं कर्तव्यमेव । यदि स्त्री रजस्वला तयापि स्नानं कर्तव्यम् । तदुक्तम् – **स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला** ।

**पात्रान्तरिततोयेन स्नानं कृत्वा वृतं चरेत्** ॥ **न वस्त्रपीडनं कुर्यात् नान्यद्वासश्च धारयेत्** । इति । तत्र विशेषेण ग्रस्तास्ते रविचन्द्रग्रहणे परेद्युः स्नानम्[1] । जले तारतम्यम् –

**शीतमुष्णोदकात् पुण्यमपारक्यं परोदकात् ।**
**भूमिष्ठमुदकात् पुण्यं ततः प्रस्रवणोदकम् ॥**
**ततोपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।**
**ततस्तीर्थनदी गङ्गा पुण्या पुण्यस्ततोऽम्बुधिः ॥**

**पुण्यकालनिर्णयः**

**चन्द्रसूर्यग्रहणं यावच्चाक्षुषदर्शनयोग्यं तावान् पुण्यकालः** इत्युक्तत्वात् ग्रहणं कदा दृग्गोचरो भवति तदा एव पुण्यकालः । तथैव अन्यदेशेषु ग्रहणे सति स्वदेशे गोचराभावात् पुण्यकालः नास्ति । अतः ग्रस्तास्ते ग्रस्तोदये च अस्तात् परं तथा उदयात् पूर्वं पुण्यकालो नास्ति । पुण्यकाले **स्नानजपहोमश्राद्धदानानि पुनः स्नानमिति** तु विदितमेव । **रविवारे सूर्यग्रहणं सोमवारे चन्द्रग्रहणञ्च चूडामणिसंज्ञकं** भवति । तत्र जपादिकमनन्तफलमिति विशेषः ।

**भोजनविचारः**

**सूर्यग्रहे** ग्रहणप्रहरादर्वाक् **यामचतुष्टयं** तथा **चन्द्रग्रहणे** ग्रहणप्रहरात् पूर्वं **यामत्रयं वेधः** । तस्मिन् काले न भोक्तव्यम् । अर्थात् यदि दिनस्य प्रथमयामे सूर्यग्रहः पूर्वस्मिन् दिने रात्रौ यामचतुष्टये न भोक्तव्यम् । दिनस्य द्वितीये यामे यदि सूर्यग्रहणं तर्हि रात्रिद्वितीययामादितः इत्येवमग्रेपि चिन्तनीयम् । रात्रिप्रथमप्रहरे चन्द्रग्रहणे दिनद्वितीययामादौ उपोष्णम् । विशेषेण चन्द्रस्य ग्रस्तोदये यामचतुष्टयवेधात् पूर्वं दिवा न भुञ्जीत इति शास्त्रवाक्यम् । तत्र **खग्रासचन्द्रग्रणे**

---

[1] ग्रस्तावेवास्तमानन्तु रवीन्दू प्राप्नुतो यदि ।
परेद्युरुदये स्नात्वा शुद्धोऽभ्यवहरेन्नरः ॥

**यामचतुष्टयं वेधः तथा खण्डग्रासे यामत्रयमिति** केचिन्मतम् । **बालवृद्धातुराणां तु सार्धप्रहरात्मकः मुहूर्तत्रयात्मको वा** वेधः ।

शक्तस्य वेधकाले भोजने त्रिदिनमुपोष्णं प्रायश्चित्तम् । तथा ग्रहणकाले भोजने प्राजापत्यं प्रायश्चित्तम् ।

**ग्रहणे त्याज्यानि**

पूर्वपक्वमन्नं ग्रहणोत्तरं त्याज्यम् । एवं ग्रहणकालस्थितजलमपि त्याज्यम् । **तक्रं घृततैलपाचितमन्नं क्षीरञ्च पूर्वसिद्धं ग्रहणोत्तरमत्याज्यम्** । अत्र सर्वत्र ग्रहणकाले कुशाग्रं स्थापनीयम् । तदुक्तम् –

**आरनालञ्च तक्रञ्च ह्यादेयं घृतपाचितम् ।**
**उदकञ्च कुशाच्छन्नं न दुष्येत् राहुदर्शने** ॥ इति ॥

सूर्यग्रस्तास्ते चन्द्रग्रस्तोदये च आहिताग्निना अन्वाधानं विधाय जलेन व्रतं कार्यं न तु भोजनम् । चन्द्रग्रस्तास्ते तदुत्तरदिने चन्द्रदर्शनात्परमेव स्नानमित्यतः उत्तरदिने सन्ध्याहोमादौ न दोषः । यदि तत्र सूर्योदयात् परमल्पेन कालेन मुक्तिः मुक्त्यनन्तरं स्नात्वा होमादिकं कार्यम् । चिरकालात्परं मुक्तौ होमकालातिक्रमप्रसङ्गात् ग्रहणमध्ये एव सन्ध्याहोमादिकं कृत्वा मुक्त्यनन्तरं स्नात्वा ब्रह्मयज्ञादिनित्यकर्मकर्तव्यम् । ग्रहणदिने यदि वार्षिकश्राद्धः तर्हि आमान्नेन अथवा सुवर्णेन कर्तव्यमिति धर्मशास्त्रीयः विचारः ।

**मन्त्रदीक्षाविचारः पुरश्चरणविधिश्च -**

**चन्द्रसूर्यग्रहे तीर्थे महापर्वादिके तथा**
**मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन् न शोधयेत्** ॥

इति धर्मशास्त्रीया भाषा । तत्र पुनः **जपहोमतर्पणमार्जनविप्रभोजनात्मकपञ्चविधं** पुरश्चरणम् । ग्रहणे तु स्पर्शकालात् पूर्वं स्नात्वा अमुकगोत्रोऽमुकशर्माहम् अमुकग्रस्ते अमुकग्रहणे अमुकदेवतायाः

अमुकमन्त्रसिद्धिकामः ग्रासादिमुक्तिपर्यन्तम् अमुकमन्त्रस्य जपरूपपुरश्चरणं करिष्ये इति सङ्कल्प्य आसनबन्धन्यासादिकं स्पर्शात् पूर्वमेवविधाय स्पर्शादिमोक्षपर्यन्तं मन्त्रजपं कुर्यात् । ततः परदिने स्नानादिकं विधाय पुरश्चरणजपसाङ्गतार्थं तद्दशांशहोमादिकमथवा तत्तच्चतुर्गुणितसङ्ख्याजपो वा कार्यः । एवं पुरश्चरणकर्तुः स्नानदानादिनैमित्तिककर्मलोपे प्रत्यवायदोषप्रसङ्गात् नैमित्तिकं स्नानदानादिकं भार्यापुत्रादिप्रतिनिधिद्वारा कार्यम् ।

यः पुरश्चरणादिकं न करोति सोऽपि गायत्रीजपादिकं कर्तव्यमेव । यदि न करोति तर्हि मन्त्रमालिन्यं भवति ।

**अथ दानपात्रादिविचारः**

त्रिरात्रभेकरात्रं वा समुपोष्य ग्रहणे स्नानदानाद्यनुष्ठाने महाफलम् । एक-रात्रपक्षे ग्रहणदिनात्पूर्वदिने उपवास इति केचित् । अत्र गोभूहिरण्यधान्यादिदानं महाफलम् । तपोविद्योभययुक्तं मुख्यं दानपात्रम् । सत्पात्रे दानात्पुण्यातिशयः । सर्वं गङ्गासमं तोयं सर्वे व्याससमा द्विजाः । सर्वं भूमिसमं दानं ग्रहणे चन्द्रसूर्ययोः ॥ इति सामान्यनियमः । तत्र तारतम्यमुक्तम् - सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे[1] ॥ श्रोत्रिये[2] शतसाहस्रं पात्रे[3]त्वानन्त्यमनुते ॥ इति ।

**ग्रहणकाले वार्षिकश्राद्धविचारः**

ग्रहणदिने पित्रादेर्वाधिकश्राद्धप्राप्तौ सति सम्भवेऽन्नेन कार्यम् ।

---

[1] गर्भाधानादि संस्कारवेदोपनयनैर्युतः । नाध्यापयतिनाधीते स भवेद् ब्राह्मणब्रुवः ॥ अपि. च- 'धर्मकर्मविहीनश्च ब्राह्मलिङ्गैर्विवर्जितः । ब्रवीति ब्राह्मणश्चाहं स ज्ञेयो ब्राह्मणब्रुवः॥ सत्यं दमस्तपोदानमहिंसेन्द्रियनिग्रहः। दृश्यन्ते यत्र राजेन्द्र स ब्राह्मण इति स्मृतः ॥

[2] 'ओं-कारपूर्विकास्तिस्रः। सावित्रीयश्च विन्दति । चरितब्रह्मचर्यश्च स श्रोत्रिय उच्यते ॥ इति यमः ।

[3] न विद्यया केवलया तपसा वाऽपि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥' इति याज्ञवल्क्यः |

ब्राह्मणाद्यलाभेन असम्भवे तु आमेन हेम्ना वा कार्यम् ॥ सूर्यग्रहणे तीर्थयात्राङ्गश्राद्धवत् घृतप्रधानान्नेन श्राद्धं कार्यम् । ग्रहणे श्राद्धभोक्तुः महा दोषः । अतः ग्रहणदिने यदि वार्षिकश्राद्धः तर्हि आमान्नेन अथवा सुवर्णेन कर्तव्यमिति धर्मशास्त्रीयः विचारः ।

**ग्रहणे शयनादिकृते दोषः**

ग्रहणकाले शयने कृते रोगो मूत्रे दारिद्र्यं पुरीषे कृमिर्मैथुने गामसूकरोऽभ्यङ्गे कुष्ठी भोजने नरक इति ॥

**ग्रहणे मुहूर्तविचारः**

मङ्गलकार्येषु पूर्णगासे चन्द्रगृहे द्वादश्यादितृतीयान्तं दिनसप्तकं वर्ज्यम् । सूर्यपूर्णग्रासे एकादश्यादिचतुर्थ्यन्तदिनानि वर्ज्यानि । खण्डग्रहणे तु चतुर्दश्यादिदिनत्रयं वर्ज्यम् । ज्योतिर्निबन्धेषु ग्रासपादतारतम्येन दिनाधिक्योनत्वं तारतम्येन योजितम् । ग्रस्तास्ते पूर्वं दिनत्रयं वर्ज्यम्। ग्रस्तोदये परं दिनत्रयं वर्ज्यम् । गृहणनक्षत्रं षण्मासं पूर्णग्रासे वर्ज्यम् । पादादिग्रासे सार्धमासादितारतम्येन योज्यम् ।

**संहितासारः**

संहितास्कन्धेपि ग्रहणविचारः बहुधा चर्चितः । रव्यादीनां स्वरूपादिकं द्रष्टुं शक्नुमः किन्तु राह्वोः न । अतः तत्र राहुः अस्ति वा न वा इति बहुधा चिन्तितम् आचार्येण वराहमिहिरेण स्वकीयबृहत्संहितायाः राहुचाराध्याये । ततः ग्रहणविचारं कृत्वा तत्र देशविशेषेण फलप्रवचनं करोति । तत् कथमित्युक्ते मेषादिषु ग्रहणे, चैत्रादिमासे ग्रहणे च फलम्, तथा ग्रहणग्रासे मोक्षे च दशप्रभेदान् अङ्गीकृत्य राह्वोः वर्णानपि बहुधा विभज्य फलं कथयति । एवमेव नक्षत्रकूर्माध्याये तथा नक्षत्रव्यूहाध्याये च तत्तन्नक्षत्रप्रतिनिधीभूतदेशान् नक्षत्रकारकान् सङ्गृह्य तस्य प्रयोजनकथनावसरे नक्षत्रे ग्रहणादिसद्भावे तत्तद्देशकारकादिषु दूषणं निगदितम् ।

एवमेव ग्रहणसमये ग्रहोपरि यदि शुभदृष्टिः तदा शुभं अशुभदृष्टिवशात् विशेषतयाशुभफलमपि कथितम् । एवमेव यद्येकस्मिन् मासे रविचन्द्रयोः ग्रहणं तदा क्षितिपाः स्वबलक्षोभैः अतिशस्त्रकोपन च संक्षयमायन्ति इति सूचितवान् । तथैव चन्द्रग्रहणानन्तरं यदि सूर्यग्रहणं तर्हि "तत्रानयः प्रजानां दम्पत्योर्वैरमन्योन्यम्" इति तथा सूर्यग्रहणात्परं चन्द्रग्रहणं यदि "तत्र विप्राः नैकक्रतुफलभाजो भवन्ति मुदिताः प्रजाश्चैव" इति फलादेशः इत्युक्तम् ।

**********

# गर्भविज्ञानम्

**डा. प्रदीपशर्मा**

**"कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति"** इति आचार्यवराहमिहिर- वचनानुसारं वास्तविकरूपेण पूर्वकर्मणः परिपाकद्योतकाः ग्रहाः इह जन्मनि महान्तं प्रभावं जनयति इत्यपि सुविज्ञातमेव । अमुमेव विषयं प्रकटयति आचार्यः मीनराजः वृद्धयवनजातके । तद्यथा -

**या पूर्वकर्मप्रभवस्य धात्री धात्रा ललाटे लिखिता प्रशस्तिः ।**
**तां शास्त्रमेतत् प्रकटं विधत्ते दीपो यथा वस्तु घनेऽन्धकारे ॥**[1]

आचार्यवराहमिहिरकालात्पूर्वमेव भारते यवनज्योतिषपरम्परा अपि दृग्गोचरी भवति । यवनानां प्रभावं तु फलितज्योतिषशास्त्रस्य विविधग्रन्थेषु स्पष्टतया द्रष्टुं शक्नुमः । यवनग्रन्थेषु मूर्धन्यं स्थानम् अलङ्करोति आचार्यमीनराजप्रणीतं वृद्धयवनजातकम् । तत्र हि आचार्यैः आधानाध्याये गर्भस्थशिशुविषयकाः नैके विचाराः स्फुटतया उपस्थापिताः दृश्यन्ते ये हि मनोविज्ञानदृष्ट्या वर्तमानसमाजे चर्चायां विद्यन्ते । अयं हि विषयः अन्येषाम् आचार्याणां ग्रन्थेषु विरलतया अवलोक्यते अतः तद्विषयकः विमर्शः एव अत्रोपस्थाप्यते ।

**गर्भमासानामधिपतयः –**

गर्भे शिशोः विकासः कथं भवति इत्यस्मिन् विषये वैज्ञानिकरीत्या आचार्यमीनराजस्य मतमुपलभ्यते । तन्मतानुसारं गर्भधारणे प्रथममासे शुक्रः स्वामी भवति, अस्मिन् मासे रजवीर्ययोः संयोगः जायते । गर्भाधानात् परं प्रथमे मासे शुक्रः

---

[1] वृ.य.जा. 1.3

सौम्यराशौ बलयुक्तः भवति तदा तद्रूपगुणानुसारं जातकस्य आकृतिः बलादिकं च भवति । द्वितीयमासाधिपतिः भौमः भवति तस्मिन् मासे गर्भे (कठोरता) काठिन्यं भवति । तृतीयमासस्य अधिपतिरूपेण बृहस्पतिः विराजते । तस्मिन् मासे गर्भे हस्तपादग्रीवाद्यवयवानामुत्पत्तिः सम्भवति । चतुर्थमासस्याधिपतिः सूर्यः भवति, तस्मिन् मासे गर्भस्थशिशोः अस्थीनि उत्पद्यन्ते । पञ्चममासाधिपतिः शनिः भवति, तस्मिन् मासे क्रमेण मज्जा-मांस-रक्त-चर्मादीनां प्रकटनं भवति । उक्तञ्च –

**“आद्यस्य मासस्य भृगुर्विधाता तस्मिन् भवेच्छोणितशुक्रसङ्गः ।**
**तद्रूपचेष्टाबलहानिदीप्त्या गर्भस्य वाच्यं स्वफलं जनन्याः ।**
**द्वितीयमासाधिपतिः कुजश्च तस्मिन् घनं तस्य भवेत् समन्तात् ।**
**जीवस्तृतीयस्य करांघ्रिवक्त्रग्रीवादिकं तत्र भवेत् समग्रम् ।**
**सूर्यश्चतुर्थस्य पतिः प्रदिष्टः अस्थीनि तत्र प्रभवन्ति पुंसाम् ॥**
**मज्जा च मेदश्च सुमांसरक्तं व्यक्तिं समायाति विभागतश्च ।**
**तस्मिन् सः सौरिः किल पञ्चमस्य तस्मिन् समन्तात् कृतिमाकृणोति ॥”** इति [1]

षष्ठमासस्याधिपतिः चन्द्रः भवति, तस्मिन् मासे गर्भस्य विशेषप्रकारेण वृद्धिः भवति, शरीरावयवानां च पुष्टिः भवति । तस्मिन् काले गर्भस्थस्य रोमाणि उत्पद्यन्ते, नख-जिह्वा-गुदाद्यवयवानां उत्पत्तिः तथा च अवयवेषु वायुप्रवाहः भवति यस्मात् हि गर्भे गुप्तस्वरः उत्पद्यते । सप्तममासस्य अधिपतिः बुधः भवति, अस्मिन् मासे स्मृतिः चेतनता स्मृतिसंस्कारश्च उत्पन्नो भवति । पञ्चज्ञानेन्द्रियाणां विषये, “कोऽहम्? कुतः आयातः? कुत्रास्मि? इत्यादिविषये च ज्ञानोत्पत्तिः भवति । अष्टममासस्याधिपतिः लग्नेशः (आधानलग्नेशः) भवति, तस्मिन् मासे गर्भस्थजन्तोः

[1] वृ.य.जा. ३.९-१२

महती बुभुक्षा जायते, मात्रा भुक्तं पीतं रसादिकं तस्य नाभिलग्ननाले संक्रमते । गर्भस्थजीवः तप्तः भवति इति । उक्तञ्च –

**प्राप्नोति पुष्टिं विविधां च गर्भव्यक्तिं समागच्छति कायजाताम् ।**
**षष्ठस्य चन्द्रो विभुतामुपैति रोमाणि तत्र प्रभवन्ति गात्रे ॥**
**नखाश्च जिह्वा गुदरन्ध्रभावे गुप्तं स्वरं ब्रह्मभवे हि तत्र ।**
**स्याच्चन्द्रसूनुः किलसप्तमस्य तस्मिन् स्मृतिः स्यात् सततं नराणाम् ॥**
**पञ्चेन्द्रियत्वं च विवेकिता च कोऽहं कुतोऽत्राश्रयमभ्युपेतः ।**
**लग्नाधिनाथस्त्वथवाष्टमस्य मासस्य तस्मिन् प्रचुरा बुभुक्षा ॥**
**भवेत् मनुष्यस्य ततः सुतृप्तिः भुंक्ते जनित्र्याः रसभावसङ्गात्॥ इति ।**[1]

गर्भस्थशिशोः नवममासस्याधिपतिः चन्द्रः भवति अस्मिन् मासे जीवस्य मनोभावानां प्रकटनं भवति । **"चन्द्रमा मनसो जातः"** इत्यादिश्रुतिप्रामाण्यात् **"मनस्तुहिनगुः"** इत्यादि शास्त्रवचनाच्च चन्द्रः मनःकारकः प्रसिद्धः एव । जीवः गर्भस्थदुःखानामनुभवं करोति । विरक्तो सन् उद्विग्नः भवति । अस्मिन् मासे पूर्वजन्मकृतशुभाशुभस्य स्मृतिरपि भवति, गर्भोत्पन्नसुखदुःखादीनां विवेकः उदितः भवति । दशमे मासे अधिपतिः सूर्यः भवति अस्मिन् मासे प्रसवः भवति । उक्तञ्च –

**नक्षत्रनाथो नवमस्य नाथस्तस्मिन् विरक्तिर्विविधा नराणाम् ।**
**गर्भाश्रयो दुःखमनन्तमेकं कृतं स्मृतिः पूर्वशुभाशुभस्य ॥**
**दिवाकरस्तत्परतोऽधिनाथस्तस्मिन् प्रदिष्टः प्रसवो नराणाम् ।** इति ।[2]

अत्र वराहमिहिरस्तु पञ्चममासस्याधिपतिं चन्द्रं मनुते षष्टमासस्य च शनिम् इति । तद्यथा बृहज्जातके – **सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः"** इति[1]

---

[1] वृ.य.जा. ३.१३-१६

[2] वृ.य.जा. ३.१६-१७

वैद्यनाथेन कल्याणवर्मणा चापि अस्यैव मतस्य समर्थनं विहितम् । अत्र हि एतेषामाचार्याणां गर्भमासाधिपतिविषये कश्चन व्यत्यासः प्रतीयते । मीनराजेन पञ्चममासस्य शनिः, षष्टमासस्य अधिपतिः चन्द्रः उक्तः। ग्राह्याग्राह्यमतविषये तु विदुषामनुभव एव प्रमाणम् । पुनश्च मीनराजेन  विस्तरेण स्पष्टरीत्या च गर्भमासानां फलं प्रतिपादितम् न तु अन्यैः तावदिति विशेषः ।

गर्भासनविषये उक्तं सुश्रुतसंहितायाम्-

**आभुग्रोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियौ ।**

**स योनि शिरसा याति स्वभावात प्रसवं इति ॥**

चरकसंहितायां च-

**गर्भस्तु खलु मातुः पृष्ठाभिमुख उर्ध्वशिराः । संकुच्यांगन्यास्तेऽन्तः कुक्षौ ॥**

ज्योतिषाचार्याणां मतं वास्तविकरूपेन पूर्णतया वैज्ञानिकमासीत् तदेव आयुर्वेदे अपि उपलभ्यते आधुनिकैः च अङ्गीक्रियते । अत्र गर्भस्य मासानुमासिकवृद्धिविषये विविधायुर्वेदाचार्याणां मतं प्रस्तूयते । इतोपि आधुनिकानां मतानुसारेण गर्भस्य भारः, दैर्घ्यं च प्रस्तूयते ।

**गर्भस्य मासानुमासिकवृद्धिः**

| क्र. | मीनराजमतम् | चरक | सुश्रुत | अष्टांगहृदय. | काश्यप | भारः, दैर्घ्यम् |
|---|---|---|---|---|---|---|
| 1 | रजवीर्ययोः संयोगः | खेट भूतो भवतेयव्य त्तविग्रहः सद्सद् भूतांगवयव | प्रथमे मासि कललं जायते | अव्यक्तः प्रथमे मासि सप्ताहात्कललो भवेत् | जीवात्मा के प्राण बीज धातु को विभक्त करता है। शरीर प्रविष्ट | 1.25-1.50 gm 4mm |

[1] बृ.जातकम्. ४-१६

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | के चारों ओर रक्त फैल जाता है। | |
| 2 | गर्भे कठोरता भवति। | घनः सम्पद्यते -3 घन-पुरूष पेशी –स्त्री अर्बुद-नंपुंसक | घनः संजायते -3 पिण्ड-पुरूष पेशी –स्त्री अर्बुद-नंपुंसक | हौदयापचार बताया है । घन-पुरूष पेशी –स्त्री अर्बुद-नंपुंसक | शुक्र से गर्भस्थ बालक के अस्थि मांस स्नायु बनते है | 4gm 4c.m |
| 3 | हस्तपादग्रीवाद्यवयवानामुत्पत्तिः | सर्वेन्द्रियाणि, सर्वांग अवयव युगपतनिर्मित दौहद, स्पंदन | हस्तपाद , शिरोत्पति से (पंचपिण्डक) सूक्षम अंगप्रत्यंग विभाग | सविथ, बाहु द्वे, मूर्धा से गात्रपंचकम,सर्वसूक्ष्मांग, सुख,दुःख | सर्वेन्द्रियां, सर्वांगावयव युगपत प्रकट, गर्भस्पदंन चेतना, वेदना, सुख,दुःख | 6cm |
| 4 | गर्भस्थशिशोः अस्थीनि उत्पद्यन्ते | गर्भ में स्थिरता गर्भिणी गुरूगात्रता | सर्वाङ्ग प्रत्यंग प्रत्यक्त गर्भ दौहद, चेतना | व्यक्तांगानाम् | गर्भ गर्भाशय में स्थिर तथा निरामय | 240 gm 22c. m |
| 5 | मज्जा-मांस-रक्त- | गर्भस्थ | मनः | चेतना प्रादुर्भाव | गर्भ के मांस | 480 |

| | | | | | | |
|---|---|---|---|---|---|---|
| | चर्मादीनां प्रकटनं भवति। | शिशु के मांस में विशेष वृद्धि | प्रतिबुद्ध तर भवति | | शोणित में वृद्धि, अतः गर्भिणि कृश पंचमे मासि जीवक। | gm 30c. m |
| 6 | विशेषप्रकारेण वृद्धिः,शरीरावयवा नां उत्पत्तिः।अवयवेषु वायुप्रवाहः , गुप्तस्वरः उत्पद्यते । | गर्भ के बल वर्ण में वृद्धि, अतः गर्भिणी के बल वर्ण में हानि | बुद्धि का प्रादुर्भाव | स्नायु सिरा रोम बल वर्ण नख, त्वचा की उत्पत्ति | गर्भ के बल, वर्ण, ओज में बृद्धि, मातुश्रमो अधिक | 1000 gm 35c. m |
| 7 | चेतनता स्मृतिसंस्कारश्च उत्पन्नो भवति। | गर्भ की पुष्टि गर्भिणि, सर्वाकारें क्लान्ततमा | सर्वांग प्रत्यंग विभाग प्रव्यक्तत र | सर्वे सर्वांग सम्पूर्णो | गर्भसर्वधा त्वांग सम्पूर्ण गर्भिणि नित्यक्ला न्ता वातपित्तक फान्वितः | 1.5k g 40c. m |
| 8 | गर्भस्थजन्तोः महती बुभुक्षा | ओज अस्थिर गर्भिणि मुहर्मुह युक्ता /म्लाना | ओज अस्थिर | माता- पुत्र के बीच में बार बार ओज संचार | ओज का परस्पर आदान-प्रदान (मुहुर्म्लाना, मुहुर्हष्टा) | 2.0 kg 45c. m |
| 9 | मनोभावानां प्रकटनम्। सुखदुःखादिनां | प्रसव काल 9-10 माह- | प्रसवका ल 9-12 | आठ माह से 1 दिन भी अधिक – प्रसवकाल | नवमादिषु मासेषु जन्म यथाक्रमम् | 2.5-3kg 50c. |

| | | | | | | |
|---|---|---|---|---|---|---|
| | विवेकः उदित भवति। | सामान्य 10 माह बाद - विकृति | माह | (1 वर्ष तक सामान्य) | गर्भावस्था 10 माह | m |

**गर्भे पुत्रपुत्रीज्ञानम् –**

मम सन्ततिः पुत्रो पुत्री वा इति जिज्ञासा सर्वेषामपि जनानां मनसि तिष्ठत्येव । अस्मिन् विषये मीनराजेन उक्तं यत् यदि आधानलग्नात् पञ्चम-षष्ठ-द्वितीय-तृतीयभावेषु सर्वे ग्रहाः भवन्ति तदा प्रसवः दशमासानन्तरं भवति गर्भे च पुत्रः भवति, यदि कन्या भवेत् तदा प्रसवः शीघ्रमेव भवतीति वाच्यम् । प्रसवकाले सूर्यस्य महत्त्वं भवति ।

**सूर्येण तासां प्रवदन्ति शेषं योग नृणां बाध्यमनेकरूपम् ।**[1]

एवञ्च आधानलग्ने पुरुषग्रहस्य राशिः नवांशो वा भवति तदा पुत्रः चेत् स्त्रीराशिः नवांशो वा आधानलग्ने स्यात् तदा गर्भे कन्या अस्तीति वाच्यम् ।[2] आधानकाले लग्नात् तृतीयसप्तमौ भावौ पापग्रहयुक्तौ एवञ्च द्वितीय-पञ्चम-नवमभावेषु सौम्याः ग्रहाः स्युः तथा च गुरु-बुध-चन्द्रैः ग्रहाः  दृष्टाः स्युः तदा पुत्रजन्म भवतीति वाच्यम् । उक्तञ्च -

**दुश्चिक्यजामित्रगताः प्रचण्डाः सौम्या यदा कोशत्रिकोणसंस्थाः ।**
**पुंजन्मदास्तत्र भवन्ति दृष्टाश्चन्द्रेण जीवेन शशाङ्कजेन ॥**[3]

आधानादिलग्नाद् तृतीयसप्तयोः भावयोः शुक्रसूर्यौ, एकादशभावे च शनिः स्यात्तदा गर्भे पुत्रः भवति । इत्थं त्रिकोणस्थाने (५-९भावयोः) बृहस्पतिः उच्चराशौ

---

[1] वृ.य.जा.३.२१

[2] वृ.य.जा. ३.२०-२२

[3] वृ.य.जा. ३-२४

ISSN: 2249-538X 

भवेत् तदा पुत्रः भवति । यदि आधानलग्ने विषमराशिवर्गेषु सूर्यभौमशनयः स्युः अथवा एते लग्ने एव स्युः तदा गर्भे पुत्रः भवति इति । उक्तञ्च–

**तृतीयजामित्रगतौ सितार्कौ शनैश्चरो लाभगतो यदा स्यात् ।**
**पुमांस्तदा गर्भगतः प्रवाच्यो जीवोऽथवा स्वोच्चगतस्त्रिकोणे ॥**
**पुंवर्गगे सूर्यसुते महीजे दिवाकरे लग्नमुपाश्रिते वा ।**
**गर्भे पुमान् शीतकरेऽथवाम्बरे स्वतुङ्गगे शुक्रदृशा समन्विते ॥** इति ।[1]

स्त्रीराशिगतलग्ने शुक्रचन्द्रौ स्थितौ स्याताम्, शनिगुरू च समराशौ स्याताम्, निजवर्गे स्थितं कुजं चन्द्रः पश्येत्तदा गर्भे कन्या वाच्या इति । यदि हि समराशिस्थं चन्द्रं देवगुरुं वा शुक्रः पश्येत्तदा गर्भे कन्या भवति अथवा शनिः सूर्यस्य नवांशे स्यात् तदा पुत्रः इति । उक्तञ्च –

**स्त्रीलग्नगे रात्रिकरे च शुक्रे समस्थिते सूर्यसुते सजीवे ।**
**स्त्रीगर्भमुक्तं धरणीसुतेन स्ववर्गसंस्थे शशिना च दृष्टे ॥**
**यदा हिमांशुः सुरपूजितोऽथवा शुक्रेण दृष्टः समराशिसंस्थितः ।**
**तदाबला गर्भगता नृणां च शनैश्चरै वा रविभागमाश्रिते ॥** इति ।[2]

विषयेऽस्मिन् वराहमिहिरस्य मतं भिन्नं दृश्यते । तद्यथा - विषमराशौ विषमनवांशे वा आधानलग्ने रविगुरुचन्द्राणां योगेन पुत्रः, यदि एतेषां स्थितिः समराशौ समनवांशे वा भवति तदा कन्याजन्म वाच्यम् इति । उक्तञ्च –

सारावल्यामपि विषमे विषमांशगताः इत्यादिश्लोकेन आचार्यवराहस्य मतं समर्थितमस्ति । किञ्च वैद्यनाथानुसारेण –

**अष्टमाष्टमे सूर्ये निषेकर्क्षात्सुतोद्भवः ।**
**अथवाऽऽधानलग्नात्तु त्रिकोणस्थे दिनेश्वरे ॥[3]**

---

[1] वृ.य.जा. ३.३२-३३

[2] वृ.य.जा. ३.३६-३७

[3] जा.पा. ३-१९

इत्यत्रापि अपरैः आचार्यैः सह व्यत्यासः दृश्यते । मीनराजेन बहुविस्तृतरीत्या पुत्रपुत्रीज्ञानविषये वृद्धयवनजातके प्रतिपादितम् । आयुर्वेदानुसारेण तु गर्भविनिश्चयलक्षणानि इत्थं सन्ति ।

**गर्भलिङ्गविनिश्चयलक्षणानि**

| (चरकमतानुसारेण)कन्या लक्षणानि | सुश्रुतमतानुसारेण पुत्रलक्षणानि |
|---|---|
| 1 वामाङ्गे चेष्टा।<br>2 पुरूषार्थिनी स्त्री। | 1 दक्षिणाङ्गे चेष्टा।<br>2 पुरूषवाचकपदार्थेषु स्नेहः। |

---

**परिशीलिताः ग्रन्था –**


1. वृद्धयवनजातकम्, मीनराजप्रणीतम्, व्याख्या. – सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन्स, नई दिल्ली।
2. बृहज्जातकम्, वराहमिहिरप्रणीतम्, रुद्रविवरणी टीका, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
3. सारावली, कल्याणवर्मविरचिता, व्याख्याकारः – गोपेशकुमार ओझा, मोतीलालबनारसीदास, नई दिल्ली।
4. प्रश्नभूषणम्, जीवनाथविरचितम्, व्याख्या. - आचार्यगुरुप्रसादगौड, चौखम्भासुरभारती प्रकाशन, वाराणसी ।
5. मानसागरी – मानदैवज्ञविरचिता, सं. - डा.रामचन्द्रपाठकः, चौखम्बासंस्कृतप्रकाशन, वाराणसी ।
6. फलदीपिका, मन्त्रेश्वरविरचिता, सं. – हरिशंकरपाठकः, चौखम्बासुरभारतीप्रकाशन, वाराणसी
7. जातकपारिजातः, दैवज्ञवैद्यनाथविरचितः, टीकाकारः - कपिलेश्वरशास्त्री, चौखम्बासुरभारती प्रकाशन, वाराणसी ।
8. सुश्रुतसंहिता, अनुवादः- अत्रिदेवः, मोतीलाल बनारसीदास, नई दिल्ली २०१५
9. चरकसंहिता, भाग-१ सम्पा. - आर्.के.शर्मा एवं भगवान दास, चौखम्बा संस्कृत सीरिज आफिस वाराणसी

| | |
|---|---|
| 3 स्त्रियः वामकुक्षौ वृद्धिः | 3 स्वप्ने पङ्कज-कुमुदादिनां दर्शनम्। |
| 4 वृत्तगर्भा न च। | 4 प्रसन्नमुखवर्णा। |
| 5 वामस्तने दुग्धप्रवृत्तिः। | 5 दक्षिणस्तने स्तन्यप्रवृतिः। |

आधानलग्नाधारेण प्रश्नलग्नाधारेण च एते सर्वे योगाः प्रतिपादिताः । विषयोऽयं बहुमहत्त्वपूर्णः पुनश्च सन्देहास्पदोऽपि भवति, समाधानार्थं तु एतदेव उच्यते दैवज्ञप्रवरैः – **“प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यीति”** इति शम् **।**

**********

# अधिमास-क्षयमासमीमांसा

**डा. रमानन्द भट्टः एन्**
वास्तु-डिप्लोमा विभागः

॥ श्रीगुरुभ्यो नमः ॥

अतसीपुष्पसङ्काशं पीतवाससमच्युतम् ।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥

अथ च कालविधायकमिदं ज्योतिःशास्त्रं शुभाशुभकर्मणां कालं विदधाति । कर्मणां तु कालः प्रधानम् । “अकाले कृतमकृतमेव”, “कालं नियम्य कार्याणि ह्याचरेन्नान्यथा क्वचित्”, “शुभे तु काले शुभकृत्फलं शुभम्” इत्याभिः परःसहस्रवचनैः कर्मणां कालप्राधान्यं व्यक्तीभवति । अतः कालस्य प्राधान्यं मन्वानाः मुनयः कालावबोधायैव शास्त्रे पृथगेकमङ्गं पर्यकल्पयन् मुहूर्त इति । तस्मिन्नेव अङ्गे कालस्य शुद्ध्यशुद्धी निर्णीयेते ।

कालस्य शुद्धिम् अशुद्धिं च निर्णेतुकामाः मुहूर्तकाराः कर्मसु प्रथममेव सामान्यतो निषिद्धकालान्, अशुद्धकालांश्च प्रोचुः । तत्र प्रसिद्धे मुहूर्तचिन्तामणौन् तावद् रामदैवज्ञः आह “न्यूनाधिमासकुलिकप्रहरार्धपाताः वर्ज्याः[1]” इति । तत्रैव अग्रे वाप्यारामतडागकूपभवनारम्भप्रतिष्ठादिकं कर्म त्यजेत् “न्यूनाधिमासे[2]” इति । एवं शुभकर्मसु निषिद्धयोः न्यूनाधिमासयोः सम्भवादिविषये किञ्चिदत्र निरूप्यते ।

तन्निरूपणात्पूर्वमेव मासलक्षणं किञ्चिज्ज्ञेयम् । “पक्षौ पूर्वापरौ

---

[1]मुहूर्तचिन्तामणिः १.३४ ।

[2]मुहूर्तचिन्तामणिः १.४६,४७ ।

शुक्लकृष्णौ मासस्तु तावुभौ[1]" इत्यमरोक्त्या शुक्लकृष्णपक्षद्वयात्मकः कालविशेषः मासः पौषमाघादिद्वादशसंज्ञकः । मस्यते परिमीयते असावनेन[2] इति मस्यन्ते परिमीयन्ते तिथयो येन[3] इति वा चान्द्रमासपक्षे व्युत्पत्तिः[4] । किन्तु नवधा प्रोक्तेषु मानेषु चतुर्भिः सौरचान्द्रार्क्षसावनैः व्यवहारः क्रियते इत्यतः तेषु चतुर्षु अपि तत्तन्मानेन मासाः सम्भवन्तीत्यतः व्यवहारः कथमिति पृष्टे "मासास्तथा च तिथयः तुहिनांशुमानाद्[5]" इत्याह भास्करः । अतः मासगणना चान्द्रेण क्रियते इति सिद्धम् ।

तर्हि चान्द्रमासलक्षणं किमिति जिज्ञासायामाह भास्करः "कालेन येनैति पुनः शशीनं क्रामन् भचक्रं विवरेण भानोः, मासः स चान्द्रः[6]" इति । रविचन्द्रयोः दर्शान्ते युतिः भवति । द्वयोरपि पूर्वा गतिः । तत्र शीघ्रगतिकः चन्द्रः स्वगत्यन्तरेण रवेः अग्रतो याति । एवं गच्छन् यदा चक्रकला २१६०० तुल्यमन्तरं याति तदा पुनः रविणा सङ्गमेति । एतयोः कालयोः अन्तराले चान्द्रो मासः । तत्प्रमाणं सावनमानेन "अङ्कयमाः कुरामाः पूर्णेषवस्तत्कुदिनप्रमाणम्[7]" । अर्थात् २९ दिनानि ३१ घटिकाः ५० विघटिकाः ।

पुनः रविमासे सावनदिनसङ्ख्या ज्ञेया । तदर्थं वर्षमध्ये सावनदिनसङ्ख्या उच्यते – "पञ्चाङ्गरामास्तिथयः खरामाः सार्धद्विदस्राः कुदिनाद्यमब्दे" इति । एकस्मिन् सौरवर्षे ३६५ सावनदिनानि १५ घटिकाः ३० विघटिकाः २२।३० विपलानि

[1]अमरकोषः १.४.१४० ।

[2]शब्दकल्पद्रुमे ।

[3]क्षयाधिमासतत्त्वम् – पृष्ठसं ५ ।

[4]अन्येषां मासानां तु मस्यते परिमीयते अनेनासौ इति व्युत्पत्तिः (शब्दकल्पद्रुमे) ।

[5]सिद्धान्तशिरोमणिः – ग्रहगणिते मध्यमाधिकारे कालमानाध्यायः – ३१ ।

[6]सिद्धान्तशिरोमणिः – गोले - मध्यगतिवासना – ९ ।

[7]सिद्धान्तशिरोमणिः – गोले - मध्यगतिवासना – ९ ।

भवन्ति । अस्य द्वादशभागाः एव सावनमानेन एकस्मिन् रविमासे दिनानि भवन्ति । तत्प्रमाणन्तु दिनादिकम् ३०।२६।१७।३१।५२।३० ।

अथ तावदधिमासलक्षणमाह[1] भास्करः "असङ्क्रान्तिमासोऽधिमासः स्फुटः स्यात्[2]" इति । यस्मिन् चान्द्रे मासे अर्कसङ्क्रान्तिर्नास्ति सः अधिमासः । अर्थादत्र प्रथमामान्तात्पूर्वम् एका सङ्क्रान्तिः, द्वितीयामान्तात् अनन्तरम् अन्या सङ्क्रान्तिः । मध्यवर्तिनि चान्द्रे मासे सङ्क्रान्तिरेव न भवति । अस्यैव अधिकमासः, असङ्क्रान्तमासः, मलमासः[3], मलिम्लुचः[4], विनामकः, नपुंसकः चेत्यपि नामान्तराणि । अतः रविसङ्क्रान्त्यभावविशिष्टचान्द्रमासत्वं मलमासत्वम्[5] इति स्फुटीभवति ।

एवमधिमासे ज्ञाते तत्सम्भवे कारणं निरूपयामः । सावनमानेन रविचन्द्रमासयोः प्रमाणमुक्तम् । तत्र चान्द्रमासप्रमाणं न्यूनम्, सौरस्य प्रमाणमधिकम्। अथ उच्यते "सौरान्मासादैन्दवः स्याल्लघीयान्[6]" । अत एव तेषां चान्द्राणां सङ्ख्या अपि अधिका । अत एव उक्तम् "रविमासोनितास्ते तु शेषाः स्युरधिमासकाः[7]" इति । रविचान्द्रमासयोरन्तरेण कल्पे अधिमासाः आनीयन्ते । किन्तु इदानीमत्र कियद्भिः सौरैः एकोऽधिमासो जायते इत्यत्र युक्तिरुच्यते । सौरमासकुदिनेभ्यः चान्द्रमासकुदिनानि शोध्यानि । तयोरन्तरम् दिनादिकम्

---

[1]अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मासः (वाचस्पत्ये) । मासात् रविसङ्क्रान्तिमासादधिकः (शब्दकल्पद्रुमे) ।

[2]सिद्धान्तशिरोमणिः – ग्रहगणिते मध्यमाधिकारे अधिमासादिनिर्णयः – ६ ।

[3]मलो मलिनश्चासौ मासश्च (शब्दकल्पद्रुमे) । मलो दुष्टो मासः (वाचस्पत्ये) ।

[4]मली वैदिककर्मानर्हत्वेन दुष्टः सन् म्लोचति गच्छतीति (वाचस्पत्ये) ।

[5]मलमासशब्दे शब्दकल्पद्रुमे ।

[6]सिद्धान्तशिरोमणिः – गोले - मध्यगतिवासना – ११ ।

[7]सूर्यसिद्धान्तः १.३५ ।

००।५४।२७।३१।५२।३० । एकस्मिन् सौरमासे रविचन्द्रान्तरं कुदिनात्मकम् इदं भवति । अधुना कल्प्यते । युगादौ प्रथमदर्शान्ते प्रथमचान्द्रमाससमाप्तिः । ततः सावयवाभिः चतुःपञ्चाशद्घटिकाभिः रवेः वृषभसङ्क्रमणम् । तदा प्रथमः सौरमासः सम्पन्नः । ततोऽग्रिमदर्शान्ते द्वितीयचान्द्रमासान्तः । ततः परं सावयवचतुःपञ्चाशद्घटिकाभिः द्विगुणिताभिः रवेः मिथुनसङ्क्रान्तिः । एवमग्रेऽपि त्रिगुणिताभिः चतुर्गुणिताभिः अग्रिमसङ्क्रान्तयः दर्शान्तादूर्ध्वं भवन्ति । एवं सङ्क्रान्तिः अग्रतो गत्वा पुनः दर्शान्तं याति । तदा रविमासाः चान्द्रेभ्यः एकोना भवन्ति । यदा दर्शान्तमतिक्रम्य अग्रतो याति सङ्क्रान्तिः तदा अधिमासस्य सम्भवः। तत्र अनुपातः । यदि अनेन सौरचान्द्रान्तरेण सावनेन सावयवचतुःपञ्चाशद्घटिकारूपेण एकः सौरो मासः तर्हि चान्द्रमासान्तःपातिभिः सावयवैः सावनैः एकोनत्रिंशद्दिनैः कियन्तः इति कृते लब्धिः सौरमासाः ३२।१५।३१।२८।४७ । एतावद्भिः सौरमासैः एकोऽधिमासः लभ्यते इति सिद्धम् ।

एवं साधितः अधिमासः मध्यमः । स्पष्टस्तु प्रतिक्षणं विलक्षणगतीनां ग्रहाणां (अधिमाससाधने केवलं रविचन्द्रयोः) स्फुटगत्या राशिभोगस्य स्फुटकालेन भवति ।

अथ क्षयमासः । यस्मिन् चान्द्रमासे रविसङ्क्रमणद्वयं स्यात् असौ मासः क्षयाख्यः स्यात् । तदाह भास्करः “द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्[1]” । अर्थात् अमान्तद्वयाभ्यन्तरे रविसङ्क्रान्तिद्वयं सम्भवति यस्मिन् चान्द्रे मासे सः मासः क्षयाख्यः । सङ्क्रान्त्युपलक्षिताः मासाः । एकस्मिन् चान्द्रमासे यदि सङ्क्रान्तिद्वयं जातं स मासः क्षयाख्यः कदाचित्कालान्तरे भवति । स च कार्तिकादित्रये (कार्तिक-मार्गशीर्ष-पौषेषु) एव भवति, नान्यत्र । यदा क्षयमासः सम्भवति तस्मात् क्षयमासात्

[1]सिद्धान्तशिरोमणिः – ग्रहगणिते मध्यमाधिकारे अधिमासादिनिर्णयः – ६ ।

मासत्रयाभ्यन्तरे पूर्वम् एकः अधिमासः, क्षयमासात् परमपि मासत्रयान्तरितः एकः अधिमासः भवति । पूर्वोक्तरीत्या चान्द्रमासप्रमाणम् सावयव-एकोनत्रिंशत्सावनदिनानि २९।३१।५० । तथा रविमासः सावनेन मानेन सावयवत्रिंशद्दिनानि ३०।२६।१७ । एवं मध्यगत्या रविः राशिं भुङ्क्ते । किन्तु यदा रवेः गतिः एकषष्टिः ६१ कलाः तदा रविः सार्धैकोनत्रिंशता दिनैः राशिं गच्छति । अतः चान्द्रमासादल्पः रविमासः स्यात् । एवं परमाल्पता दिनादिफलरूपेण २९।२०।४० । एतच्च वृश्चिकादित्रये एव । अत्र रवेः गतिः एकषष्टिः ६१ भवति । यदा एवमर्कमासः रविमासादल्पः चान्द्रमासान्तःपाती भवति तदा एकस्मिन् मासे रविसङ्क्रमणद्वयं जायते । अतः स मासः क्षयाख्यः भवति । अत उक्तं क्षयः कार्तिकादित्रये इति । एवं क्षयमासे जाते "तदा वर्षमध्येऽधिमासद्वयं च" सम्भवति । तत्र उदाहरति भास्करः – भाद्रपदः असङ्क्रान्तः, ततः गतेराधिक्यात् मार्गशीर्षो द्विसङ्क्रमः, ततः पुनः गत्यल्पत्वात् रवेः चैत्रोऽपि असङ्क्रान्तिः भवति । वर्तमाने तु **1963-64**तमे इसवीयवर्षे क्षयमासः समभूत्[1] ।

क्षयमासः कदाचित् कालान्तरे भवति, "क्षयाख्यः कदाचित्[2]" इत्युक्तम् । तर्हि स कालः इत्युक्ते प्राह भास्करः "कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च[3]" इति । क्षयमासः १४१ वर्षैः अथवा १९ वर्षैः एकवारम् आगच्छति । तत्र गतागतक्षयमासान् शकवर्षैः प्रदर्शयति । प्रथमं ९७४ तमे शके ततः १११५ तमे, तस्मात् १२५६ तमे शके

[1]एतदुदाहरणन्तु अग्रे पञ्चाङ्गचित्रेणैव प्रदर्शितम् ।

[2]सिद्धान्तशिरोमणिः – ग्रहगणिते मध्यमाधिकारे अधिमासादिनिर्णयः – ६ ।

[3]सिद्धान्तशिरोमणिः – ग्रहगणिते मध्यमाधिकारे अधिमासादिनिर्णयः – ७ ।

गतोऽब्ध्यद्रिनन्दै ९७४ र्मिते शाककाले तिथीशै १११५ र्भविष्यत्यथाङ्गाक्षसूर्यैः १२५६ ।

गजाद्र्यग्निभूभिः १३७८ स्तथा प्रायशोऽयं कुवेदेन्दु ................ ॥

भास्करजन्मशकः – रसगुणपूर्णमही १०३६ समशकनृपसमयेऽभवन्ममोत्पत्तिः ।

रसगुण ३६ वर्षेण मया सिद्धान्तशिरोमणी रचितः ॥ - गोले प्रश्नाध्याये ५८ ।

च क्षयः मासः जातः । अत्र अन्तरन्तु १४१ वर्षाणि ।

क्षये मासे जाते पूर्वं पश्चाच्च अधिमासद्वयं जायते । तत्र प्रथमोऽधिमासः गणितागत एव इति सिद्धान्तसार्वभौमे मुनीश्वर आह । तथा च वचनम् –

**क्षयमासात्पूर्वकालेऽग्रे च मासत्रयावधि ।**
**अधिमासद्वयं तत्र स्यादाद्यो गणितागतः[1] ॥**

अयं च केवलाधिमासः । अस्य ज्ञापकमपि वर्तते । "दर्शान्ततः सङ्क्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्" इति भास्करोक्तिः ज्ञापिका । अमान्तसङ्क्रान्त्योर्मध्ये अधिमासशेषः सदैव तिष्ठति । यदा क्षयमासः जातः तदा प्रथमम् अमान्तः, ततः सङ्क्रान्तिः, ततः परं पुनः सङ्क्रान्तिः, अन्ते पुनः अमान्तः । सत्येवं प्रथम-अमान्तसङ्क्रान्त्योर्मध्ये अत्यल्पः अधिशेषः । सः क्षयमासात्पूर्वमेव आसन्नमासत्रयान्तरे अधिमासः अभूदिति दर्शयति, येन मासोर्वरितः स्वल्पोऽधिशेषो दृश्यते । तथैव प्रथमामान्ताद् द्वितीयसङ्क्रान्तिं यावात् मासासन्नः अधिशेषः सूचयति यत् आगामिनि मासत्रयान्तरे एव अधिकमासः पुनरपि पतिष्यति येनायं मासासन्नोऽस्ति । अत एव तस्मिन् वर्षे अधिमासद्वयं सम्भवति ।

क्षयः कार्तिकादित्रये इत्युक्तम् । किन्तु अधिमासः कुत्र पततीत्यत्र मतानि भिद्यन्ते । तत्रादौ "सर्वेषु मासेष्वधिमासकः स्यात्[2]" इति वाक्यम् अज्ञातमूलम् आर्षं श्रूयते । सर्वस्मिन् अपि चान्द्रे मासे अधिमासः पततीत्यर्थः । बृहद्दैवज्ञरञ्जने निहितं पितामहवचनं तु एवमस्ति –

**अष्टाधिमासाः स्युर्नित्यं प्रोच्यन्ते फाल्गुनादयः ।**
**सौम्यपौषौ क्षयो नित्यं भवेतामिति निश्चितम् ॥**

---

[1]क्षयाधिमासतत्त्वम् – पृष्ठसं २५ ।

[2]सिद्धान्तशिरोमणिः – पृष्ठसं ६ ।

**क्षयो वाप्यधिमासो वा स्यादूर्जे इति निश्चितम् ।**
**न क्षयो नाधिमासः स्यान्माघे वै परिकीर्तितः[1] ॥ इति ।**

फाल्गुनादीषपर्यन्तम् अष्टौ मासाः अधिकाः भवन्ति । मार्गशीर्षपौषौ क्षयौ केवलम् । कार्तिकः अधिकः क्षयश्च भवति । माघे तु अधिमासोऽपि नास्ति क्षयोऽपि न । केचन कार्तिकादित्रये अधिमासो नास्तीति वदन्ति । पूर्वोक्ते कार्तिकस्य अधिमासत्वं नाङ्गीकुर्वन्ति । इत्येवमत्र मतानि भिद्यन्ते । पुनश्च "क्षयः कार्तिकादित्रये नान्यतः" इतीदं भास्करवचनं खण्ड्यते कमलाकरेण ।

**स्फुटैर्लक्षणैर्यैरयं तानि सर्वेष्वपि स्युर्मधोश्चान्द्रमासेषु काले ।**
**अतोऽयं क्षयः सर्वचान्द्रेष्वपीत्थं न जानन्ति सद्वासनाज्ञानशून्याः ॥**
**इदानीन्तनार्थं न शास्त्रं प्रवृत्तं न सत् कार्तिकादित्रयोत्थं तदुक्तम् ।**
**सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे भवेत्कार्यवर्यस्य या दृग्विरुद्धा[2] ॥**

स्फुटैर्लक्षणैः क्षयमासः चैत्रादिमासेषु सर्वेष्वपि काले भवति । यः कार्तिकादित्रये एव इत्याह स सद्वासनाशून्यः । यतः चान्द्रमासान्तःपातिकुदिनसङ्ख्यातो रविमासान्तःपातिकुदिनसङ्ख्या अल्पा भवेद्यदा तदा क्षयमाससम्भवः । किन्तु मध्यममानेन सर्वदा सौरामासान्तःपातिकुदिनसङ्ख्याया एव आधिक्यात् न क्षयमाससम्भवः । तथापि स्पष्टमानेन एतत् सम्पद्यते । यदा रवेः स्पष्टा गतिरधिका भवेत् तदा त्रिंशदंशात्मकराशिभोगः अल्पेन कालेन स्यात् । अर्थात् तत्र रविमासान्तर्गतसावनदिनसङ्ख्या अल्पा स्यात् । ईदृशी स्थितिः नीचस्थाने स्थितस्य

[1]बृहद्दैवज्ञरञ्जनम् – १९.३,४ ।

[2]सिद्धान्ततत्त्वविवेकः – मध्यमाधिकारेऽधिमासादिः ५३,५४ ।

रवेः एव भवति । शिरोमणिरचनाकाले रविमन्दोच्चं[1] मिथुने आसीत्, तत्स्फुटः २।१८। तस्मात् षड्राश्यन्तरे नीचबिन्दुः भवति ८।१८ । अत एवोक्तं भास्करेण “क्षयः कार्तिकादित्रये” इति । वृश्चिकादित्रये स्वनीचभागे स्पष्टगत्या वेगेन सञ्चरन् रविः तान् अल्पेन कालेन गच्छति । तदा ये चान्द्रमासाः कार्तिकमार्गशीर्षपौषाः ते क्षयत्वं गच्छन्ति । अतः भास्करेण यदुक्तं कार्तिकादित्रये इति तत्तु तात्कालिकाभिप्रायेण । रविमन्दोच्चस्य सर्वराशिसञ्चारात् कालान्तरेण सर्वमासेषु अपि क्षयमाससम्भवः । अत एव उक्तं कमलाकरेण "इदानीन्तनार्थं न शास्त्रं प्रवृत्तम्" इति । भास्करभक्तो मुनीश्वरोऽपि सिद्धान्तसार्वभौमे तात्कालिकाभिप्रायेण भास्करात् किञ्चिदग्रे गत्वा “कार्तिकादिचतुष्के[2]” इति कथयति । किन्तु एवमुक्ते दैवज्ञरञ्जनस्थपितामहवाक्यस्य “न क्षयो नाधिमासः स्यान्माघे वै परिकीर्तितः” इत्यस्य निरासः सम्भवति । कार्तिक-मार्गशीर्ष-पौष-माघानां चतुर्णां क्षयमाससम्भवः मुनीश्वरेणोक्तः ।

एवं भट्टकमलाकरेण आक्षिप्तोऽपि भास्करसिद्धान्तः अस्माभिः ग्राह्य एव तिष्ठति । यतः प्राग्गत्या सूर्यमन्दोच्चस्य भगणाः कल्पे “खाष्टाब्धयः[3]” ४८० । अस्य वार्षिकी गतिः ०.०००२४ कलाः । द्वापारान्ततः इदानीं यावत् गतकलिवर्षेषु पञ्चसहस्राधिकेषु अस्य गतिः केवलं दशकलासन्ना इत्यतः भास्करोक्तिः बहुकालं यावद् ध्रुवं तिष्ठतीत्यतः अस्माभिः आदरणीयमेवास्ति । अत्र अन्तरदर्शनार्थं

---


[1]यत्स्यात् प्रदेशः प्रतिमण्डलस्य दूरे भुवस्तस्य कृतोच्चसंज्ञा । सोऽपि प्रदेशश्चलतीति तस्मात् प्रकल्पिता तुङ्गगतिर्गतिज्ञैः । उच्चाद्भषट्कान्तरितं च नीचम् .... ॥
उच्चस्थितो व्योमचरः सुदूरे नीचस्थितः स्यान्निकटे धरित्र्याः ॥ सिद्धान्तशिरोमणिः – गोलः – छेद्यकाधिकारः - २०-२३ ।


[2]सिद्धान्ततत्त्वविवेकः – मध्यमाधिकारेऽधिमासादिः ५३,५४ श्लोकवासनायाम् ।

[3]सिद्धान्तशिरोमणिः – मध्यमाधिकारे भगणाध्यायः - ५ । सूर्यसिद्धान्ते तु १.४१ - “प्राग्गतेः सूर्यमन्दस्य कल्पे सप्ताष्टवह्नयः ३८७”।

सौरोक्तक्रमेण इदानीं रविमन्दोच्चस्थितिः राश्यादिः ०२.१७.१७.४१ । कृतान्ते ००।०७।२८।१२ । इत्युक्ते कृतान्ते मेषे उच्चमासीद् रवेः । अधुना तु मिथुने ।


वर्तमानस्य कालस्य आसन्नतया सम्भूतस्य क्षयमासस्य तदा अधिमासद्वयसम्भवस्य च पञ्चाङ्गचित्रेण सह उदाहरणम्[1] -



ಅಚಿಂತ್ಯಾವ್ಯಕ್ತರೂಪಾಯ ನಿರ್ಗುಣಾಯ ಗುಣಾತ್ಮನೇ।
ಸಮಸ್ತ ಜಗದಾಧಾರಮೂರ್ತಯೇ ಬ್ರಹ್ಮಣೇ ನಮಃ॥
॥ ಶ್ರೀ ಗುರುಭ್ಯೋ ನಮಃ ॥
ಶ್ರೀ ಸರಸ್ವತ್ಯೈ ನಮಃ
ಸ್ವಸ್ತಿ! ಶ್ರೀಮದ್ವಿಜಯಾಭ್ಯುದಯನೃಪ ಶಾಲಿವಾಹನಶಕವರ್ಷ ೧೮೮೬ ಪ್ರವರ್ತಮಾನಸ್ಯ
ಶೋಭಕೃತ್ಸಂವತ್ಸರಸ್ಯ ಪಂಚಾಂಗಂ
ಈ ಪಂಚಾಂಗವು ದಕ್ಷಿಣ ಕನ್ನಡ ಜಿಲ್ಲಾ ಕುಂದಾಪುರ ತಾಲೂಕು ಕೆರಗಾಲು ಗ್ರಾಮದಲ್ಲಿರುವ ಬ್ರಹ್ಮಶ್ರೀ ಸಿದ್ಧಾಂತಿ ವೇ। ಮೊಗೇರಿ ಪದ್ಮನಾಭ ಅಡಿಗಳಿಂದ ಸೂರ್ಯಸಿದ್ಧಾಂತರೀತ್ಯಾ ಗುಣಿಸಿ, ಪರಿಶೋಧಿಸಲ್ಪಟ್ಟು, ಪ್ರಕಟಿಸಲ್ಪಟ್ಟಿತು.
ಪವರ್ ಪ್ರೆಸ್, ಮಣಿಪಾಲ
1963 - 1964



ಕ್ಷಯಮಾಸನಿರ್ಣಯಃ


---

[1]मोगेरी-पञ्चाङ्गम् – स्थलम् – कुन्दापुरम्, उडुपी।




ಶಾ. ಶ. ೧೮೮೬
ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ
ಅಧಿಕಾಶ್ವಯುಜಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ
ದಕ್ಷಿಣಾಯನಂ
ಶರದೃತುಃ
ರಾಶ್ಯಾದಿಗ್ರಹಸ್ಫುಟಾನಿ.
ಪೂರ್ಣಿಮಾ
ಸೂ.ಉ.ಘಂ.6_24, ಅಸ್ತಘಂ.6_17.


ಶಾ. ಶ. ೧೮೮೬
ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ
ಅಧಿಕಾಶ್ವಯುಜಮಾಸ ಕೃಷ್ಣಪಕ್ಷಃ
ದಕ್ಷಿಣಾಯನಂ
ಶರದೃತುಃ
ರಾಶ್ಯಾದಿಗ್ರಹಸ್ಫುಟಾನಿ.
ಅಮಾ.
ಸೂ.ಉ.ಘಂ.6_25, ಅಸ್ತಘಂ.6_8.



ಶಾ. ಶ. ೧೮೮೬ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ನಿಜಾಶ್ವಯುಜಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ ದಕ್ಷಿಣಾಯನಂ ಶರದೃತುಃ

ನವರಾತ್ರಾರಂಭಃ [ಕನ್ಯಾಧಾನ್ಯಸಂ.] ಶಾರದಾಪೂಜಾ ಯದುದಂ ರಾವೇ. ಮಹಾನವಮೀ ಗಜಾಶ್ವಪೂಜಾ ಶಾರದಾ† ವಿಜಯದಶಮೀ‡ ಸರ್ವೈಕಾ ಪಕ್ಷಪ್ರ ಮಾನ್ವ. ಆಕಾಶದೀಪಃ ಪ್ರೀಹ್ಮಾಗ್ರಯಣಂ

[*ರಾ.ಘಂ ಕನ್ಯಾಧಾನ್ಯಸಂ.] [†ವಿಸರ್ಜ ದಗ್ಧಯೋ ಕಕ್ರಾಂ.] [‡ಶಮೀಪೂ ದ್ವಿದಲವ್ರ ದಿ.ಘಂ ತುಲಾಧಾನ್ಯಸಂ.] [ಭೂಪೂಜಾ ಪೂರ್ಣಿಮಾ.]

ಪೂರ್ಣಿಮಾ

ಸ್ಕಾಂತಚಾರಃ— ಸೂ.ಉ.ಘಂ.6—29, ಅಸ್ತಘಂ.6—1.



ಶಾ. ಶ. ೧೮೮೬ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ನಿಜಾಶ್ವಯುಜಮಾಸ ಕೃಷ್ಣಪಕ್ಷಃ ದಕ್ಷಿಣಾಯನಂ ಶರದೃತುಃ

1963ನೇ ಇಸವಿ ನವಂಬರ್ ತಾ. 30.

ಸಂಚ. ಗಂಗಾಪೂಜಾ ದಗ್ಧಯೋ ನಾಶಯೋ. ಸರ್ವೈಕಾ ವೈಶ್ಯಾ ದಗ್ಧಯೋ. ಗೋವತ್ಸದ್ವಾ. ಪಕ್ಷಪ್ರ. ಚಂದ್ರೋದಯೋಽಭ್ಯಂಗಃ ನರಕಚತುರ್ದಶೀದೀಪಾವಲೀಃಧನಲಕ್ಷ್ಮೀಪೂ. ಬಲೀಂದ್ರಪೂ. ಗೋಪೂಜಾ ರಕ್ರಾಂ ಕೇವೇ ಅಮಾ.

ಅಮಾ.


ಮಾಸಾಂತಚಾರಃ— ಸೂ.ಉ.ಘಂ.6—34, ಅಸ್ತಘಂ.6—56.


ಶಾ. ಶ. ೧೮೮೬ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ಕಾರ್ತಿಕಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ ದಕ್ಷಿಣಾಯನಂ ಶರದೃತುಃ


ಸಂಶ್ರಾ ನವವಸ್ತ್ರಧಾ ದ್ಯೂತಂ ವ್ಯಯೋ ಚಂದ್ರದ. ಯದುದ್ವಿತೀಯಾ. ವಿನಾಯಕೀ ಶೇಕ್ರಾಂ. ವಿಷಯೋ. ಮೂಲಚಾಪೇಶುಕ್ರ ಪೂಷಾಕೇಂಗು. ಚೋಧನ್ವೈಕಾ ಕ್ಷೀರಾಬ್ಧಿ ನಾಶಯೋ. ಪ.ಬುಧೋದಯಃ ಪಕ್ಷಪ್ರ ಉತ್ಥಾನದ್ವಾ* ವೈಕುಂಠಚತುರ್ದಶಿ ಪೂರ್ಣಿಮಾ.

ಪೂರ್ಣಿಮಾ

ಸ್ಕಾಂತಚಾರಃ— ಸೂ.ಉ.ಘಂ.6—41, ಅಸ್ತಘಂ.6—57.



ಶಾ. ಶ. ೧೮೮೬ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ಕಾರ್ತಿಕಮಾಸ ಕೃಷ್ಣಪಕ್ಷಃ ದಕ್ಷಿಣಾಯನಂ ಶರದೃತುಃ

ಮಾಸಾಂತಚಾರಃ— ಪೂಷಾಗಕು, ಪೂಷಾ೨ಬು, ಉಭಾಳರುಗು, ಉಷಾಗಶು೪೦, ಧಗರು೩, ಆರ್ಳರಾ, ಪೂಷಾ೨ಕೇ, ಅಹರ್ಗಣಃ೧೮೪೯೯೧೪, ಸೂ.ಉ.ಘಂ.6_50, ಅಸ್ತಘಂ.6_11.



ಶಾ. ಶ. ೧೮೮೬ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ಕ್ಷಯಾಖ್ಯಪೌಷಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ ದಕ್ಷಿಣಾಯನಂ ಹೇಮಂತರ್ತುಃ

[*ದಗ್ಧಯೋ ಶುಕ್ರಾಂ ಕೇಕ್ರಾಂ ರಾವೇ.] [ಕೇವೇ ಚಂದ್ರಗ್ರಹಣಂ ಪೂರ್ಣಿಮಾ.]

...ಂತಚಾರಃ— ಪೂಷಾಳಕು, ಪೂಷಾಳವಬು, ರೇಗರುಗು, ಶ್ರ೨ಶು, ಧ೨ರುಶ, ಆರ್ಳರಾ, ಪೂಷಾ೨ಕೇ, ಅಹರ್ಗಣಃ೧೮೪೯೯೨೯, ಸೂ.ಉ.ಘಂ.6_57, ಅಸ್ತಘಂ.6_8.



ಶಾ. ಶ. ೧೮೮೬ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ಕ್ಷಯಾಖ್ಯಪೌಷಮಾಸ ಕೃಷ್ಣಪಕ್ಷಃ ದಕ್ಷಿಣಾಯನಂ ಹೇಮಂತರ್ತುಃ

ಮಾಸಾಂತಚಾರಃ— ಉಷಾಳಕು, ಮೂಳವಬು, ರೇಗರುಗು, ಧಳಶು೨೦, ಧ೨ರುಶ, ಆರ್ಳರಾ, ಪೂಷಾ೨ಕೇ, ಅಹರ್ಗಣಃ೧೮೪೯೯೪೪, ಸೂ.ಉ.ಘಂ.7_2, ಅಸ್ತಘಂ.6_1...


ಶಾ. ಶ. ೧೮೮೫ ಶೋಭಕೃತ್ಸಂವತ್ಸರಃ ಮಾಘಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ ಉತ್ತರಾಯಣಂ ಶಿಶಿರರ್ತುಃ

ರಾಶ್ಯಾದಿಗ್ರಹಸ್ಫುಟಾನಿ.

ಪೂರ್ಣಿಮಾ


ಅಚಿಂತ್ಯಾವ್ಯಕ್ತರೂಪಾಯ ನಿರ್ಗುಣಾಯ ಗುಣಾತ್ಮನೇ । ಸಮಸ್ತ ಜಗದಾಧಾರಮೂರ್ತಯೇ ಬ್ರಹ್ಮಣೇ ನಮಃ ॥

ಶ್ರೀ ಸರಸ್ವತ್ಯೈ ನಮಃ

॥ ಶ್ರೀ ಗುರುಭ್ಯೋ ನಮಃ ॥


ಸ್ವಸ್ತಿ! ಶ್ರೀಮದ್ವಿಜಯಾಭ್ಯುದಯನೃಪ ಶಾಲಿವಾಹನಶಕವರ್ಷ ೧೮೮೬ ಪ್ರವರ್ತಮಾನಸ್ಯ

## ಕ್ರೋಧಿನಾಮ ಸಂವತ್ಸರಸ್ಯ ಪಂಚಾಂಗಂ

ಈ ಪಂಚಾಂಗವು ದಕ್ಷಿಣ ಕನ್ನಡ ಜಿಲ್ಲಾ ಕುಂದಾಪುರ ತಾಲೂಕು ಕೆರಗಾಲು ಗ್ರಾಮದಲ್ಲಿರುವ ಬ್ರಹ್ಮಶ್ರೀ ಸಿದ್ಧಾಂತಿ ವೇ। ಮೊಗೇರಿ ಪದ್ಮನಾಭ ಅಡಿಗಳಿಂದ ಸೂರ್ಯಸಿಂದ್ಧಾಂತರೀತ್ಯಾ ಗುಣಿಸಿ, ಪರಿಶೋಧಿಸಲ್ಪಟ್ಟು ಪ್ರಕಟಿಸಲ್ಪಟ್ಟಿತು.

...ಪವರ್ ಪ್ರೆಸ್, ಮಣಿಪಾಲ.

1964 - 1965



ಶಾ. ಶ. ೧೮೮೬ ಕ್ರೋಧಿನಾಮ ಸಂವತ್ಸರಃ ಅಧಿಕಚೈತ್ರಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ ಉತ್ತರಾಯಣಂ ವಸಂತರ್ತುಃ

ಸೂ.ಉ.ಘಂ.6-43 ಅಸ್ತ ಘಂ.6-38


ರಾಶ್ಯಾದಿಗ್ರಹಸ್ಫುಟಾನಿ.

ಪೂರ್ಣಿಮಾ


ಸೂ.ಉ.ಘಂ.6—33, ಅಸ್ತಘಂ.6—39.


ಶಾ. ಶ. ೧೮೮೬ ಕ್ರೋಧಿನಾಮ ಸಂವತ್ಸರಃ ಅಧಿಕಚೈತ್ರಮಾಸ ಕೃಷ್ಣಪಕ್ಷಃ ಉತ್ತರಾಯಣಂ ವಸಂತರ್ತುಃ

ಸೂ.ಉ.ಘಂ.6–24, ಅಸ್ತ.ಘಂ. 6–41.


ಶಾ. ಶ. ೧೮೮೬ ಕ್ರೋಧಿನಾಮ ಸಂವತ್ಸರಃ ನಿಜಚೈತ್ರಮಾಸ ಶುಕ್ಲಪಕ್ಷಃ ಉತ್ತರಾಯಣಂ ವಸಂತರ್ತುಃ

ಸೂ.ಉ.ಘಂ.6–16, ಅಸ್ತಘಂ.6–43.


ಶಾ.ಶ.೧೮೮೬ ಕ್ರೋಧಿನಾಮಸಂವತ್ಸರಃ ನಿಜಚೈತ್ರಮಾಸ ಕೃಷ್ಣಪಕ್ಷಃ ಉತ್ತರಾಯಣಂ ವಸಂತರ್ತುಃ

ಸೂ.ಉ.ಘಂ.6–9, ಅಸ್ತಘಂ.6–46.

## अधिमास

क्षयमाससम्बन्धिविषयाणांनिरूपणावसरेतत्सम्बद्धविषयाणामेकत्रसङ्ग्रहबुद्ध्याकेचनअंशाःशिरोमण्यादितःस्वीकृताःअत्रकेवलंश्लोकेष्वेवप्रदर्शिष्यन्ते।

**अर्केज्ञातेअवमशेषात्चन्द्रसाधनम्**

कोट्याहतैरङ्ककृतेन्दुविश्वै- १३१४९००००००००न्यूनाहशेषेविहृतेलवाद्यम्।
रविघ्नतिथ्याढ्यमनेनयुक्तोरविर्विधुःस्याद्विधुरुनितोऽर्कः[1]॥

**अधिमासावमशेषाभ्यांरविचन्द्रानयनम्**

कोट्याहृतैर्यद्ववभै -२७११००००००००रवाप्तंर्न्यूनाहशेषेविहृतेकलाद्यम्।
तत्स्याद्धनारव्यम्तरणेर्विधोस्तत्त्रिभूहतंस्वेषुगुणांशुयुक्स्वम्॥
चैत्रादियातास्तिथयःपृथक्स्थाविश्वैर्हताःसूर्यविधूलवाद्यौ।
तौचाधिशेषाच्छशिमासलब्ध्याहीनौयुतौस्वस्वधनाह्वयाभ्याम्[2]॥

**अधिमासस्यचान्द्रत्वमवमस्यसावनत्वमभिधायअहर्गणात्कल्पगतमानेतुंविलोमविधिनायान्यवमान्यानीतानियेचाधिमासास्तेषांविशेष उच्यते -**

सौरेभ्यःसाधितास्तेचेदधिमासास्तदैन्दवाः।
चेच्चान्द्रेभ्यस्तदासौरास्तच्छेषंतद्वशात्तथा॥
सावनान्यावमानिस्युश्चान्द्रेभ्यःसाधितानिचेत्।
सावनेभ्यस्तुचान्द्राणितच्छेषंतद्वशात्तथा[3]॥

**अहर्गणसाधनेविजातीयानांयोगे, अधिशेष-अवमशेषयोःत्यागेचकारणंसप्रश्नंनिरूपणम् -**

अहर्गणस्यानयनेऽर्कमासाश्चैत्रादिचान्द्रैर्गणकान्विताःकिम्।
कुतोऽधिमासावमशेषकेचत्यक्तेयतःसावयवोऽनुपातः॥
दर्शावधिश्चान्द्रसमोहिमासःसौरस्तुसंक्रान्त्यवधिर्यतोऽतः।

---

[1]सिद्धान्तशिरोमणिः – मध्यमाधिकारेग्रहानयनाध्यायः - ५।

[2]सिद्धान्तशिरोमणिः – मध्यमाधिकारेग्रहानयनाध्यायः – ६,७।

[3]सिद्धान्तशिरोमणिः –गोलेमध्यगतिवासना – १३, १४।

दर्शाग्रतःसंक्रमकालतःप्राक्सदैवतिष्ठत्यधिमासशेषम्॥
दर्शान्ततोयाततिथिप्रमाणैःसौरैस्तुसौरादिवसाःसमेताः।
यतोऽधिशेषोत्थदिनाधिकास्तेत्यक्तंतदस्मादधिमासशेषम्।
तिथ्यन्तसूर्योदययोस्तुमध्येसदैवतिष्ठित्यवमावशेषम्।
त्यक्तेनतेनोदयकालिकःस्यात्तिथ्यन्तकालेद्युगणोऽन्यथातः[1]॥

**अहर्गणानयनेअधिमाससम्भवासम्भवज्ञानम्**

स्पष्टोऽधिमासःपतितोऽप्यलब्धोयदायदावापतितोऽपिलब्धः।
सैकैर्निरेकैःक्रमशोधिमासैःतदादिनौघःसुधियाप्रसाध्यः॥
कृत्वायुतोनंक्रमशोऽधिशेषंदिनीकृतैःकल्पभवाधिमासैः।
सैकान्निरेकान्मधुयातमासांस्ततःप्रसाध्यौखलुपुष्पवन्तौ॥
शुध्यागमेत्वपतितोऽपिसलभ्यतेचेच्छुद्धयातदाखदहनैर्युतयादिनौघः।
एतद्विदन्तिसुधियःस्वयमेवकिन्तुबालावबोधविषयेमयकानिरुक्तम्[2]॥

**क्षयदिनसाधनम्**

स्वषष्ट्यंशयुक्तानिवर्षाणिवर्षैःखरामाहतैःसंयुतान्यभ्रभूपैः।
विभक्तानितान्यत्रलब्धंविशुद्धंसमाभ्योगताभ्योभवन्तिक्षयाहाः॥

**प्रकारान्तरम्**

दिनाद्यंत्रिनिघ्नंसमाभ्राभ्रवेदांशकोनंसमात्रिंशदंशेनयुग्वा।

**प्रकारान्तरम्**

स्वषष्ट्यंशहीनाब्दखाङ्गेन्दुभागःस्वपञ्चांशहीनाब्दयुग्वाक्षयाहाः[3]॥

---

[1]सिद्धान्तशिरोमणिः – गोलेमध्यगतिवासना – १५ – १७।

[2]सिद्धान्तशिरोमणिः – मध्यमाधिकारेअधिमासादिनिर्णयः३-५।

[3]सिद्धान्तशिरोमणिः – मध्यमाधिकारेप्रत्यब्दशुद्धिः – ३,४।

**गताधिमासानयनम्**

दिनादिक्षयाहादिदिघ्नाब्दयोगःखरामैर्हृतःस्युःप्रयाताधिमासाः।
भवेच्छुद्धिसंज्ञंयदत्रावशिष्टंतदूनंसदूनाहनाड्यादिकेन॥

**प्रकारान्तरम्**

द्विधाब्धाद्विरामैःखरामैश्चभक्ताःफलैक्यंशिवघ्नाब्दयुक्तंविभक्तम्।
खरामैस्तुतेवाधिमासाश्चशेषंभवेच्छुद्धिरूनाहनाडीविहीनम्[1]॥

**अवमैर्विनापिअवमशेषघटिकानयनम्**

यत्त्वधिमासकशेषकनाडीपूर्वमिदंरहितंविहितंसत्।
आद्यदिनाद्यघटीभिरथैवंस्युःक्षयशेषभवाघटिकावा[2]॥
एवंयथाशास्त्रंसिद्धान्तदृशा अधिमासक्षयमासयोः विषयः प्रत्यपादि ।

एतत्काले क्रियमाणानां धर्मकर्मणांविषये तु धर्मशास्त्रमेव शरणीकर्तव्यम् इति शम् ।

**॥ नमोऽस्तुपूर्वप्रणेतृभ्यः ॥**

**********

[1]सिद्धान्तशिरोमणिः – मध्यमाधिकारेप्रत्यब्दशुद्धिः – ५,६।

[2]सिद्धान्तशिरोमणिः – मध्यमाधिकारेप्रत्यब्दशुद्धिः – ८।

# जातके मेलापकविचारः

**डा. सुधांशुकुमारनन्दः**
वास्तुज्यौतिषडीप्लोमाविभागः

संसाररूपकं रथचक्रम् अग्रे चालयितुं विवाहस्यावश्यकता अस्ति एव। पुनश्च धर्मार्थकाममोक्षाणां प्राप्तिः विवाहादेव सम्भवति। यतो हि भार्या त्रिवर्गफलप्राप्तेः कारणमिति शास्त्रे उक्तं विद्यते। तथा चोक्तम् –

भार्या त्रिवर्गकरणं शुभशीलयुक्ता
शीलं शुभं भवति लग्नवशेन तस्याः।
तस्माद्विवाहसमयः परिचिन्त्यते हि
तन्निघ्नतामुपगताः सुतशीलधर्माः॥

विवाहस्य सर्वविधसौख्यं तदा मानवस्य प्राप्तिर्भवति यदा तस्य विवाहः समीचिने काले क्रियते। तस्य कालस्य चयनं तु ज्यौतिषशास्त्रे विधीयते। पुनश्च मेलापकव्यवस्थाद्वारा वरकन्ययोः चयनप्रक्रिया अस्मिन्नेवशास्त्रे विदितमस्ति।

**यस्मिन् देशे यः आचारः सदाचारः सो उच्यते** इति मनुवचनानुसारं भारतस्य विभिन्नेषु प्रदेशेषु विचारप्रक्रियायां काचिद्भिन्नता (अष्टकूट-दशकूटभेदेन) दृश्यते । मुहूर्त्तचिन्तामणौ तु अष्टकूटाधारेण मेलापकविचारः उक्तमस्ति

वर्णो वश्य तथा तारा योनिश्च ग्रहमैत्रकम् ।
गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ॥

अर्थात् वर्णकूटः, वैश्यकूटः, ताराकूटः, योनिकूटः, ग्रहमैत्रिकूटः, गणकूटः, भकूटः, एवञ्च नाडीकूटः । एते विवाहे अष्टकूटाः भवन्ति । परन्तु उत्तकलीयविचारधारायां साधारणतः दशविचाराः भवन्ति । ते यथा

तारं चन्द्रं बलं वर्णं मण्डलं भवनाधीपम् ।
नाडी जाति स्वरवर्गः विवाहे दशमेलकम् ॥

अस्मिन् प्रसङ्गे उत्कलीयपञ्चाङ्गोक्तप्रकारेण विचारः प्रस्तूयते। तत्र एते विचाराः प्रतिपादिताः सन्ति । ते यथा

1.नाडीविचारः 2.गणविचारः 3.वर्णविचारः
4. राजयोटकविचारः 5. योनिविचारः 6. ताराविचारः
7. वल(वैश्य)विचारः 8. भवनाधिपतिविचारः 9. षड्नाडीविचारः
10. मण्डलविचारः।

एतेषां विवरणमत्रक्रमेण क्रियते -

**1. नाडीविचारः –**

वरकन्ययोः नाडी समाना भवति चेत् विवाहः निषेधः। तदर्थं नाडी भिन्ना भवेत् । कृत्तिकादितः गणना प्रक्रिया उत्कलीय पञ्चाङ्गेषु दृश्यते। अन्यत्र तु अश्विन्यादितः। क्वचिदुभयथा अपि पश्यन्ति। तत्र आदिनाडी (पृष्ठनाडी), मध्यनाडी, अन्त्यनाडी (क्रोडनाडी) इति भेदेन नाडी त्रयं विद्यते। तत्र एवं विचार्यते यत् -

आद्येकनाडीकुरुतेवियोगं, मध्याख्यनाड्यामुभयोर्विनाशः।
अन्त्या च वैधव्यमतीव दुःखं, तस्माच्च तिस्रः परिवर्ज्जनीयाः॥

कृत्तिकादि क्रमेण नाडीचक्रम् -

| | |
|---|---|
| आदिनाडी | 3, 8, 9, 14, 15, 20, 21, 26, 27 |
| मध्यनाडी | 4, 7, 10, 13, 16, 19, 22, 25, 1 |
| अन्त्यनाडी | 5, 6, 11, 12, 17, 18, 23, 24, 2, |

अश्विन्यादि क्रमेण नाडीचक्रम् -

| | |
|---|---|
| आदिनाडी | 1 6 7 12 13 18 19 24 25 |

| | |
|---|---|
| मध्यनाडी | 2 5 8 11 14 17 20 23 26 |
| अन्त्यनाडी | 3 4 9 10 15 16 21 22 27 |

**2. गणविचारः –**

देवगणः,नरगणः, राक्षसगणः एवं प्रकारेण नक्षत्राणां विभागत्रयं वर्तते।

देवगणः –अश्विनी मृगपुष्यार्क्ष हस्तास्वाती पुनर्वसुः।

मैत्र श्रवणरेवत्यो नवदेवगणाः स्मृताः॥

नरगणः –

त्रीण्युत्तराणि रोहिण्या त्रिपूर्वा भरणीस्तथा।

आरद्राया सह संयुक्ता नवैते मानवागणाः॥

राक्षसगणः –

कृतिका च विशाखा च मघाज्येष्ठा च मूलकम्।

चित्राशतभिषाश्लेषा धनिष्ठा राक्षसगणाः॥

| | |
|---|---|
| देवगणः | 1, 5, 7, 8, 13, 15, 17, 22, 27 |
| नरगणः | 2, 4, 6, 11, 12, 20, 21, 25, 26 |
| राक्षसगणः | 3, 9, 10, 14, 16, 18, 19, 23, 24 |

वरकन्ययोः समगणश्चेद् प्रीतिप्रदः, एकस्य नरः अपरस्य राक्षसः चेत् मृत्युः, देवराक्षसयोर्मध्ये विवादः। तथा चोक्तम् –

स्वजाति चोत्तमा प्रीतिमुत्तमं देवमानवौ।

कलहः देवदैत्ये च मृत्युः मानवराक्षसेः॥

**3.वर्णविचारः –**

कर्कट-वृश्चिक-मीनराशयः – विप्रसंज्ञकाः।

मेष-सिंह-धनुराशयः– क्षत्रियवर्णसंज्ञकाः।

कन्या –मकर- वृषराशयः - वैश्यसंज्ञकाः।

तुला – मिथुन –कुम्भराशयः – शूद्रवर्णसंज्ञकाः।

वरकन्ययोः समवर्णचेद् विवाहः शुभदायकः। अथवा वरस्य उच्चवर्णः भवेत्। उच्यते –

वर्णश्रेष्ठा वरोयत्र वर्णहीन तु कन्यका।

तस्य विवाहे सा कन्या पुरुषकुलमण्डिनी॥

**4.राजयोटकः –**

एकराशौ च दम्पत्योः शुभं स्यात्समसप्तके।

चतुर्थदशमे चैव तृतीयैकादशे तथा ॥

वरकन्ययोः एकराशिः, चतुर्थ-दशमः, परस्परसमसप्तमः, तृतीय-एकादशः एतेषु चतुर्षुस्थलेषु राजयोटकः इति उच्यते। अस्य फलम् –

न राजयोगे ग्रहवैरता च, न तार शूद्धि न गणत्रयंस्यात्।

न नाडीदोषा न च वर्ण दृष्टिर्गर्गादयस्ते मुनये वदन्ति॥

विचारे अस्मिन् परस्परं षडष्टकविचारः, नवम-पञ्चमविचारः, द्वितीय-द्वादशविचारो अपि दृश्यते।

षडष्टकविचारः –

वरस्य चाष्टमे कन्या कन्या षष्ठे च पुंसयोः।

मित्र षडष्टकं तस्य विवाहे शुभदं भवेत्॥

नवम-पञ्चमविचारः –

कन्यायां नवमे भर्त्तुः तस्य पञ्चमे कन्यका।

नवमं पञ्चमं तस्य विवाहे शुभदं स्मृतम्॥

द्वितीय-द्वादशविचारः –

कन्यायां द्वितीये पुंसः पुंसाद्द्वादशे कन्यका।
द्विद्वादशमिवंविस शुभाशुभफलं भवेत्॥

**5.योनिमेलकविचारः –**

अश्विनी, शतभिषा – अश्वयोनिः। भरणी,रेवति –गजयोनिः। कृत्तिका, पुष्या –छागयोनिः। रोहिणी, मृगशिरा – सर्पयोनिः। आर्द्रा, मूला – श्वानयोनिः। पुनर्वसु, अश्लेषा – विडालयोनिः। मघा, पूर्वाफाल्गुनी – मूषिकयोनिः। उत्तराफाल्गुनी, उत्तराभाद्र –गोयोनिः। हस्ता, स्वाती- महिषयोनिः, चित्रा,विशाखा - व्याघ्रयोनिः, अनुराधा, ज्येष्ठा – मृगयोनिः। उत्तराषाढा, अभिजित् नकुलयोनिः, पूर्वाषाढा, श्रवणा –वानरयोनिः, पूर्वभाद्र, धनिष्ठा –सिंहयोनिः। योनिवैरत्वं त्याज्यम्।

**6. ताराविचार –**

नवतारकाः भवन्ति। तेषु कन्या नक्षत्रात् वरनक्षत्रं यदि तृतीये, पञ्चमे सप्तमे वा भवति चेत्, तत्र विवाहस्याशुभत्वं स्वीक्रियते। अन्यथा शुभमेव।

**7. वल(वैश्य)विचारः -**

हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजास्तुभक्षाः।
सर्वेअपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोन्यत्॥

**8. भवनाधिपतिविचारः –**

वरकन्ययोः राश्याधिपयोर्मध्ये यदि मैत्रिभावश्चेत् तदा शुभफलं, शत्रुभावश्चेद् अशुभफलं, समभावश्चेत् समफलमिति ज्ञातव्यम्।

**9. षड्नाडीविचारः –**

कन्या नक्षत्रात् वरनक्षत्रम् गणनावसरे 1 भवति चेत् जन्मनाडी, तेन कलहः। 10 चेत् कर्मनाडी, तेन कर्महानिः।16 चेत् संघातिकनाडी, तेन पतिहानिः। 18चेत् समुदायः, तेन बन्धुविग्रहः। 23 चेत् वैनाशिकनाडी, तेन वैधव्यम्। 25 चेत् मानसनाडी, तेन दरिद्रदा। अत्र सांघातिकं-वैनाशिकञ्च विहायान्यत्र विवाहः कर्तुं शक्यते।

**10. मण्डलविचारः –**

कन्यानक्षत्रे एकं संयोज्य पञ्चवारं द्विगुणं कृत्वा, वर नक्षत्रात् एकं विशोध्य पञ्चवारं द्विगुणं कृत्वा उभयत्र 27 भिः विभजनीयम्। भागशेषद्वयं संयोज्य पञ्चभिः विभज्यते चेत् 1 अथवा 0 तिष्ठति चेत् वायुमण्डलम्, 2 चेद् वारुणीमण्डलम्, 3 चेद् अग्निमण्डलम्, 4 चेत् माहेन्द्रमण्डलम्।अस्य फलम् –

आग्नये विधवा नारी वायवे पुत्रिणी भवेत्।
वारुण्ये धनपौत्राढ्या माहेन्द्र सर्वसौख्यदा॥

एवमेव प्रकारेण जातकेपञ्चागानुरोधेन मेलापकविचारः विधीयते।

**सहायकग्रन्थाः –**

1. विशुद्धसामन्तपञ्जिका – उत्कलीयपञ्चाङ्गम्।
2. वृहत् ज्यौतिषसारसंग्रहः – प्रथमः भागः(ओडिआ)
3. मुहूर्तचिन्तामणिः।

**********

# शिक्षणसूत्राणि - प्राचीनार्वाचीनविचारश्च

**डा. राधागोविन्दत्रिपाठी**
**सहाचार्यः, शिक्षाविभागः**
**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः**

शिक्षणक्षेत्रे अनुसन्धानं दिनं दिनं प्रवर्द्धमानं वर्तते । शिक्षणं सरलीकर्तुं विविधविधीनामाविष्कारः कृतः वर्तते । प्राचीनकाले ये विधयः आश्रियन्ते स्म तान् विधीः अन्तरा केचन नूतनविधयः शिक्षणक्षेत्रे समागतास्सन्ति। तैः नूतनविधिभिः सर्वथा सर्वदा च शिक्षणं सफलं भविष्यतीति नास्ति स्थिरसिद्धान्तः । शिक्षणविधेः निर्णयः शैक्षिकपरिवेशं छात्रस्य बुद्धिलब्धिञ्चाश्रित्य करणीयः । अर्थात् छात्रस्य बुद्धिलब्धिः एव शिक्षणविधेः निर्णीयिका भवति ।

तथैव विविधविषयाणामध्यापने कानिचन शिक्षणसूत्राणि आरचितानि सन्ति । यानि शिक्षणसूत्राणि सुतरां मनोवैज्ञानिकानि एव । साम्प्रतं कालानुगुणमिमानि सूत्राणि अध्यापने सहकुर्वन्ति इत्यत्रायं नाभिप्रायः यत् सर्वथा सर्वदा च सूत्राणि इमानि सहकरिष्यन्ति । शिक्षाविद्भिः कठिनविषयान् सरलतया बोधयितुमधोलिखितानि शिक्षणसूत्राणि मनोविज्ञानसिद्धान्तानामाधारेण आरचितानि वर्तन्ते । यथा-

१) ज्ञातादज्ञातं प्रति (From Known to Unknown)

२) सरलात् कठिनं प्रति (From Simple to Complex)

३) स्थूलात् सूक्ष्मं प्रति (From Concrete to Abstract )

४) पूर्णादंशं प्रति (From Whole to Part)

५) सामान्यात् विशेषं प्रति (From General to Particular) चेति ।

उपरोक्तसूत्राणामाधारेण इदं प्रतिपादयितुं शक्यते यत् छात्रस्य

सरलावगमनाय पूर्वज्ञानस्य पूर्वानुभवस्य चाधारेण नूतनविषयः अध्यापनीयः । सरलविषयमारम्भे प्रस्तूय तदनु क्रमशः जटिलविषयान् बोधयेत् । किञ्च स्थूलविषयानां परिचयं प्रदाय ततः सूक्ष्मविषयं प्रति प्रस्थातव्यम् । इमानि यानि मनोवैज्ञानिकानि शिक्षणसूत्राणि वर्तन्ते तानि साम्प्रतं एव प्रयोक्तव्यानि इति न स्थिरः सिद्धान्तः । प्राचीनकाले शिक्षणपरिवेशः यथा आसीत् तथा साम्प्रतं नास्ति । तदा यथा छात्राः बुद्धिमन्तः जिज्ञासवश्च आसन् तथा साम्प्रतं न सन्ति । तदानीन्तनशिक्षणवातावरणं साम्प्रतिकशिक्षणे विरलमेव । अधिगन्तुमधिगमक्षमतां विश्लिष्य शिक्षणसूत्रस्य निर्णयः करणीयः । यथा महाभारतकाले अर्जुनस्य अधिगमक्षमतां जिज्ञासां च विज्ञाय गीताचार्येण श्रीकृष्णेन 'कठिनात् सरलं प्रति", 'अज्ञानात् ज्ञातं प्रति", 'सूक्ष्मात् स्थूलं प्रति", 'विशेषात् सामान्यं प्रति" चेत्यादिसूत्राणि प्रयोज्य बोधितः ।

महाभारते यदा अर्जुनस्य मनसि स्थितप्रज्ञस्य संज्ञाविषये जिज्ञासा समुत्पन्ना, तदा श्रीकृष्णेन अर्जुनस्य अधिगमदक्षतां जिज्ञासाञ्च विज्ञाय तस्य अवगमनाय आरचितानि शिक्षणसूत्राणि भवन्ति 'कठिनात् सरलं प्रति", 'अज्ञानात् ज्ञातं प्रति", 'सूक्ष्मात् स्थूलं प्रति", 'विशेषात् सामान्यं प्रति" चेत्यादिनि । अर्जुनः स्थितप्रज्ञस्य संज्ञाविषये पृच्छति -

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।**
**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ (२, ५४)**

इत्यत्र स्थितप्रज्ञस्य भाषण-व्रजनादि कर्मास्ति न वा, अस्ति चेत् तत् कीदृशम् ? समाधिरत्र मनः, तस्य वशीकरणमनसः स्थितिः कीदृशी ? समाधौ स्थितप्रज्ञस्य किं लक्षणमिति च पृष्टे भगवता श्रीकृष्णेन क्रमबद्धरूपेण समाधीयते । अर्थात् काचन श्रेणी आश्रणीया भवति, यस्यां श्रेण्यां सोपानचतुष्टयमतिक्रमणीयम्।

स्थितप्रज्ञश्रेण्यां प्रथमसोपानं भवति पूर्णविरागः अर्थात् आत्मना आत्मानं पश्यति । अर्थात् आत्मना आत्मनि तुष्टः जायते । उच्यते भगवता श्रीकृष्णेन -

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।

आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ (२, ५५) इति ।

अत्र भोगवासनामयसंसारात् पूर्णविरागः यदा भवति तदा स स्वस्मिन् आत्मनि एव प्रत्यगात्मस्वरूपं प्राप्य परमार्थदर्शनामृतरसलाभेन बाह्यक्रियाभ्यः दूरीकृतो भूत्वा स्वकीयां प्रज्ञां परमात्मनि स्थापयति। तदानीं मनसा आत्मनः सम्पूर्णनियन्त्रणं कृत्वा मनोगतान् कामान् परित्यजति, केवलं शरीरधारणनिमित्तं भवति, परमात्मन्येव सदैव प्रज्ञा भवति, परमात्मनः भिन्नमन्यत्किमपि नानुभूयते च सैव भवति वशीकरणसंज्ञा । अर्थात् सर्वं बाह्यं लौकिकञ्च वशीकरणे आनीय आत्मन्येव आत्मना तुष्टः भूत्वा ज्ञाननिष्ठया मोक्षप्राप्त्यर्थम् आत्मावलोकनं साधयति। अनन्तरं स आश्चर्यवद्वदति अर्थात् तस्य भाषणं स्वस्यानुसन्धानरूपम् आत्मरतित्वञ्च भवति, तदानीं सः स्थितप्रज्ञः उच्यते ।

स्थितप्रज्ञश्रेण्यां द्वितीयसोपाने भगवता श्रीकृष्णेन स्पष्टीक्रियते -

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।**

**वीतरागभयक्रोधः स्थितधीः मुनिरुच्यते ॥ (२, ५६) इति ।**

दैवात् स्वकर्मभिर्वा उपस्थितेषु दुःखेष्वपि यस्य मनः अनुद्विग्नं भवति, प्राप्तेषु सुखेषु यस्य स्पृहा विगता, वीतरागभयक्रोधाः यस्मात् निर्गताश्च सन्ति स स्थितप्रज्ञः उच्यते । अर्थात् इन्द्रियसंहरणत्वात् सुखदुःखयोः आत्मनि परमात्मनः प्रतिबिम्बदर्शनं कर्तुं प्रभवति इत्यतः इयम् एकेन्द्रियसंज्ञा । किञ्चाचेतनेषु वातातपकण्टकादिषु बाधकेष्वपि क्रोधाभावः यस्मिन् सः मुनिः स्थितप्रज्ञः कथ्यते । योगसाधनया संसारे स्थित्वाऽपि अस्तित्वं नानुभूयते । कैश्चित् इमानि लक्षणानि अपवर्गसाधनत्वेन स्वीक्रियन्ते, वस्तुतः ज्ञानसाधनत्वेन इमानि स्वीकृतानि न तु अपवर्गसाधनत्वेन, कुतश्चेत् अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते इति ।

किञ्च स्थितप्रज्ञश्रेण्यां तृतीयसोपानस्य स्वरूपं भगवान् श्रीकृष्णः स्पष्टयति

**यः सर्वत्र अनभिस्नेहः तत्तत् प्राप्य शुभाशुभम् ।**

**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ (२, ५७) इत्युक्ते** शुभाशुभयोः अनभिस्नेहः, प्रियेषु स्नेहभावरहितः उदासीनः वा भवति, दैवागतप्रियसंश्लेषविश्लेषयोश्च अभिनन्दनद्वेषरहितः इति व्यतिरेकसंज्ञा उच्यते । देहजीवनादिषु अपि अनभिस्नेहः, अभिस्नेहवर्जितः तत्तत्प्राप्य न तुष्यति न हृष्यति, अशुभं प्राप्य न द्वेष्टि इत्यर्थः। दुःखमागच्छति चेदपि दुःखं नानुभवतीत्यत्र तस्य हर्षविषादवर्जितस्य विवेकयुक्ता बुद्धिः प्रतिष्ठिता इत्यर्थः ।

स्थितप्रज्ञश्रेण्याम् अन्तिमसोपानम् अर्थेभ्यः इन्द्रियसंहरणमर्थात् अभीष्टेषु अनभीष्टता इति कथयति। अत्र इप्सितवस्तुषु अनीप्सिततां प्रदर्शयति । कथमित्युक्ते भगवता उक्तम् -

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।**
**इन्द्रियाणि इन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥ (२, ५८) इति ।**

बाह्येन्द्रियाणि विषयेभ्यः प्रतिसंहृत्य मन आत्मनि व्यवस्थापयितुं प्रयतेत, यथा कूर्मो भयात् स्वानि अङ्गानि उपसंहरति सर्वशः सर्वतः । यदि वा इन्द्रियाणि इन्द्रिययुक्तविषयान् स्पष्टुमुद्युक्तानि भवन्ति तथापि विषयभोगजनितमायासंसारे पतनभयात् विषयेभ्यः प्रतिसंहृत्य मनः आत्मनि स्थिरीकरणाय क्रियमाणः प्रयत्नः एव यतमानसंज्ञा कथ्यते । अत्र येन क्रमेण सोपानेन वा श्रीकृष्णेन बोधितः अर्जुनः स च क्रमः सोपानं वा कठिनात् सरलं प्रति इति शिक्षणसूत्रमाश्रित्य तिष्ठति । सूत्रमिदमपि मनोवैज्ञानिकसिद्धान्तमाश्रित्य वर्तते , यतः अर्जुनः कश्चन विशिष्टच्छात्रः आसीत् । तस्य अधिगमक्षमतां जिज्ञासां च विचार्य तदानीं गीताचार्येण उपरोक्तशिक्षणसूत्रस्याधारेण स्थितप्रज्ञसिद्धान्तस्य शिक्षणं कृतमासीत् । परन्तु साम्प्रतं शिक्षणे उपरोक्तशिक्षणसूत्रमाश्रित्य शिक्षणं क्रियते चेत् अधिगन्तुः अवगमनं सरलतया न भवति जिज्ञासाऽभावात्।

**उपसंहारः -**

शिक्षणसूत्राणि सर्वथा मनोवैज्ञानिकानि एव तत्र नास्ति संशयः ।

आधुनिकशिक्षणस्य परिवेशं छात्रबुद्धिस्तरञ्च मनसि निधाय साम्प्रतं यानि शिक्षणसूत्राणि निरूपितानि सन्ति , तानि न सार्वकालिकानि । प्राचीनकाले मनोविज्ञानमपि आसीत् । तदानीमपि मनसः अध्ययनं क्रियते स्म । यतः मनः तथा एकं विशिष्टं मनोवैज्ञानिकतत्त्वं, यस्य मनसः उपरि प्राचीनशास्त्रेषु बहुधा चर्चा विहिता अस्ति । मनसः वास्तविकस्थितिमविज्ञाय शिक्षणं भवितुं नार्हति । आधुनिके काले यथा छात्रस्य मानसिकस्थितिं विज्ञाय अध्यापकः विषयं बोधयति, तथैव प्राचीनकालेऽपि गुरुभिः छात्राणां मानसिकस्थितिं विज्ञाय शिक्षणं क्रियते स्म । छात्राणां धारणक्षमतामाश्रित्य पृथक् पृथक् शिक्षणसूत्रमुपयुज्यते स्म । अतः अनेन ज्ञायते यत् शिक्षणसूत्रं सर्वथा छात्रस्य अधिगमक्षमतामाश्रित्य निश्चियते इति । न शिक्षणसूत्रं सार्वकालिकत्वमाप्नोति ।

**सहायकग्रन्थसूची**

१. Abhinava Desika, श्रीमद्भगवद्गीता (श्रीरामानुजभाष्यसहिता)

२.B. N. Panda, Advanced Educational Psychology- Discovery Pub. House, N.D.

३. S.K. Mangal, General Psychology- Sterling Publishers Pvt. Ltd.

४. Vasudeva Lakshmana Sastri, श्रीमद्भगवद्गीता

५. V.S.Venkata Raghavacharya, Educational Psychology (In Sanskrit) R.S.Vidyapeetha, Tirupati.

६. कम्भपाटि साम्बशिवमूर्त्तिः, संस्कृतशिक्षणम्, दीपशिखाप्रकाशनम्, जयपुरम्, २००६

७. च ल ना शर्मा, फतेहसिंहः, संस्कृतशिक्षणम् - नवीनप्रविधयश्च, आदित्यप्रकाशनम्, जयपुरम्, २००८.

**********

# लक्षिताधिगमविशेषः

**डा. चन्द्रकान्तः**
**शिक्षाविभागाध्यक्षः**

"**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते**" इत्युक्तदिशा किमपि प्रयोजनं मनसि निधायैव सर्वेऽपि मानवाः ज्ञानार्जने प्रवृत्तिमन्तः जायन्ते । ज्ञानार्जनप्रक्रियैव शिक्षेति प्रोच्यते । कमप्येकं ज्ञानांशं स्वायत्तीकर्तुं प्रवृत्तस्य बालस्य मानसं कस्मिंश्चित् क्रमे ज्ञानांशं प्रतिगृह्णाति। तादृशं क्रमं विज्ञाय मानसिकविकासवेत्ता शिक्षकः विषयं वा ज्ञानांशं परिशील्य व्यवस्थित रूपेण प्रकल्प्य ज्ञानपिपासोः छात्रस्य पुरतः समुपस्थापयेत् । तदर्थं शिक्षकः निरन्तरं परिश्रम्य विषयस्याध्ययनाध्यापनयोरुद्देश्यं किमिति निश्चित्य काञ्चिद्योजनां विषयाधारितां कालमितिपरिमितां सोपानक्रमपूरिताञ्च प्रकल्पयेत् यथा छात्रः सुलभतया, सरलतया, स्पष्टतया, शुद्धतया स्वापेक्षानुगुणतया च विषयज्ञानं प्राप्तुं शक्नुयात् । एतादृशं चिन्तनं मनसि निधायैव प्रसिद्धः शिक्षावित् होवर् हर्बर्टमहोदयः पञ्चपदानि प्रत्यपादयत् । तानि च प्रस्तावना - विषयप्रवेश – तुलना - नियमनमभ्यासाः । एतेषामुपयोगः बहुकालं यावत् पाठनार्थं कृतः । तदनन्तरं हर्बर्टमहोदयस्य शिष्याः विस्तारं कृत्वा पाठयोजनायाः रूपमदुः। इत्थं पाश्चात्यपरम्परायां समगतायाः पाठयोजनायाः उद्देश्यं विषयस्योत्तमोत्तमरूपेण बोधनमेव वर्तते । कस्यचिद्विषयस्य बोधनसमये बोधनोद्देश्यानि अपि समुल्लेखनीयानि भवन्ति इत्यत्र प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति लोकोक्तेराधारःपरिदृश्यते। तादृशानि विषयस्य बोधनोद्देश्यानि सामान्यानि अपि भवन्ति विशिष्टानि अपि भवन्ति । सामान्यानि विषयगतानि स्वभावतः भवन्ति । विशिष्टानि विषयावबोधसम्बद्धानि भवन्ति । तेषां स्वरूपमेवं वर्णयितुं शक्यते ।

**संस्कृतशिक्षणस्य उद्देश्यानि**

१. ज्ञानम् – विषयस्य भाषायाः वा तत्त्वज्ञानसम्पादनम् ।

२. कौशलम् – ग्रहणात्मकं- श्रवणद्वारा पठनद्वारा ग्रहणम् ।

३. सौन्दर्यम् – विषयसौन्दर्यास्वादः ।

४. संस्कृतिः – संस्कृतिपरिचयः

५. सन्तोषः – अभिव्यक्त्यात्मकः – भाषणद्वारा, रचनाद्वरेति।

इत्थमाधुनिकपरम्परायाः स्वरूपं चेत् भारतीयप्राचीनपरम्परा अपि अत्र समुल्लेखनीया भवति । तद्यथा - प्रत्येकं ग्रन्थस्याध्यापनसमये पाठयोजनायाः समकक्षरूपेण शास्त्राध्यापनार्थमनुबन्धचतुष्टयस्यानुसरणं कृतमवलोक्यते ।विषयप्रयोजनाधिकारिसम्बन्धाः चत्वारः अनुबन्धाः वर्तन्ते ।एतेषां परिचयं ज्ञात्वैव ग्रन्थस्य बोधनपरम्परा दरीदृश्यते । अत्र कारणं छात्रः ग्रन्थस्याध्ययनोद्देश्यं जानीयादित्येव । एवमेव बोधनार्थं पाठयोजनावदेव काचित् पद्धतिः विषयनिरूपणे परिलक्ष्यते तदेवाधिकरणनाम्ना प्रथते । पाठनार्थं स्वीकृत विषयस्यावबोधनात् पूर्वमेव तद्विषयकसङ्गतिं प्रस्तुत्य तस्मिन् विषये कश्च वा संशयः विद्यते इति प्रदर्श्य, तद्विषयाधारितानाक्षेपान् उद्भाव्य तेषामाक्षेपानां समाधानं सिद्धान्तरूपेण प्रतिपाद्य बोधनस्य उपसंहृतिं शास्त्रज्ञा कुर्वन्तः आसन् । इदानीमपि शास्त्रपाठने एषा रीतिरनुष्ठीयमाना समवलोक्यते । अस्यामपि परम्परायां रूपान्तरेण उद्देश्यानां प्रकटनप्रक्रियास्ति इति अधिकरणस्वरूपपरिशीलनेन ज्ञायते । परन्तु आधुनिकपाठनपध्दतौ पाठयोजनालेखनस्य बहुमहत्त्वपूर्णस्थानं विद्यते । पाठयोजनालेखन समये प्रत्येकस्मिन् सोपाने पाठनार्थं स्वीकृतस्य पाठ्यबिन्दोः उद्देश्यस्पष्टीकरणमनिवार्यं वर्तते । सामान्यतः पाठयोजनायाः पञ्चस्तम्भाः वर्तन्ते । ते च सोपानं, पाठ्यबिन्दुः, लक्षिताधिगमविशेषः, छात्राध्यापकयोः क्रिया मूल्याङ्कनम् इति । अत्र लक्षिताधिगमविशेषः एव विशिष्टो भवति । पाठनार्थं स्वीकृतस्य पाठ्यबिन्दोः लक्षिताधिगमविशेषः प्रतिसोपानं समुल्लेखनीयः विद्यते ।

अतः को नाम लक्षिताधिगमविशेषः किं तस्य स्वरूपम् इति ज्ञानं शिक्षकेषु अपेक्षितम् । लक्षितः स्वीकृतः वा निश्चितः इत्यर्थः । अधिगमस्य विशेषः अधिगमविशेषः ।अधिगमो नाम अभ्यासेन अनुभवेन वा जायमानं सापेक्षं स्थिरं व्यवहारपरिवर्तनमिति तल्लक्षणम् । अर्थात् बोधनेन छात्रेषु जायमानं स्थिरं परिवर्तनम् इत्यर्थः ।अध्यापकः अनपेक्षितं न बोधयति इति सापेक्षस्य सार्थकतास्ति।

तथा च बोधनीयस्य पाठ्यबिन्दोः किञ्चित् लक्ष्यं मनसि निधायाध्यापकः बोधयति तस्मात् बोधनात् छात्रेषु परिवर्तनमायाति इति तात्पर्यम् आयाति । यथा लोके तिलेन तैलं निर्गच्छति न तु शर्करा इति निश्चितः व्यवहारः, तथैव शिक्षकः पाठ्यबिन्दुबोधनमनेन विधिना क्रियते चेत् छात्रव्यवहारे ईदृशमेव परिवर्तनमागच्छे दिति अभिलषेत् निश्चिनुयाच्च । तदर्थमधिगमस्वरूपस्य स्पष्टं ज्ञानमपेक्षते । अधिगमस्य स्तराः भवन्ति । ते च त्रयः ज्ञानात्मकावबोधात्मकप्रयोगात्मकाः । एतेषामाधारेण पाठ्यबिन्दोः अपि उद्धेश्यानि निर्धारितानि भवन्ति । तानेव स्तारान् मनसि निधाय बेञ्जमिन् एस् ब्लूम्-महोदयः बोधनोद्देश्यानां वर्गीकरणमकार्षीत् । ज्ञानात्मकस्तरमाश्रित्य बोध्यमानस्य बिन्दोः उद्देश्यं किं भवितुर्महति अवबोधात्मकस्तरमाश्रित्य बोध्यामानस्य पाठ्यबिन्दोः उद्देश्यं किं भवितुर्महति प्रयोगात्मकस्तरमाश्रित्य बोध्यमानस्य पाट्यबिन्दोः उद्देश्यं किं भवितुमर्हति इति स्पष्टतया वर्गीकरणं कृत्वा ब्लूम्- महोदयः बोधनोदेश्यानां सङ्कलनं कृतवान् । तान्येव पाठयोजनालेखनसमये समुल्लेखनीयानि इति स्पष्टीकरणं दत्तवान् ।अतः लक्षिताधिगमविशेषस्य स्पष्टीकरणम् (S**pecification**) इत्यपि अपरं नाम विद्यते। कस्य स्पष्टीकरणमित्युक्ते उद्देश्यस्य स्पष्टिकरणम् इत्यर्थः । उदाहरणार्थं कस्यचित् श्लोकस्य बोधनं क्रियते चेत् तद्गतपदानां बोधनस्य उद्देश्यस्पष्टिकरणस्य सम्पादनं विधेयमिति ।तानि च स्पष्टीकरणानि निर्दिष्टशब्दानां

सहायेन कर्तव्यं वर्तते । यदि ज्ञानात्मकस्तरमाश्रित्य बोधयति तर्हि जानाति , अभिजानीते, परिचिनोति , इत्यादि शब्दैः स्पष्टीकुर्यात् । कश्चित् यदि अवबोधात्मकस्तरमाश्रित्य बोधयति तर्हि तदर्थं निर्दिष्टैः सम्बध्नाति , विभाजयति ,तोलयति विवृणोति विभेदयति,चर्चयति,अन्विषति,इत्येतै: पदैरेव स्पष्टीकरणं दद्यात्। एवमेव यदि प्रयोगात्मकस्तरमाश्रित्य बोधयति तर्हि , निर्दिष्टैः ऊहते, समाधत्ते,परीक्षते, गणयति,पट्टीकरोति, निरूपयति , निर्णेति इत्येतै: शब्दैः लक्षिताधिगम विशेषस्य स्पष्टीकरणं भवेदिति । अत:लक्षिताधिगमविशेषलेखने जागरूकता अपेक्षते ।

एवञ्च लक्षितः अभिलषितः अधिगमस्य विशेषः व्यवहारपरिवर्तनविशेषः इत्यर्थः समायाति । तेषां व्यवहारपरिवर्तनबोधकानां शब्दानामुल्लेख: पाठयोजनायामनिवार्येण कर्तव्यो वर्तते । लक्षिताधिगमविशेषस्य अनभिज्ञः शिक्षकः पाठस्य बोधनं कर्तुं शक्नोति न तु प्रत्येकं पदात् यत् ज्ञानं जायते तस्य मूल्याङ्कनं कर्तुं अभिलषितस्य उद्देश्यस्य सम्पूर्तिं कर्तुं न प्रभवति । एवञ्च पाठयोजनान्तर्गतस्य लक्षिताधिगमविशेषस्य परिज्ञानं शिक्षकेषु अनिवार्यमपेक्षते इति।

**परिशीलितग्रन्थसूची**


1. संस्कृतशिक्षण- रघुनाथ सफाया– हरियाणा साहित्य अकाडमी पञ्चकूला
2. प्रौढशिक्षण मत्तु शिक्षकन कार्यगळु-(क) एस.शिवय्य पूजाप्रकाशन दावणगेरे ।
3. संस्कृतशिक्षणं नवीनप्रविधयश्च –च.ल.ना. शर्मा –जयपुर ।


**********

# स्वलीनता (Autism)

डा. रामचन्द्रुल बालाजी

Autism spectrum disorder (ASD) is a broad term used to describe a group of Neuro developmental disorders. It effects a person’s behaviors and communication skills.

स्वलीनता नाडीनां विकाससम्बद्ध-अव्यवस्थाकारणात् जायमानः एकः मानसिकरोगः। अयं कदाचित् जन्मतः भवति बल्यावस्थायां वा दृष्टौ पतति । अयं विकारः व्यक्तेः सामाजिकव्यवहाराणां सम्पर्के च प्रभावं जनयति । एतत् रोगग्रस्थः बालः अन्येभ्यः व्यवहारे भिन्नरूपेण अन्यापेक्षया असामान्यः भवति । अयं रोगः बालकस्य मस्तिष्कस्य समाचारप्रक्रियायाः कृते घातं जनयति ।

तस्य इतिहासं पश्यामश्चेत् 2000 वर्षस्य गणनानुसारं 1-2 छात्राः प्रति सहस्रम् अनेन रोगेण ग्रस्तः भवति । तत्रापि बालिकानामपेक्षया बालकेषु अयं रोगः चतुष्पञ्चवारं वा अधिकं भवति । विकिपिडीया अनुसारं 1980 पर्यन्तम् अस्य रोगस्य रोगिणां संख्या सामान्यरूपेणासीत्, परन्तु किम्वा कारणम् इति वक्तुं न शक्यते, 1980 अनन्तरं नाटकीयरीत्या एतेषां रोगिणां संख्या महती वर्धिता । तत् किम् वस्तुतः रोगिणां संख्या वर्धिता वा रोगनिदानपरीक्षासु (Diagnostic) गुणवत्ता आगता वा इति स्पष्टतया वक्तुं नैव शक्यते ।

2004 तमे वर्षे रोगनिरोधनियन्त्रणसमित्या (Center for Disease Control & Prevention) समर्पितगणनानुसारं 59छात्रेषु एकः अनेन रोगेण ग्रस्तः इति ज्ञायते । अधुना 2015गणनानुसारं 24.8 Milion जनाः स्वलीनतारोगेण बाधिताः वर्तन्ते । अस्य रोगस्य तीव्रतां परिगणने स्वीकृत्य April मासस्य प्रपञ्चस्वलीनतामासः (World Autism Month) इति घोषितवन्तः ।

अमेरिका संयुक्तराष्ट्रैः अस्य मासस्य राष्ट्रीय स्वलीनता जागृतिमासः (National Autism Awareness Month) इति उद्घोषितम्।

**रोगस्य कारणानि –**

इदमित्थतया अस्य रोगस्य कारणं वक्तुं नैव शक्यते चेदपि परिशोधकैः बहूनि-सम्भाव्यमानकारणानि उक्तानि वर्तन्ते । यथा –

- मस्तिष्कस्य गतिविधिषु असामान्यतायाः सम्भवः
- मस्तिष्कस्य रसायनेषु असामान्यता
- मातुः गर्भे आवश्यकविकासाभावः
- समयात् पूर्वं जननम्
- आनुवंशिकपरिवर्तनम् (Genetic Mutation) अपि कारणमिति केचन वदन्ति ।
- वृद्धपितॄणां जननम् (Being birth to older parents)
- जननसमये आवश्यकभाराभावः
- गर्भदशायां मातुः कृते जायमानः संक्रमितरोगाणां प्रभावः (Rubella)
- कीटकनाशकविषाणां (Pesticides) कारणादपि भवति
- मात्रा स्वीकृतमादकद्रव्यकारणात् (Alcohol, Cocaine इत्यादयः)
- वातावरणकालुष्यम् (Air Pollution)
- जननसमये गर्भस्थदशायां वा आवश्यकप्राणवायोरभावः
- गृहे पूर्वजेषु अस्य रोगस्येतिहासः
- रोगनिरोधकरूपेण दीयमान टीका (Vaccine) अपि कारणमिति केषाञ्चन सन्देहः (Which has been disproven)
- प्राणवायुसम्बद्धः संक्रमितरोगः (Vital Infection)

**रोगग्रस्तस्य लक्षणानि –**

अस्य रोगस्य लक्षणं कदाचित् शैशवावस्थायां कदाचित् बाल्यावस्थायां वा ज्ञातुं शक्यते । अत्र एकेन लक्षणेन वक्तुं नैव शक्यते, बहूनि लक्षणानि चिन्तनीयानि भवन्ति ।

- सामाजिकसम्बन्धे (Social Development) असमर्थता
- भाषणाशक्तेरभावः (Lack of Communication Skill)
- खादने व्यवहारे वा अपसामान्यप्रवृत्तिः
- अन्यजनानां आदरविषये असमर्थता
- पौनःपुन्यव्यवहारः । तत्र एतादृश व्यवहारः भवति -

१) विन्यासपूर्णव्यवहारः (Stereo Typed Behavior) - अत्र पक्षीवत् हस्तयोः चालनम् (Hand flapping), चक्रवत् शिरसः भ्रमणम् (Head rolling), अग्रे-पृष्ठे च शरीरकम्पनम् (Body Rocking) भवति ।

२) हठप्रवृत्तिः – (Compulsive Behavior) – अत्र शिशुः क्रीडावस्तूनि एकक्रमेण स्थापयति, पुनः पुनः तनि उपकरणानि पश्यति । पौनःपुन्येन हस्तप्रक्षालणं कर्तुम् इच्छति।

३) एकरूपता – (Sameness) – एतेषां कृते वस्तूनां परिवर्तने इच्छा नैव भवति । यदि वस्तूनाम् इतस्ततः परिवर्तनं भवति, तिरस्कारभावं प्रदर्शयन्ति ।

४) परिमितासक्तिः – (Restricted Interest) – अस्य रोगग्रस्तः बालकः दूरदर्शिनी कार्यक्रमाणाम्, जङ्गमदूरवाण्यां कार्यक्रमदर्शनेन तल्लीनतां प्राप्य उपविशति ।

५) स्वयं क्षतिः (Self-Injury) – अस्मिन् व्याधिविशेषे बालकः नेत्राघातम् (Eye poking), चर्मणः क्षतिः(Skin picking), हस्तदंशनम् (Hand Biting), शिरसः उपरि ताडनम्(Head Banging) इत्यादीनि कर्माणि कृत्वा स्वयमेव क्षतिं प्राप्नोति ।

- सामाजिकगतिविधिषु उदासीनता
- अन्यान् न पश्यति, अन्यान् दृष्ट्वा न हसति, अन्येषां भावान् न परिचिनोति
- नाम्ना आह्वयति चेदपि प्रतिक्रिया नैव भवति
- सर्वदा विकलः भवति
- नेत्रयोः एकत्रमेलनं न भवति
- स्वकीयाम् आवश्यकतां वक्तुं मातुः हस्तं मुखे स्थापयति अथवा पीडयति
- पित्रोः (प्राथमिकावसरप्रदातृणाम्) सम्पर्के सर्वदा भवति
- कुत्रापि एकाकी स्थातुं नेच्छति

**परिचयः** (Identification) –

अयं रोगः एकेन लक्षणेन परिचयं प्राप्तुं नैव शक्तः भवति । अतः अस्य निर्धारणे बहूनि लक्षणानि (Symptoms) विचारणीयानि वर्तन्ते ।

- सामान्यतया बालकः मातुः मुखं दृष्ट्वा तदीय हावभावान् ज्ञातुं प्रयतते, परन्तु अस्य रोगग्रस्तः अन्येषां मुखमपि न पश्यति ।
- शब्दं श्रुत्वा न प्रतिस्पन्दते । बधिरवत् व्यवहरति ।
- भाषाज्ञानवृद्धिः न भवति । विकृतशब्दान् वदति ।
- सामान्यशिशवः अन्यान् दृष्ट्वा हसन्ति, परन्तु अयं बालकः स्वकीयप्रपञ्चे एव लीनः भवति ।
- पुनः पुनः हस्तकम्पनादिरूपकार्यं करोति ।

- साधारणबालकवत् काल्पनिकक्रीडां नैव क्रीडति, क्रीडावस्तूनि जिघ्रति, दंशनं करोति ।
- वस्तूनाम् इतस्ततः परिवर्तनेन असहनं प्राप्नोति ।
- बहुचञ्चला श्रान्ताश्च भवन्ति ।
- एतेषाम् अयमेकः विशेषः भवति यत् एतेषु एकस्मिन् इन्द्रियसम्बद्धव्यवहारे तीव्रता भवति ।

अमेरिका-शिशुवैद्यसमितेः (American Academy of Pediatrics) संस्तुतेः अनुसारं सर्वेषां शिशूनाम् अस्य रोगसम्बद्धपरीक्षणं कर्तव्यमिति । तत्र परीक्षणे 23 प्रश्नाः भवन्ति, तेषां समाधानम् अभिभावकैः वक्तव्यं भवति । तद्द्वारा रोगनिर्णयं कर्तुं शक्यत इति ।

सारतया एवं वक्तुं शक्यते एतद् रोगग्रस्तानां दैनिक-स्वकीयजीवनावश्यकतानां पूरणाय आवश्यकभाषा न भवति, कथनक्षमतायाः विकासो नैव भवति ।

प्रथमवर्षे मन्दप्रतिक्रियाः, विलम्बेन शब्दोच्चारणम्, असामान्यव्यवहारः, अभिभावकैः सह व्यवहारं कर्तुं सामञ्जस्याभावः ।

द्वितीय-तृतीयवर्षेषु बहुन्यूनहावभावः भवति, भावशब्दयोः मेलनं नैव भवति। अनन्तरवर्षेषु विशेषावधानं नैव भवति, कल्पनात्मकक्रीडासु भाषाध्ययने च काठिन्यं वहति ।

**चिकित्सा** – शीघ्रतया रोगविषयकं परिचयं प्राप्य मनोरोगविशेषज्ञानां परामर्शस्वीकरणं प्रथमं सोपानं भवति । मनोचिकित्सकस्य, मनोवैज्ञानिकस्य, विशेषरूपेण शिक्षिताध्यापकानां वा सम्पर्कः कर्तव्यः भवति । इयम् एका आजीवनं

विद्यमाना अवस्था भवति । अतः तदुपचाराय औषधं प्राप्तुम् इतस्ततः भ्रमणं व्यर्थं भवति । विशेषज्ञानां सम्पर्कं कृत्वा तदुक्तरीत्या कार्याचरणेन निजजीवने तेषां कार्याणि स्वयमेव कर्तुं किञ्चित् साहाय्यं भवति ।

एतद् रोगग्रस्ताः 70% मानसिकमन्दाः भवन्ति । तेन सामान्यजीवनं पूर्णतया यापयितुं समर्थाः नैव भवन्ति । यदि मानसिकमन्दता न भवति, रोगग्रस्तबालकः अपि अधिगमं प्राप्तुं शक्नोति। कदाचित् एतेषां कानिचन सामर्थ्यानि सामान्यव्यक्तीनामपेक्षयापि विशेषरूपेण भवति ।

केचन अस्य रोगस्य कृते कानिचन औषधानि सूचितवन्तः । तानि क्रमेण –

- High dose Vitamins
- Chelation Therapy, which involves flushing metals from body
- Hyperbaric oxygen therapy
- Melatonin to address sleep issues
- Another alternative medicine practice is CEASE therapy, a mixture of homeopathy, supplements, and 'vaccine detoxing'.

परन्तु एतेषाम् औषधकार्यक्रमाणां विषये प्रामाण्यं नास्ति इत्यतः एतेषाम् उपयोगे कश्चन विचारः आवश्यकः भवति । परन्तु एतेषां रोगिणाम् एवं साहाय्यम् आचरयितुं शक्यते –

- इन्द्रियाणां सम्मेलनार्थं वस्त्रकन्दुकक्रीडानम् अभ्यासः कर्तव्यः भवति ।
- क्रीडासु नूतनशब्दप्रयोगः पुनः पुनः कर्तव्यः भवति, तेन एतेषां भाषणविकासः भवति ।
- अल्पाल्पवाक्येषु साधारणभाषणं कर्तव्यं भवति ।
- क्रीडासु शनैः शनैः क्रीडकानां संख्या वर्धनीया, तेन नूतनजनैः साकं सम्पर्कं कर्तुं प्रभवति ।

- एकं शब्दं वदति चेत् प्रशंसया प्रेरणं दातव्यं भवति ।
- यदि बालकः वक्तुं न प्रभवति तेनोक्तरीत्या अस्माभिरेव वाक्यं वक्तव्यं भवति ।
- गृहादन्यत्र नियमितरूपेण जनानां मेलनार्थम् अवकाशः दातव्यः भवति ।
- तन्यतारहितस्थलानां (Park) प्रति नयनम् आवश्यकम् । अन्यबालकैः सह भाषणार्थं प्रेरणा दातव्या ।
- दृष्टिं संयोज्य भाषणाय प्रयासः कर्तव्यः ।
- तेषां प्रोत्साहनार्थं वर्णात्मकचमत्कारजनकाकर्षकवस्तूनाम् उपयोगः कर्तव्यः । तेषां शारीरिकस्वास्थ्यवर्धनाय धावनं बाह्यक्रीडासु भागग्रहणाय च अवकाशः कल्पनीयः ।

एवं मनोवैज्ञानिकचिकित्सकस्य सूचनानुसारम् उपर्युक्तकार्यक्रमाणाम् आचरणम्, आवश्यक-औषधीनां स्वीकरणम्, निरन्तररूपेण तस्य पालनम् इत्यादि क्रियाकलापद्वारा एतेषां रोगिणां किञ्चिदाश्वासम् आनेतुं शक्यते ।

**********

# वैयक्तिकानुदेशनम्

## (Personalized System of Instruction)

**डा. हरिप्रसादः के.**

### उत्पत्तिः विकासश्च

वैयक्तिकानुदेशनस्य प्रवर्तकः प्रेड्.एस्.केल्लर्(१९७४) इत्याख्यः वर्तते । तस्य सहायकः जे.जि.शेर्मन् (J.G. Sherman) इत्याख्यः एनां नूतनां वैय्यक्तिकानुदेशनपद्धतिं १९६३ तमे वर्षे मार्चमासे कोलम्बस् विश्वविद्यालये (Columbus University) मनोविज्ञानस्य नूतनपाठ्यक्रमस्य बोधनार्थम् आरम्भे उपायुङ्क्त । एतस्य आविष्कर्तुः सम्माननार्थं/गौरवार्थं इयं वैय्यक्तिकानुदेशनपद्धतिः केल्लर्-योजना(Keller Plan) इति नाम्ना अपि व्यवह्रियते ।

एतस्याः वैय्यक्तिकानुदेशनपद्धतेः प्रतिपादकाः हार्वर्ड्-विश्वविद्यालयीयस्य आचार्यस्य बि.एफ्.स्किन्नर्-वर्यस्य १९५० तमे संवत्सरे प्रतिपादितायाः प्रसिद्धायाः अभिक्रमितानुदेशनपद्धतेः (पद्धतितः) अत्यन्तं प्रभाविताः आसन् । ते अभिक्रमितानुदेशनपद्धतेः क्षेत्रं विस्तार्य, तस्याः नूतनं स्वरूपं दत्वा उन्नतकक्ष्यायाः छात्राणां उपयोगार्थं एतस्याः वैयक्तिकानुदेशनपद्धतेः स्वरूपं प्रायच्छन् । तेषां नूतनायाः वैय्यक्तिकानुदेशनप्रणाल्याः आविष्कारस्य उद्देश्यं नूतनपद्धतेः विकासः आसीत् ।

या च पद्धतिः-

१. अभिक्रमितानुदेशनपद्धत्यपेक्षया विशालान् अनुबन्धान् (Frames) प्रयच्छति ।

२. शिक्षणाधिगमपरिस्थित्यनुगुणं अत्यन्तं स्वातन्त्र्ययुक्ता स्वीकारार्हा च भवति ।

३. शिक्षणाधिगमप्रक्रियायां वैय्यक्तिकसामाजिकतत्त्वं परिचाययति ।

४. शिक्षकस्य उत्तरदायित्वे महत्वपूर्णं परिवर्तनं आनयति । पूर्वं शिक्षकस्य केवलं ज्ञानदातृत्वेन या स्थितिः आसीत् सा स्थितिः अत्र प्रत्येकं छात्रस्य अधिगमे जायमानानां आपदां परिहतृत्वेन परिवर्तिता वर्तते ।

एतादृशीं सर्वविधां धारणां मनसि निधाय केल्लर्-वर्यः तस्य सयोगिनश्च विभिन्नान् प्रयोगान् अनुसन्धानानि च कृत्वा एतादृशीं नूतनां पद्धतिं आविश्चक्रुः ।

**उद्देश्यानि**

- छात्रशिक्षकयोः मध्ये उत्तम-वैय्यक्तिक-सामाजिक-सम्बन्धस्थापनम् ।
- प्रत्येकं छात्रस्य विषये व्यक्तिगतरूपेण उत्तम-वैय्यक्तिकावधानम् ।
- छात्रगत्यनुसारं पाठ्यविषये स्वामित्वसम्पादनार्थं साहाय्यप्रदानम् ।
- छात्रस्य कृते निर्व्याजं सतत-पुनर्बलनदानम् ।
- समूहमाध्यमस्य उपयोगेन केवलस्य व्याख्यानविधेः निरासः ।
- सूचनाप्रदातृत्वेन शिक्षकस्य यत् पात्रम् अस्ति तस्य स्वच्छात्राणां अध्ययने जायमानानाम् आपदां निवारकत्वेन परिवर्तनम् ।
- अनुदेशनप्रक्रियायां सार्थकाभ्यासाय शिक्षकाणां कृते समुचितप्रतिपुष्टिप्रदानम् ।

## वैशिष्ट्यानि

### 1. वैय्यक्तिकतायाः समानयनम् (Introduction of Personal Element)

अनुदेशनप्रक्रियायां वैय्यक्तिकतायाः स्पर्शं उत्पादयति वैय्यक्तिकानुदेशनम् । अत्र छात्राणां वैय्यक्तिकसामर्थ्याधारेण अध्ययनं कर्तुं शिक्षकाः शिक्षकसहायकाश्च आन्तरङ्गिकरूपेण साहाय्यमाचरन्ति । प्रचलितशिक्षणपद्धत्यपेक्षया अधिकं प्राधान्यं शिक्षक-बोध्यविषययोः सम्बन्धविषये अस्यां पद्धतौ दीयते ।

### 2. अधिगमे प्रभुत्वावाप्तिः (Mastery Learning)

एतस्य उद्देश्यं तावत् प्रत्येकं छात्रस्य पाठ्यविषये सम्पूर्णस्वामित्वसम्पादनम् अस्ति । अत्र छात्रः स्वतन्त्रतया अध्ययनमार्गे प्रवर्तते । कठिनपरिश्रमं करोति । निर्दिष्टे पाठ्यांशे स्वामित्वं सम्पादयति । छात्रस्य कृते अग्रिमं पाठ्यांशं/पदम् अध्येतुं तदानीमेव अवसरो दीयते यदा सः प्रकृतं पाठ्यांशं/पदं सम्यगधीत्य तत्र दाढ्र्यं सम्पादयति । अग्रिमाध्ययनार्थं तेन आसादितं स्थानं(Position / rank) कारणं न भवति प्रत्युत स्वाधीतविषये स्वामित्वमात्रम् ।

### 3. स्वगतिः (Self Pacing)

छात्राणां कृते स्वगत्यनुसारं अध्ययनं कर्तुं एषः प्रविधिः अवसरं कल्पयति । छात्राणां पारिवारिकी पृष्ठभूमिः सामाज्जिकी पृष्ठभूमिश्च या कापि भवतु, सः येन वेगेन अध्येतुं शक्नोति तेन वेगेनध्येतुं तस्मै अवसरः दीयते । तस्य शक्तिर्वा, योग्यता वा अभिरुचिर्वा, अभिप्रेरणा वा या कापि भवतु चिन्ता नास्ति । सः अन्यस्य छात्रस्य अध्ययनवेगेन सह स्पर्धां कृत्वा तत्समो वा तदूर्ध्वगामी वा भवेत् इति नास्ति नियमः। इत्युक्ते छात्रः स्वतन्त्रतया स्वसामर्थ्यानुसारं, योग्यतानुसारं, प्राप्ताभिप्रेरणानुसारं, इच्छानुसारं च अध्ययनं कर्तुं अस्मिन् प्रविधौ अवसरं प्राप्नोति ।

### 4. लेखनकार्यस्य प्राधान्यम् (Emphasis on written work )

साम्प्रतिकी शिक्षा प्राधान्येन मौखिकी एव वर्तते । अत्र अनुदेशनदानम् एव प्रधानं भवति । किन्तु वैय्यक्तिकानुदेशने तु मौखिककार्याय प्राधान्यं न दीयते । लेखनकार्यस्य प्राधान्यं वैय्यक्तिकानुदेशनप्रणाल्यां भवति । अत्र छात्रेभ्यः अध्यनसामग्री लिखितरूपेण दीयते । अनुदेशनान्यपि लिखितरूपेण एव दीयन्ते । छात्राणाम् अध्ययनकर्मणि उपयोगार्थं अध्ययनमार्गदर्शिकाः उपलभ्यन्ते । अध्ययनसामग्र्यः अपि विभिन्नेषु रूपेषु लभ्यन्ते । यथा – अभिक्रमितपाठाः,

सामान्यपाठाः, पाठसारः, विशेषरूपेण सज्जीकृताः पाठ्यांशाः, स्वाध्यायसामग्र्यः इत्याद्याः । अध्येयविषे स्वामित्वं सम्पादितं वा न वेति परीक्षणार्थं घटकपरीक्षा/आंशिकपरीक्षा सञ्चाल्यते ।

**5. व्याख्यानस्य वा मौखिकसम्प्रेषणस्य वा न्यूनीकरणम् (Limiting the use of lecture or oral communication)**

वैय्यक्तिकानुदेशनम् ख्यानपद्धतेः शाब्दिकसम्प्रेषणस्य च अधिकं महत्त्वं न कल्पयति । साम्प्रतिकशिक्षणपद्धतौ व्याख्यानं शाब्दिकव्यवहारश्च प्राधान्यमावहति। छात्रान् निष्क्रियरूपेण व्याख्यानस्य श्रवणार्थं विवशान्/आबद्धान् करोति । वैय्यक्तिकानुदेशने इत्थं निष्क्रियरूपेण ज्ञानसम्प्रेषणार्थं व्याख्यानाय अवसरः न दीयते । व्याख्यानाय वा अनुदेशनाय वा अवसरो दीयते चेत् छात्रान् अभिप्रेरयितुं वा, मार्गं दर्शयितुं वा दीयते । विमर्शात्मकज्ञानस्य स्रोतत्वेन अध्यापकस्य परिग्रहः अस्मिन् विधौ नास्ति ।

**6. समुचित-पुनर्बलनस्य प्रसक्तिः (Provision of appropriate reinforcement)**

वैय्यक्तिकानुदेशनस्य छात्रेभ्यः सत्वरं कालोचितं पुनर्बलनं दीयते । येन वैय्यक्तिकानुदेशनस्य छात्राः स्वगत्यनुसारं अध्येतुं स्वातन्त्र्यं प्राप्नुवन्ति । सः स्वस्य अवबोधस्य विषये दार्ढ्यस्य च परीक्षणार्थं घटकपरीक्षां यदा सः इच्छति तदा कारयितुं प्रभवति । अस्याः घटकपरीक्षायाः माध्यमेन प्राप्यमाना प्रतिपुष्टिः तस्य समुचितं पुनर्बलनं भवितुमर्हति । तस्य अध्ययनकर्मणि स्वविकासविषये सः ज्ञातुं इच्छति चेत् कदापि कतिवारमपि परीक्षां कारयितुं कोऽपि निर्बन्धः नास्ति ।

**7. छात्रसहायकानाम् उपयोगः (Use of Proctors)**

वैय्यक्तिकानुदेशने छात्रसहायकाः महत्वपूर्णं पात्रं (भूमिकाम्) निर्वहन्ति । वैय्यक्तिकानुदेशनम् छात्रसहायकाभावे वैय्यक्तिकानुदेशनमेव भवितुं न अर्हति । एते छात्रसहायकाः आधिक्येन कक्ष्यायामेव विद्यमानाः तीक्ष्णमतयः छात्राः भवन्ति । एते शिक्षकस्य बोधनेन विनापि अध्येयविषयं अवगन्तुं पारयन्ति । अथवा दिङ्मात्रेण उच्यते चेदपि अवगन्तुं योग्यता तेषु भवति । ते तीक्ष्णमतयः छात्राः अवशिष्टान् छात्रान् लक्ष्यीकृत्य बोधनावसरे जामिताम् अनुभवन्ति । तैः विषयः लीलया अवगम्यते इति कारणात् विषयस्य आवृत्तिं वा वैशद्येन विवरणदानं वा एते न सहन्ते। अतः एतेभ्यः छात्रसहायकत्वेन प्रोन्नतिः दीयते चेत् आत्मानं शिक्षकं मन्वानाः शिक्षकस्य समुचितं साहाय्यं विदधति । किञ्च ते तादृशकर्मणः कारणात् सम्प्रेषणकौशलं आसादयितुं प्रभवन्ति । मन्दानां छात्राणां बोधनसमये शिक्षकेण अनुभूयमानानि कष्टानि कानि इति अवगच्छन्ति । तेषु नेतृत्वगुणाः विकसन्ति । एते छात्रसहायकाः कक्ष्यायां अधिकसंख्यायां भवन्ति चेत् शिक्षकस्य महान् लाभो भवति । एते अन्यैः छात्रैः सह सौहार्दं सम्बन्धं रक्षन्तः मित्रवत् व्यवहरन्तः च अवशिष्टानां छात्राणां पुरोगतये यथा प्रवर्तेरन् तथा शिक्षकः कुर्यात् । येन छात्रसहायकानां कार्यकौशलवृद्ध्या सह अवशिष्टानां छात्राणां विकासोऽपि जायते ।

### 8. समयवैय्यर्थ्यस्य जाड्यस्य च न्यूनीकरणम् (Reducing the problem of wastage and stagnation)

अस्मिन् प्रविधौ शिक्षकससमयस्य छात्रसहायकानां समयस्य छात्राणां समयस्य च सदुपयोगः भवति । कस्मिन्नपि विषये कस्यापि अनवगतिरिति न भवति। सामान्य-शिक्षणपद्धतौ मन्दमतिच्छात्राणां अनवगतेः कारणात् यत् जाड्यं भवति स्म तज्जाड्यं अत्र निवृत्तं भवति । सर्वेऽपि सक्रियाः सन्तः अध्येयविषयं अवगन्तुं प्रवर्तन्ते ।

## प्रक्रिया

- पाठ्यक्रमस्य विविधेषु पदेषु (Unit/Frame) विभाजनं क्रियते । एतानि पदानि अभिक्रमितपदापेक्षया बृहन्ति भवन्ति ।

- इत्थं सज्जीकृतानि पदानि मुद्रितानि, अन्यानि च परिकराणि (Study Guide, Learning aids, Material facilities, Learning environment) छात्रेभ्यः दीयन्ते ।

- प्रत्येकं छात्राय प्रदत्तसामग्र्याः अध्ययनार्थं निर्देशः दीयते । अत्र अध्ययनमार्गदर्शिका तस्य छात्रस्य साहाय्यमाचरति । इयं अध्ययनमार्गदर्शिका पाठ्यक्रमस्य पाठ्यविषयं परिचाययति, अनुदेशनोद्देश्यानि स्पष्टीकरोति । प्रश्नान् सन्देहान् च उपस्थाप्य समादधानान्वेषणमार्गान् प्रदर्शयति ।

- छात्राः इमं पाठ्यांशं गृहे, विद्यालये, कार्यशालायां, ग्रन्थालये, प्रयोगशालायां वा अध्येतुं स्वतन्त्राः भवन्ति । ते छात्राः पठेयुः, अपेक्षितं अध्ययनानुभवं प्राप्नुयुः, प्रश्नानां समाधानानि च लिखेयुः । आवश्यकतायां सत्यां शिक्षकस्य वा शिक्षकसहायकस्य (छात्रप्रमुखाणां Proctor) वा मार्गदर्शनं प्राप्तुमर्हति ।

- छात्राः सर्वेऽपि स्वगत्यनुसारमेव अध्ययनकर्मणि प्रवृत्ताः भवेयुः । छात्रः यदा पाठ्यांशे दार्ढ्यं प्राप्तवानिति चिन्तयति तदा शिक्षकसहायकं वा शिक्षकं वा स्वस्य परीक्षां चालयितुं प्रार्थनां कर्तुमर्हति । सः परीक्षायां साफल्यं प्राप्नोति चेत् अग्रिमं पदं पठितुं तस्मै अवसरो दीयते, नो चेत् पूर्वतनमेव पदं पुनः पठनीयम् भवति ।

- ये छात्राः पाठ्यांशे दार्ढ्यं प्राप्नुवन्ति तान् शिक्षकः स्वीकृत्य तेभ्यः प्रशिक्षणं प्रदाय तान् शिक्षकसहायकान्(Proctors) करोति । शिक्षकस्य साहायाप्रदानम्, छात्राणां पाठ्यविषये दार्ढ्यं प्राप्तुं सहयोगप्रदानं च एतेषां कार्यं भवति । अत्यन्तं नैकट्येन अभिमुखीभूय मार्गदर्शनं, परीक्षणं, झटिति अङ्कगाणना, अनुबोधनम्, प्रतिपुष्टिप्रदानम्, पुनर्बलनदानञ्च तदा एव सम्भवति यदा कलाकौशलनिपुणाः प्रशिक्षिताः शिक्षकसहायकाः भवन्ति । अतः एतेषां शिक्षकसहाकनां प्रशिक्षणादानावसरे उचितं अवधानं दातव्यं भवति येन वैय्यक्तिकानुदेशनेन साफल्यं साधितं भवेत् ।

- छात्रः प्रदत्तपाठ्यक्रमस्य सर्वेषु पदेषु यदा दार्ढ्यं प्राप्नोति तदा अन्ते अन्तिमपरीक्षायां भागं ग्रहीतुम् अर्हति यत्र श्रेणी दीयते । अत्र कस्यापि छात्रस्य श्रेणीदानं तदितरच्छात्राणां उपलब्धिमाश्रित्य न भवति । एतस्य उद्देश्यम् अग्रिमाध्ययनार्थं प्रेरणादानं अस्ति न तु अन्यच्छात्राणां उपलब्ध्या सह तुलना । एतादृश्यां मूल्याङ्कनप्रणाल्यां छात्रः इतरच्छात्राणां उपलब्ध्या सह स्वस्योपलब्धिं तोलयित्वा हताशः न भवति ।

## उपयोगिताः

वैय्यक्तिकानुदेशनपद्धतिः शिक्षाक्षेत्रे विद्यमानः नवीनः प्रविधिः । एतस्य प्रविधेः उपयोगिताः काः सन्ति इति प्रयोगमाध्यमेन परीक्षितम् । एतस्य शिक्षाक्षेत्रे कः प्रभावः अस्ति इति परीक्षितम् । एतस्य प्रभावविषये उपयोगितायाश्च विषये बहूनि अनुसन्धानानि प्रवृत्तानि । किन्तु तानि अनुसन्धानानि आधिक्येन भारतात् बहिरेव प्रवृत्तानि । तथापि तादृशानुसन्धानां बलेन उपयोगिताः काः इति इत्थं वक्तुं शक्यते –

1. स्वगत्यनुसारं स्वतन्त्रतया च अध्येतुः कृते अध्ययनार्थं वैय्यक्तिकानुदेशनपद्धतिः अवसरं प्रयच्छति ।

2. इयं पद्धतिः अध्येयविषये दार्ढ्यं अवाप्तुं अपेक्षितस्तरे परिणामं प्राप्तुं च विद्यमाना उत्तमा पद्धतिरस्ति ।

3. अनुदेशनस्य परिप्रेक्ष्ये व्याख्यानादिपारम्परिकपद्धत्यपेक्षया वैय्यक्तिकानुदेशनपद्धतिः अधिकप्रभावयुक्ता इति प्रमाणीकृतं वर्तते ।

4. सर्वेषां विषयाणां बोधनार्थं विशिष्य छात्रावगत्यर्थं इयम् अत्यन्तम् उपयुक्ता पद्धतिरस्ति । किञ्च प्राथमिककक्ष्यासु इव उन्नतकक्ष्यासु अपि अधिकोपयोगिनी वर्तते पद्धतिरियम् ।

5. छात्रसामर्थ्यस्य प्रकाशनार्थं पद्धतिरियं साहाय्यमाचरति । छात्रः अत्र विषयं सुष्ठु ग्रहीतुं पारयति । ग्रहीतं विषयं विनिमातुमत्र अवसरं प्राप्नोति । अध्येयविषयस्य यथार्थस्वरूपं तात्पर्यं च छात्रेणात्र प्राप्यते । छात्रस्य अध्येयविषये गभीरावगमकारणात् काचित् अन्तर्दृष्टिरपि जायते । तथ्यानां रटनम् नात्र सम्पद्यते इति अस्य महान् गुणः । यतो हि छात्रः विषयस्य अवगमनार्थं सङ्कोचस्वभावे सत्यपि छात्रसहायकानां निकटे संवादं कृत्वा विज्ञातुं प्रभवति । विषयस्य स्पष्टप्रतित्तेः परं निरर्थकरटनस्य[1] प्रसङ्ग एव न जायते ।

6. स्वसामर्थ्यानुगुणं विकासपथे अग्रे सरणार्थं छात्रस्य अत्र सुमहान् अवसरः भवति । तस्मात् छात्रः आत्मनि उत्तमां अध्ययनप्रवृत्तिः जनयितुं शक्नोति। निरन्तरं एकस्य पाठ्यांशस्य समाप्तेः परं अग्रिमं पाठ्यांशं अध्ययनार्थं छात्रः प्राप्नोति । अन्यस्य छात्रस्य अवगमनपर्यन्तं अनेन छात्रेण प्रतीक्षा

[1] निरर्थकरटनम् इति पदप्रयोगात् रटनं/आवृत्तिः निरर्थकं/निरर्थिका इति न मन्तव्यम् । यतो हि संहितादीनां अष्टानां पाठानां माध्यमेन वेदादीनां स्वाध्यायः/आवृत्तिः वैदिकादिवाङ्मयस्य संरक्षणार्थं विद्यमानः सार्थकः अत्यन्तं वैज्ञानिकश्च क्रमः वर्तते ।

करणीया इति न भवति । किञ्च विषये यदा दाढर्यं प्राप्नोति तदा स्वयमेव "अहं परीक्षार्थं सज्जः अस्मि" इति घोषयितुम् अर्हति । अनेन क्रमेण तस्मिन् छात्रे स्वस्य अध्ययनविषये उत्तरदायित्वभावना विकसति । स्वयम् स्वाध्यायविषये अनुशासितः भवति ।

7. अधिगन्ता(Learner) अस्याः वैय्यक्तिकानिदेशनपद्धतेः कारणतः अधिगमस्य शिक्षायाश्च विषये धनात्मकाभिवृत्तिं स्वस्मिन् विकासयितुं शक्नोति । अस्यां पद्धतौ अधिगन्त्रा यदा प्राप्तव्यं तदा समुचितं पुनर्बलनं प्रतिपुष्टिं च प्राप्यते । अन्यैः छात्रैः सह अधिगतुः तुलना न क्रियते इत्यतः कदपि सः निराशः न भवति ।

## सन्दर्भग्रन्थसूची


1. शैक्षिक तकनीकी एस्.के. मङ्गल एवं उषा मङ्गल
2. शैक्षिकप्रविधिशास्त्रम्, प्रो.सुदेशकुमारशर्मा
3. शैक्षिक तकनीकी एस्.पि. कुलश्रेष्ठ


**********

# विश्लेषणात्मकमनोविज्ञानम्

**डा. गणेश .ति. पण्डितः**

मनोविज्ञानस्य सत्सु बहुषु सम्प्रदायेषु मनोविश्लेषणसम्प्रदायोऽपि अन्यतमः । वैयक्तिकमनोविज्ञानम्, विश्लेषणात्मकमनोविज्ञानमिति अन्यौ द्वौ सम्प्रदायौ मनोविश्लेषणसम्प्रदायस्यैव उपजौ वर्तेते । किञ्च अनयोः द्वयोरपि सम्प्रदाययोः प्रवर्तकौ मनोविज्ञानाध्ययनदशायां मनोविश्लेषणवादस्य प्रबलानुयायिनौ भक्तौ च आस्ताम् । कालान्तरे तद्वादेन विमुखीभूय स्वस्य स्वस्य सम्प्रदायस्य वादस्य वा विकासम् अकुरुताम् । मनोविज्ञानस्य विभिन्नसम्प्रदायानाम् अध्ययनावसरे अनुसन्धानावसरे च एतौ द्वौ सम्प्रदायौ अवश्यमेव नयनपथमवतरतः । अनयोर्मध्ये विश्लेषणात्मकमनोविज्ञानमधिकृत्य अत्र विविच्यते ।

विश्लेषणात्मकमनोविज्ञानमपि मनसः अथवा व्यक्तित्वस्य विश्लेषणार्थमेव प्रवृत्तम् । प्रत्येकमपि मानवस्य व्यवहारं 'लिबिडो' इत्याख्यं तत्त्वं निर्धारयति इति मनोविश्लेषणवादस्य सिद्धान्तः । 'लिबिडो' इत्यस्य वैषयिकीशक्तिः, कामप्रवृत्तिः विषयैषणा इत्यादीनि नामान्तराणि अनूद्य वक्तुं शक्नुमः । पुनः श्रेष्ठत्वप्राप्त्यभिलाषा अथवा प्रतिष्ठैषणा एव मानवव्यवहारं निर्धारयति इति वैयक्तिकमनोविज्ञानस्य सिद्धान्तः । अनयोः द्वयोः सिद्धान्तयोः तन्नाम सम्प्रदाययोः विश्लेषणं कृत्वा तयोर्मध्ये सामञ्जस्यं संस्थापयितुमेव विश्लेषणात्मकमनोविज्ञानं प्रवृत्तमिति वक्तुं शक्यते ।

अस्मिन् सम्प्रदाये 'लिबिडो' इत्येतत् जीवनतत्त्वम् इति स्वीक्रियते न तु विषयासक्तिमात्रम् कामप्रवृत्तिमात्रं वा । किञ्च मानवाय सुखमयजीवनयापनार्थं 'लिबिडो' इत्याख्यं पूर्वसूरिभिः व्याख्यातं तत्त्वं कारणं न वर्तते न वा

प्रतिष्ठाप्राप्तिमात्रं हेतुरस्ति । अतः प्रत्येकमपि मानवव्यवहारस्य अध्ययनेनैव विज्ञातुं शक्यते यत् सः अन्तर्मुखी वा बहिर्मुखी वेति । परेषां सम्प्रदायानां वैकल्यदर्शनायैवात्र अन्तर्मुखीनां बहुर्मुखीनां च प्रसङ्गः स्वीक्रियते विश्लेषणात्मकमनोविज्ञानिभिः अन्तर्मुखिनः बहिर्मुखिनः इत्येतानि व्यक्तित्वस्य प्रकारान्तराणि सन्ति ।

तत्र अन्तर्मुखिनः सामान्यतः विचारप्रियाः आत्मकेन्द्रिताः सामाजिककार्यैः अलिप्ताश्च दृश्यन्ते । बहिर्मुखिनः ततो भिन्नाः लोकप्रियाः सामाजिकाः बाह्याडम्बरप्रियाः सामाजिकप्रतिष्ठाप्रियाः सुखोपभोगप्रियाः च भवन्ति । अत्र व्यक्तित्वभेददर्शनेन सिध्यति यत् पूर्वोक्तः मनोविश्लेषणवादः यश्च 'लिबिडो' इत्याख्यस्य तत्त्वस्य बलेन स्थितोऽस्ति सः केवलं बहिर्मुखीनां मानवानां व्याख्यां करोति इति । पुनः वैयक्तिकमनोविज्ञानं तु व्यक्तिप्रतिष्ठाकेन्द्रितं यश्च अन्तर्मुखीनां मानवानां व्यक्तित्वं व्याख्याति इति । अनेन सिद्धं यत् उभावपि वादौ एकपक्षीयौ इति ।

एतत्सर्वं मनसि निधाय विश्लेषणात्मकमनोविज्ञानिभिः 'लिबिडो' इत्येतस्य तत्त्वस्यैव अर्थः पुनः सरलीकृत विशदीकृतश्च । एवं करणेन न केवलं बहिर्मुखीनाम् अपि तु अन्तर्मुखीनामपि विज्ञानं स्यादिति । किञ्च 'लिडिबो' नाम वैषयिकीशक्तिः अथवा कामशक्तिः इति कथनापेक्षया जीवनतत्त्वम् अथवा जीवनशक्तिः इति कथनेन सर्वविधव्यक्तित्ववतां मानवानाम् अध्ययनं शक्यते इति फलितम् ।

पूर्वोक्तेषु त्रिष्वपि सम्प्रादयेषु मनसः अस्तित्वं तस्य च स्तरत्रयमस्तीति विना विवादं अभ्युगम्यते । चैतन्योपचैतन्याचैतन्यञ्चेति मनसः स्तरत्रयं तत्र प्रसिद्धमेव । त्रिषु चैतन्यस्तरः लोकसम्पर्कसम्बद्धः स्तरः वर्तते । जाग्रदवस्थायां क्रियमाणाः सर्वेऽपि व्यवहाराः अस्यैव परिचायकाः सन्ति । उपचैतन्यमित्येषः

द्वितीयस्तरः । स्मृतिः इति वक्तुं शक्यते अस्य । पुरुषप्रयत्नेन सुखेन च बहिरागन्तुं शक्याः मनोगताः विचाराः उपचैतन्ये निवसन्ति । चैतन्यस्यैव पार्श्वे तिष्ठतीत्यतः नाधिकं महत्त्वमस्य ।

अचैतन्यनामाख्यः तृतीयस्तरः एव प्रधानः मुख्यश्च वर्तते त्रिष्वपि सम्प्रदायेषु सम्प्रदायत्रयस्यापि दृष्टिरत्रैव । मनसः त्रिषु स्तरेषु वृहत्तमः आधारभूतश्च स्तरो नाम अचैतन्यस्तरः इत्यत्र न कस्यापि विप्रतिपत्तिः । परन्तु अचैतन्यं नाम किम्? तस्य स्वरूपं कीदृशम् ? तदीयानि वैशिष्ट्यानि कानीत्यत्र सन्त्येव विप्रतिपत्तयः ।

अचैतन्यं नाम मानवस्य अपूरितमनोरथानां दमितभावानां च बृहद्भण्डारः वर्तते यत्र मानवस्य ईषदपि अधिकारो नास्तीति मनोविश्लेषणवदिनः निगदन्ति । अचैतन्यमनसः एकपक्षीयं व्याख्यानमिदम् इति विश्लेषणात्मकमनोविज्ञानिनः कथयन्ति । एतैस्तु व्यक्तिगताचैतन्यम् जातीयाचैतन्यमिति अचैतन्यमनसः भागद्वयं तत्र कल्प्यते । अयमेव प्रधानः विषयविशेषः वादस्यास्येति सुधीभिरत्र आकलनीयम्।

अचैतन्यमनसः आधारः जैविकः तस्य च विकासः व्यक्तिशः भवतीति पुनः मनोविश्लेषणवादिभिरुच्यते । व्यक्तिगताचैतन्यस्य विषये यदा विचारविमर्शः क्रियते तदा मनोविश्लेषणवादिनां मतमभ्युपगन्तुं शक्यते । परन्तु अचैतन्यमनसः द्वितीयभागः यः वर्तते यस्य च जातीयाचैतन्यमिति नाम सः नैतादृशोऽस्ति । नायं भागः व्यक्तेः दमितभावानाम् अपूरितमनोरथानां भण्डारमात्रम् । एषः भागः समस्तमानवजातेः गुणस्वरूपव्यवहाराणां साररूपः संस्कारविशेषः वर्तते ।

अत्र सौकर्याय एवमपि वक्तुं शक्यते यत् एकस्य व्यक्तिविशेषस्य शैशवबाल्यकालिकाः विचाराः दमितभावाश्च सुप्तरूपेण व्यक्तिगताचैतन्ये तिष्ठन्ति

पुनस्तदीयसमुदायस्य समाजस्य वा आचारस्वभावपद्धतयः पौराणिकाश्च परम्पराः जातीयाचैतन्ये निवसन्तीति । उभावपि स्तरौ स्वतन्त्रौ व्यक्तेः अधिकारात् मुक्तौ च स्तः ।

आधुनिककाले मानवः आत्मानं कामम् आधुनिकं नागरिकं मन्यताम् । परन्तु सः भौतिकदृष्ट्यैव आधुनिकोऽस्ति न तु मानसिकदृष्ट्या । मनसा मानवः पौराणिकः एव । मानवस्य शरीरम् आधुनिकं स्यान्नाम परं मनः प्राचीनविचारैः प्रभावितं भवतीति एतेषां वादः । अस्मिन् सन्दर्भे

**“वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि”**

इत्येषः भगवद्गीतास्थः श्लोकः स्मृतिपथमधिरोहति ।

मनसः प्राचीनत्वप्रतिपादनाय विश्लेषाणात्मकमनोविज्ञानिभिः बह्व्यः युक्तयः प्रदर्श्यन्ते । उदाहरणार्थम् – ‘मनोविदलनम्’ इत्येषः कश्चन मनोज्ञः । एतादृशरोगग्रस्तः सर्वदा चिन्तयति कथयति च यत् – दूरस्थः कश्चन पुराणपुरुषः स्वीयया अलौकिकशक्त्या मन्त्रतन्त्रशक्त्या वा मन्मनसः नियन्त्रणं करोति, तथैव कानिचन अनिष्टानि कार्याणि च कर्तुं मां परोक्षरूपेण चोदयति इति ।

एवमेव मानसिकरोगग्रस्तेषु बहूनां समान्याः व्यवहाराः पौराणिकाः प्राचीनविचारैः गाथाभिश्च सम्पृक्ताः दृश्यन्ते ।

यदा स्वप्नप्रसङ्गः आयाति तदापि अस्मत्पूर्वजानां विचाराः तत्र परिदृश्यन्ते । स्वप्नोऽपि केवलं व्यक्तिगतचेतनमनसि स्थितानां दमितभावानां निर्गमद्वारमात्रं नास्ति । स्वप्नस्यापि विषयवस्तूनि पुराणान्येव सन्ति । अस्योपरि संस्कारस्य प्रभावोऽपि वर्तत एव । यद्येवं न स्यात् तर्हि कथं वा मनुष्यः स्वप्नावस्थायां पूर्वजाः इव पशुपक्षिभिः सः भाषते । कथं वा सः स्वप्नावस्थायाम्

आकाशमार्गे पुष्पकविमाने वा विहरति ? कथं वा स्वप्नस्थः क्षणाभ्यन्तरे भीमार्जुनौ इव सर्वान् शत्रून् हन्ति ।

अतः एवोच्यते यत् मानवानां व्यवहाराः प्राक्कलिकैः रुढिविश्वासपरम्पराभिः प्रभाविताः जायन्ते इति । केवलम् अचैतन्यस्तरे एव न, अपि तु चैतन्यस्तरे अपि मानवव्यवहाराः प्राचीनपरम्पराभिः प्रभाविताः भवन्त्येव । लोकव्यवहारेष्वपि एतादृशान् विचारान् वयम् अक्षिसात्कर्तुं शक्नुमः ।

उदाहरणार्थम् – माङ्गलिककार्यसंपादनाय यात्रारतः कश्चन सुनागरिकः तत्र कार्ये असफलतायां सत्यां मध्ये मार्गे दृष्टं बिडालं शपति । वायुना निर्वापितः दीपोऽपि अमङ्गलसूचकः इति वैज्ञानिकोऽपि क्वचित् विश्वसति । जातीयाचैतन्यमनसः प्रभावेणैव पूर्वालोचनं विनापि आधुनिकमनुष्याः स्वीयां पारम्परिकीं परम्पराम् आचारं वा अनुसरति इति अनेन फलितम् ।

भस्मीभूतस्य देहस्य पुनरागमनं कुतः ? इति यथा चार्वाकाः कथयन्ति तथैव अन्येऽपि केचन मनोवैज्ञानिकाः मृत्योः परं मानवजीवनं समाप्तमित्येव जल्पन्ति । परं विश्लेषणात्मकमनोविज्ञानिनः एवं न भाषन्ते । मानसिकस्वास्थ्यदृष्ट्या मृत्युमपि मानवः स्वीयम् एकं लक्ष्यमित्येव चिनुयात् इत्येते प्रतिपादयन्ति ।

नास्तिकेऽपि मानवे वार्धक्यदशायां धार्मिकभावः अस्तिक्यबुद्धिर्वा जागर्ति चेत्तर्हि तेषाम् अन्तिमावस्था सुखदा भविष्यति । मृत्योः परमपि देहातीतस्य मानवस्य किञ्चन विशिष्टं जीवनं वर्तते इति यदि कश्चन धर्मः किञ्चन दर्शनं वा उद्बोधयति तर्हि सः धर्मः स्वीकारार्हः एव । मानवाः पारम्परिकाः धार्मिकबुद्धयः आध्यात्मिकदृष्ट्यश्च भविष्यन्ति चेत तेषां कृते मोक्षः वा आध्यात्मिकलाभो वा भविष्यति वा न वा, परं तेषां सर्वेषामपि मानसिककस्वास्थ्यम् अवश्यमेव परिरक्षितं

ISSN: 2249-538X 

भविष्यतीति एतेषां सिद्धान्तः । एवं धर्मः आहोस्वित् धार्मिकशिक्षा मानसिकस्वास्थपरिरक्षणाय मानसिकोपचाराय न उपकरोति उक्तवत्सु मनोवैज्ञानिकेषु विश्लेषणात्मकमनोविज्ञानिनः एव अग्रगण्याः सन्ति । एवं परम्परया वा भारतीयसिद्धान्तमङ्गीकरोति विश्लेषणात्मकमनोविज्ञानमिति पल्लवितं पुष्पितं फलितञ्च ।

**परिशीलितग्रन्थसूची –**


1. उच्चतर शिक्षा मनोविज्ञान – डा. मुहम्मद सुलैमान- मोतीलाल बनारसी दास दिल्ली ।
2. शिक्षा मनोविज्ञान – पाठक पी विनोद पुस्तक मन्दिर आगरा ।
3. A Text –Book Of psychology – P.N.Bhattacharyya. A. Mukherjee & Co.Private Ltd. Calcutta 73
4. Elements Of psychology. Arya Book Depot New Delhi- 110005


**********

# समाजे लोकतन्त्रशिक्षणस्य भूमिका

**डा. वेङ्कटरमण एस्. भट्टः**

इदं लोकतन्त्रं सिद्धान्तद्वयमवलम्ब्य आधारितमस्ति। मानवव्यक्तित्त्वं मूल्यैः निर्धारितं भवति। तादृशमूल्ययुक्तव्यक्तित्त्वेनैव आत्मनः कार्यं कर्तुं प्रत्येकमपि मानवः प्रभवति। मनुष्यः एतस्य कार्यस्य प्रबन्धनं सञ्चालनञ्च उत्तमरीत्या चिकीर्षति येन सर्वेषामपि हितं तत्र साधितं भवेत्।

Democracy is based on two assumptions; the infinite value and belief that mean are capable of managing their own affair in such a way as to promote the welfare of all and that therefore, they should have the freedom to do so. – Henderson.

लोकतन्त्रं जनतन्त्रं प्रजातन्त्रं वा Democracy इत्यस्य पदस्य संस्कृतानुवादः। जनानां शासनं भवति जनतन्त्रम्। जनैः जनानां कृते जना एव यत्र शासनं कुर्वते तत् भवति जनतन्त्रम्। Democracy इति आङ्ग्लभाषायाः शब्दः , ) भाषायाः डेमोस्-ग्रीक्Demos( क्रेटोस् or क्रेशिया )Kratos or Kratia( इति शब्दाभ्यां निष्पन्नः। अस्य अर्थः शक्तिरिति। अनेन प्रकारेण Democracy इत्यस्य अर्थः जनानां शक्तिरिति तात्पर्यम्। इयमेका तादृशी शासनप्रणाली यस्यां सामान्यजनेषु अपि शक्तिरसौ निहिता भवति। कस्मिंश्चित् व्यक्तिविशेषे वर्गविशेषे वा शक्तिरसौ निहिता न भवति। आहत्य जनानां हिताय सर्वेषु जनेषु निहिता शक्तिः जनतन्त्रशक्तिः किञ्चित् विशिष्टं स्थानम् आवहति। वर्तमानपरिस्थितौ शासनतन्त्ररूपेण इदं प्रजातन्त्रं कार्यं न कुरुते अपि तु विभिन्नरूपेषु यथा – समाजव्यव ,यांशासनव्यवस्थास्थायांआर्थिकव्यवस्थायां , जीवनदर्शनादिव्यवस्थायामपि इदं प्रजातन्त्रं व्याप्तं भवति।

लोकतन्त्रशासनव्यवस्थारूपेण कथं जनतन्त्रं स्थानमावहति इति चेत् अस्मिन् शासने जनतायाः प्रतिनिधित्त्वं भवति। जनतायाः समग्रं हितं लोकतन्त्रशासनं करोति। लोकतन्त्रशासने सर्वकारः जनानाम् उत्तरदायित्त्वं निर्वहति। समाजव्यवस्थायामपि लोकतन्त्रस्यास्तित्त्वं बहु वर्तते। लोकतन्त्रमेव कश्चन समाजविशेषः। लोकतन्त्रसमाजे सर्वेषां समानता प्रकल्पिता विद्यते। जाति-धर्म-त्तो वर्तते। नीचभावमन्तरा सर्वेषां कृते समानः अवसरः प्रद-उच्च-वर्ग-लिङ्ग आर्थिकशासनव्यवस्थायामपि जनानां जीवनयापनाय न्यूनतमार्थिकोपलब्धीनां कृते बलं प्रदत्तं वर्तते। एतदतिरिच्य निरुद्योगसमस्यायाः परिहारः समुचितं वेतनमानं सर्वेषां समानः अवसरः इत्यादयः अन्तर्भवन्ति। प्रजातन्त्रं जीवनस्य एकः दृष्टिकोणः वर्तते। अत्र प्रत्येकमपि व्यक्तिविशेषस्य विचारकरणे ,स्वाभिप्रायप्रस्तुतीकरणे , जीवननिर्वहणे च स्वातन्त्र्यं वर्तते। मूलाधिकारप्राप्तौ अपि सर्वेषां समानः अवसरः विद्यते।

According to Radhakrishnan Report "Democracy is the way of life and not a mere political arrangement. It is based on the principle of equal freedom and equal right for all its members regardless of race, religion, sex, occupation or economic status."

सर्वमिदम् आकलय्य इदं वक्तुं शक्यते यत् –

1) इदं प्रजातन्त्रं मूलभूतस्वातन्त्र्यस्य कृते स्थानं प्रददाति।

2) आर्थिकराजनैतिकस्थितीनां संरक्षणे बद्धादरं वर्तते।-सामाजिक-

3) लोकतन्त्रशिक्षणस्य परमोत्कृष्टम् उद्देश्यं भवति सर्वेषां हितकरणम्।

4) न्यायसम्मतत्वेन समानरूपेण च इदं जनतन्त्रं कार्यं कुरुते।

5) अनुभवमाध्यमेन शिक्षणं प्रददाति।

अद्यत्वे लोकतन्त्रस्य वातावरणं सर्वत्र कलुषितं दृश्यते। बलिष्ठराष्ट्रस्य निर्माणं जनतन्त्रव्यवस्थया करणीयं वर्तते। शिक्षणेन एतत् सर्वमपि अस्माभिः कर्तुं शक्यते। शिक्षितसमाजेन सर्वत्रापि परिवर्तनमानेतुं शक्यते। तच्च परिवर्तनं विकासस्य कारणं भवेत्। यत्र परिवर्तनं सकारात्मकं जायते तत्र विकासोऽपि सकारात्मक एव भवितुमर्हति। अतः देशस्यास्य सर्वत्र प्राथमिकशिक्षणादारभ्य प्रजातन्त्रविषयकपाठ्यक्रमः आनेतव्यः। अद्यतनः बालकः श्वस्तननागरिकः भवति। यदि सः सुसंस्कृतः शिक्षणेन भवति राष्ट्रमपि विकासशीलं भवति। यस्मिन् राष्ट्रे जनाः शिक्षिताः भवन्ति तद्राष्ट्रं अवश्यम् अभिवृद्धिशीलं भवति। अस्माकं समीपे विद्यमानस्य सम्पत्तेः संरक्षणं वयमेव कर्तुं शक्नुमः। नो चेत् पाश्चात्याः अस्माकम् उपरि आक्रमणं कृत्वा देशस्य नाशाय यतन्ते। अतः जनतन्त्रशासनप्रणाल्या अस्माभिः योग्याः नेतारः चेतव्याः सन्ति। यदि योग्यानां देशभक्तानां च समीपे राष्ट्रस्य अधिकारः भवति चेत् अवश्यमस्माकं राष्ट्रस्य विकासः जायते।

**सन्दर्भग्रन्थाः**


1) सच्चिदानन्दः ए ,.पि .शिक्षायाः सामाजिकाधारः
2) पाठक एवं त्यागिशिक्षासिद्धान्तः ,
3) शर्मा आर् ,.ए .पर्यावरणसंरक्षणम्


**********

# शिक्षामनोविज्ञानानुसारं परामर्शविचार:

**डा. नारायण वैद्य:**

किशोरावस्थायां विद्यमानानां छात्राणाम् अध्यापनं नातिसुलभं कार्यं भवति । यत: किशोरावस्था क्लिश्यति बालान् । अस्याम् अवस्थायां बाला: किञ्चित् स्वातन्त्र्यं प्राप्य अहं प्रवृत्तिं प्रदर्शयन्ति । स्वतन्त्रा: भवितुम् इच्छन्ति । स्तरेऽस्मिन् किं कर्म कर्तव्यम् ? किं न कर्तव्यम् ? इति निश्चेतुं न प्रभवन्ति । अभीष्टस्य कार्यस्यासिद्धौ खिन्ना: भवन्ति । स्वात्मन: अगौरवम् जातमिति चिन्तयन्ति । खेदस्य निवारणम् उपचारात्मकं भवेत् । यथा क्रीडाङ्गणे क्रीडायाम् अस्वस्थस्य प्रथमचिकित्सा क्रियते तथैव शिक्षणसंस्थासु अध्ययनविमुखता, परीक्षायाम् अनुत्तीर्णता, स्पर्धासु पराजय:, परीक्षाया: भीति:, सन्मित्राणां तिरस्कार:, पश्चात्ताप:, आत्मविश्वासस्य अभाव: इत्यादीनां समस्यानां समाधानाय शिक्षका: हितवचनम् उपदिश्य परिस्थितिं निर्वहेयु: । अत: परामर्शो नाम अत्र उपदेश: इति वक्तुं शक्यते । अनेन सूचना प्राप्यते, अर्थावगमनं जायते, आत्महीनताभाव: च निवार्यते ।

परामर्शे द्वौ भवत: । एक: उपदेष्टा द्वितीय: उपदेशग्राहक: इति । अत्र उपदेष्टा भवति प्रशिक्षित: । उपदेशग्राहक: भवति समस्यया पीडित: । अत: परामर्श: द्वयोर्मध्ये जायमाना एका प्रक्रिया अस्ति । अस्यां प्रक्रियायां परस्परं विचाराणां विनिमय: क्रियते । समस्यात्मकव्यक्ते: मनोबलं वर्धयित्वा तस्य व्यवहारे परिवर्तनमानीयते । परामर्शं प्राप्य विद्यार्थी स्वीयसमस्यां परिहर्तुं सक्षमो भवति ।

**परामर्शस्य लक्षणम्**

उभयोर्व्यक्त्योर्मध्ये विचारविनिमयानां वैयक्तिक: क्रियाशीलश्च सम्बन्ध:

परामर्श: इति गिल्बर्ट रेनमहोदय: निरूपयति । अनेन ज्ञायते परामर्श: द्वयो: उपस्थितौ भवति । अत्र समस्यासम्बद्धविचाराणां विनिमय: क्रियते । एतदर्थं वैयक्तिक: क्रियाशीलश्च सम्बन्ध: किमर्थम् ? इति चेत् आत्मीय: एव सम्यक् उपदेष्टुं समर्थ: भवति । उपदेष्टा अदौ श्रोतु: अभिरुचिम्, अभिवृत्तिम्, बुद्धिसामर्थ्यम्, मानसिकस्थितिम्, शरीरस्य सामर्थ्यं इत्यादिविषये जानीयात् । अन्यथा उपदेश: निरर्थक: भवेत् । उक्तं चाणक्येनापि **मूर्खशिष्योपदेशेन पण्डितोप्यवसीदति**[1] इति सम्यग्रूपेण विचाराणां विनिमय: तदा एव भवितुं शक्यते यदा द्वयो: आत्मीय: उत्तम: क्रियाशील: च सम्बन्ध: भवति । अत्र लक्षणाधारेण मन्त्रक: मन्त्रणार्थी लक्ष्यं चेति त्रिमुखी प्रक्रिया अस्ति इत्यपि वक्तुं शक्यते । मन्त्रक: नाम उपदेष्टा, मन्त्रणार्थी भवति उपदेशस्य श्रोता । लक्ष्यं तु समस्याया: परिहारसूचनम् अथवा परिहारोपायान्वेषणम् भवति ।

**परामर्शस्य सोपानानि**

1. स्वस्य असामर्थ्यज्ञानम् ।
2. उभयो: परस्परं सम्बन्धस्थापनम् ।
3. आमन्त्रकस्य सान्निध्ये समस्याया: उपस्थापनम् ।
4. समस्याया: कारणानां विश्लेषणम् ।
5. वास्तविकसमस्या का अस्ति ? आवश्यकता का ? इत्यादिविषयमवगन्तुं श्रोतु: उपकरोति ।
6. आमन्त्रणार्थी स्वस्य समस्यानुसारं विचिन्त्य निर्दिष्टं निर्णयं स्वीकरोति ।
7. आमन्त्रणार्थी स्वस्य व्यवहारे परिवर्तनं कृत्वा स्थित्यनुसारं सामञ्जस्यं सम्पादयति ।

---

[1] चाणक्यनिति: - अ.1, श्लो. 05

**परामर्शस्य प्रकारा:**

परामर्शस्य प्रक्रियाया: स्वरूपस्य आधारेण मन्त्रणार्थीमन्त्रकयो: परामर्शे प्रामुख्यस्याधारेण च परामर्श: त्रिविध: भवति । यथा –

1. निर्देशितपरामर्श:
2. अनिर्देशितपरामर्श:
3. सम्मिश्रपरामर्श:

**निर्देशितपरामर्श:**

अस्य प्रतिपादक: अस्ति इ.जि. वीलियंसन् वर्य: । अत्र मन्त्रक: प्रधान: भवति । असौ मन्त्रणार्थिमुद्दिश्य समस्याया: निवारणार्थं किं कर्तव्यमिति निर्दिशति अथवा उपदिशति । एतदर्थं मन्त्रक: सूचयति, परिस्थिते: विवरणं करोति, समस्याम् अवगमयति च । एवं मनस: परिवर्तनाय यतते । अत्र मन्त्रक: प्रशिक्षित: सन् परामर्शवृत्तिम् करोति । निर्देशितपरामर्शे समस्याया: विश्लेषणानन्तरं मन्त्रणार्थिन: सम्यक् निर्णयस्वीकारार्थं साहाय्यमाचरति । समस्या निवारणसमये बुद्धिस्तरस्य प्रामुख्यं कल्प्यते । अत्र मन्त्रकस्य अर्थावगमनं निर्देशनं च मुख्यमित्यत: निर्देशितपरामर्श: इति व्यपदेश: । मन्त्रककेन्द्रितपरामर्श: इत्यपि वक्तुं शक्यते । अस्योदाहरणं कादम्बर्या: शुकनासोपदेशे लभ्यते । यथा – “समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छशुकनास:- सविस्तरमुवाच . तात चन्द्रापीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं च निसर्गतएवाभानुभेद्यम् अप्रदीपप्रभापनेयम् अतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमद: । कष्टमनञ्जनवर्तिसाध्यमपरम् ऐश्वर्यतिमिरान्धत्वमित्यतो विस्तरेणाभिधीयसे । गर्भैश्वर्यत्वमभिनवयौवनत्वम् अप्रतिमरूपत्वम् अमानुषशक्तित्वं चेति महतीयं

खल्वनर्थपरम्परा ।” [1]

एवं संस्कृतसाहित्ये निर्देशितपरामर्शस्योदाहरणानि उपलभ्यन्ते ।

**अनिर्देशितपरामर्श:**

एतस्य प्रकारस्य निरूपक: कार्ल रोजर्सवर्य: । अत्र मन्त्रणार्थी प्रधान: भवति । मन्त्रणार्थी क्रियाशील: सन् सोत्साहेन भागं गृण्हाति । अत्र मन्त्रणार्थी मन्त्रकस्य साहाय्येन समस्याया: स्तरं स्थितिं च अवगच्छति । समस्याया: विषये अन्तर्दृष्टिं प्राप्नोति । स्वयं निर्णयं स्वीकरोति । मन्त्रक: अत्यल्पं भाषणं करोति । कन्नडभाषायां एका उक्तिरस्ति “य: वृक्षस्य आरोहणं करोति तस्मै कियत् साहाय्यं कर्तुं शक्यते” इति । एवं विचिन्त्य य: स्वस्य भूमिकां निर्वहति स: अनिर्देशितमन्त्रक: भवति । अत्र प्रजातन्त्रवातावरणं निर्माति मन्त्रक: ।

**सम्मिश्रपरामर्श:**

सम्मिश्रपरामर्शस्य प्रतिपादक: एफ.सि. थार्नवर्य: अस्ति । अयम् निर्देशिता-निर्देशितपरामर्शयो: उत्तमगुणान् आश्रित्य परामर्शस्य तृतीयं प्रकारं सम्मिश्रपरामर्शमिति निरूपणम् अकरोत् । पूर्वोक्तपरामर्शप्रकारयो: न्यूनतां परिहृत्य परामर्शस्य उत्तमपरिणामप्राप्ति: सम्मिश्रपरामर्शस्य मुख्यमुद्देश्यं भवति । प्रकारेऽस्मिन् मन्त्रक: मन्त्रणार्थिन: आवश्यकता व्यक्तित्वलक्षणम् इत्यनयो: अध्ययनम् आदौ करोति । तदनु समस्यापरिहारार्थम् उत्तमतन्त्राणां चयनं करोति । तदनु निर्देशितपरामर्शस्य लक्षणानुसारम् उपदेशम् आरभते । परिस्थितेरनुगुणं उपदेशशैलीम् अनिर्देशितपरामर्शानुरूपं परिवर्तयति । सम्मिश्रमरमर्शस्य उपयोगार्थं मन्त्रकस्य कृते निर्देशितानिर्देशितपरामर्शयो: पूर्णानुभव: अथवा ज्ञानम् अपेक्षते । आवश्यकतानुसारं मन्त्रक: मन्त्रणार्थिन: पुनर्निरीक्षणं करोति ।

[1] कादम्बर्यां शुकनासोपदेश:

**परामर्शस्य साधनानि**

1. साक्षात्कार:/सन्दर्शनम्
2. मनोवैज्ञानिकपरीक्षणम्
   - रुचिपरीक्षणम्
   - अभिवृत्तिपरीक्षणम्
   - व्यक्तित्वपरीक्षणम्

परामर्शे विश्वास: आवश्यक:, विवेचनाशक्तिरपि आवश्यकी । परामर्शेण आत्मविश्वासं वर्धयितुं शक्यते । निर्णयस्वीकारक्षमतां विकसय्य समायोजनक्षमतां विकासयितुं शक्यते । एवमेव परामर्शेण व्यक्ति: समस्यानां समाधानं प्राप्नोति । अपिच स्वस्य सामर्थ्यं सम्यक्तया ज्ञात्वा तदनुगुणं लक्ष्यं प्रति प्रयत्नं कर्तुं प्रभवति ।

**************

**सन्दर्भग्रन्थसूची**

1. आधुनिक परामर्शन मनोविज्ञान - अमरनाथ राय एवं मधु अस्थाना, मोतीलाल बनारसीदास पब्लिशर्स, नई दिल्ली
2. शिक्षा मनोविज्ञान – एस.के.मंगल, PHI प्राइवेट् लिमिटेड, नई दिल्ली
3. Guidance and counseling – डा. N.B कोंगवाड, विद्यानिधिप्रकाशनम्, गदग

**********

# श्री अरविन्दस्य शिक्षादर्शनस्य सम्प्रत्ययः

डा. पि. अरविन्दकुमारः

श्रीअरविन्दस्य शिक्षादर्शनम् आध्यात्मिकसाधनायम्, ब्रह्मचर्ये योगे च आधारितमासीत्। तेषां विश्वासः आसीद्यत् शिक्षया मानवस्य पूर्णे विकासो न सम्भवति । श्री अरविन्दानां थो कथनमासीत् यत् – सत् शिक्षा यथा वा शिक्षा केवलं सैव वर्तते या मानवस्य अन्तर्निहिताः शक्तीः विकासयति यथा च सः पूर्णतः लाभान्वितो भवति ।

अरविन्दानां धारणेयमासीत् मानवजीवे ज्ञानं तस्या आत्मानि सुषुप्तावस्थायां तिष्ठति । शिक्षायाः आधारः तस्यान्तःकरणं भवति । श्री अरविन्दानुगुणे अन्तःकरणं शिक्षायाः प्रमुखमङ्गम् अस्ति । तेन अन्तः करणस्य संरचता वैज्ञानिकरीत्या प्रतिपादिता ।तस्य चत्वारः स्तराः तेन प्रतिपादिताः - चित्तं , मनः, बुद्धिः, ज्ञानं चेति। तस्य मते मानवस्य एतासां शक्तीनां क्रमिको विकासो भवति। अत एव एतादृशी शिक्षा भवेद्यया मानवस्तासां शक्तीनां विकासं कुर्यात् । केवलं ज्ञानप्राप्तिरेव नास्ति शिक्षा । सच्छिक्षा सैव वर्तते यस्यां मानवस्य पूर्णविकासस्य क्षमता विकसितो भवेत्। अन्तःकरणस्य चतुर्णामिव स्तराणां समासेन विवरणं अत्र भवति ।

चित्तं –एतद्धि अवशिष्टानां त्रयाणामेव स्तराणामाधारो वर्तते । स्मृतं हि ज्ञानं चित्ते एकत्रितं भवति। एतद् भूतकालिकं मानसिकं संस्कारं वर्तते । चित्तस्य स्मृतिकोशेभ्यः एव क्रियाशीला स्मृतिः काश्चन अंशान् चिनोति । चयनमिदिं उचितं अनुचितं वा भवितुं शक्नोति । एतदर्थं प्रशिक्षणं भवति ।

मनः एतस्य कार्यं भवति ज्ञानोन्द्रियेभ्यः प्रत्ययानां ग्रहणं तेषाञ्च विचारेषु परिणतिरिति । मनस्तु ज्ञानेन्द्रियैः सह स्वयमपि उपकरणं भवति । सद्विचाराय एतेषां प्रशिक्षणमावश्यकं भवति । शिक्षैव एतत् सक्षमान् कारयति ।

बुद्धिः – मनो यद् ज्ञानं धारयति तस्य व्यवस्थीकरणं बुद्ध्या क्रियते बुद्धेः उभयोः भागयोः प्रशिक्षणमनिवार्यं भवति ।

ज्ञानम् – अन्तःकरणस्य चतुर्थं स्तरं ज्ञानं वर्तते । एतस्मिन् अर्दृष्टिपरकस्य सत्यस्य प्रत्यक्षीकरणस्य शक्तिः भवति । मानवस्यैषा शक्तिरिदानीं पूर्णतां प्राप्ता न वर्तते । एषा तु विकासमाना वर्तते। परमेतस्याः शक्तेः विकासेन मानवानां अनेकासां समस्यानां समाधानं भवितुमर्हति । मानवस्य तार्किका मतिः स्वकीयेन चाञ्चल्येन एतस्यां ज्ञानाशक्तौ विकारं जनयति । एतस्मात् कारणात् शिक्षकः ज्ञानशक्तेः विकासाय यत्नं कुर्यादिति ।

श्री अरविन्देन स्वशिक्षायामेतादृशाणां विषयाणावमुपेक्षा न कृता यस्मिन् शैक्षणिकाभिव्यक्तेर्गुणाः जीवनस्य क्रियाशीलतायाश्च गुणाः विद्यमानाः आसन् । एतदेव कारणं यत् तस्य शिक्षायां राजनीतिः समाजः , व्यापारः, साहित्यम् , कविता, वास्तुकला मूर्तिकला प्रभृति विषयाणामुचितं स्थानं प्रदत्तं वर्तते। तस्य एकमात्रमुद्देश्यम् आसीत् एतेषु सर्वेषु विषयेषु जीवनस्य नूतनतायाः सञ्चारम् कृत्वा तत्कृते नूतनस्वरूपप्रदानम् इति । स मानवमेतावन्तं विकासितं कर्तुं वाञ्छति स्म येन एतेषां माध्यमेन श्रेष्ठायाः मानवताया आत्मनः पूर्णतायाश्च प्रकाशः स्पष्टतया दृष्टिपथे आगच्छेत् । एवं प्रकारेण तस्य शिक्षायाः प्रथमलक्षयं सम्पूर्णमानवजातेः सर्वाङ्गीणविकासं विधाय आघ्मात्मिकाधारे विश्वस्य सर्वेषां राष्ट्राणां स्थापना एवमासीत् । महर्षेः श्री अरविन्दस्य शिक्षाविषयकाः विचाराः ए सिष्टम् आफ् नेशनल् एजुकेशन् , on Education इति च ग्रन्थयोः प्रात्यन्ते ।

**शिक्षायाः अर्थः -** महर्षेः श्री अरविन्दस्य शिक्षां प्रति नूतनो दृष्टिकोण: आसीत् । तेनोद्घोषितं यत् सूचनानां संग्रहमात्रमेव नास्ति शिक्षा । सूचनाः ज्ञानस्याधारो भवितुं न शक्नुवन्ति , सूचनातु अधिकाधिकं सामाग्री एव भवितुं शक्नोति, येन ज्ञाता आत्मनो ज्ञानस्य वृद्धिं कर्तुं शक्नोति। किम्वा एता: बिन्दुरूपेण तियन्ति यत्र ज्ञानाऽराम्भो भवेत् । शिक्षाया हि आत्मानो ज्ञानाय परिसीमिता भवति , वस्तुतः सा नास्ति शिक्षा इति।

श्री अरविदः शिक्षामतिव्यापकं गतिशीलञ्च स्वरूपं प्रदत्तवान् । स एतस्याः व्याख्यां प्रचीनभारतीयपरम्परामनुसृत्य कृतवान् । श्री अरविन्दस्य कथनमासीत् – “शिक्षामानवस्य मस्तिष्कस्य आत्मनश्च शाक्तिनां निर्माणं करोति , एषा ज्ञानस्य चरित्रस्य संस्कृत्याश्चोत्कर्षं करोति ” इति

**शिक्षायाः उद्देश्यम्** - श्री अरविन्दः स्वयमेव दिव्यानुभूतिम् कृतवान् तदर्थं स शिक्षाया उद्देश्यमपि “अध्यात्मिकविकासेन परमज्ञानेन सह साक्षात्कारः ” इति निर्धारितवान् । तेन शिक्षायाः महत्त्वपूर्णान्युद्धेश्यानि निर्धारितानि । तान्यथा

1) बालकस्य शारीरकशुद्धिस्तस्य शरीरस्य शुद्धः पूर्णश्च विकासः । यतो हि शरीरमाध्यमेनैवाऽध्यात्मिक जीवनस्य प्रप्तिः सम्भवति ।

2) बालकस्य चित्तसम्बद्धां क्रियाशीलतां समुन्नतां विधाय तस्यान्तःकरणस्य विकासः। एतेदर्थं अन्तःकरणस्य चित्रम् , मनः बुद्धिर्ज्ञानञ्चेत्यादीनां चतुर्णां स्तराणां विकासः अनिवार्य: अस्ति ।

3) बालकस्य स्नायुशुद्धिम्, चित्तशुद्धिम्, मनसव शुद्धिञ्च कृत्वा इन्द्रियाणां उचितप्रयोगस्य विकासः करणीय:। यतोहि ज्ञानेन्द्रियाणामपर्याप्तेन प्रयोगेन एतासां क्षमतायां ह्रासौजायते । एतस्मात् कारणात् ज्ञानेन्द्रियाणां प्रशिक्षणात् समुचितप्रयासो विधेयः ।

4) बालकानां अभिरुचिसम्मतम् , तेषां स्मृतेः ,कल्पनायाः चिन्तनस्य निर्णयस्य च शक्त्याः विकासं कृत्वा तस्य मानसिकविकासः , प्रशिक्षणेऽस्मिन् अवधानशक्त्याः विकासः  परमावश्यको भवति ।

5) बालकस्य प्रकृतिम्, स्वभावम् , भावविशेषम् , विशुद्धं सुन्दरञ्च विधाय तस्य हृदयपरिवर्तनं तस्य नैतिकतायाः विकासनं करणीयम्। यतो हि नैतिकताविहीना शिक्षा हानय एव भवति ।

6) बालकस्य  वैयक्तिकीं प्रच्छन्नाञ्च शक्तिं पूर्णतां प्रति अग्रसरां कृत्वा तस्य आध्यात्मिक विकास: सम्पादनम् , एतेन मानवे वर्तमानस्य दैवीयांशस्य  प्राकट्यं सम्भवति ।

7) बालकस्य तथ्यसंग्रहस्य निष्कर्षप्राप्तेश्च प्रशिक्षणं प्रदाय तस्य तर्क शक्तेः विकासनं प्रति बालकं याः विशिष्टाः शक्तयोः भवन्ति तासाम् समुचितो विकासः विधेयः श्री अरविन्द शिक्षया बालकेषु  नागरीकतायाः अन्तराष्ट्रियतायाश्च भावनाया विकासः अभिलषति स्म ।

**पाठ्यचर्या -** श्री अरविन्दो बालकस्य नैतिकभौतिकमानसिकआध्यात्मिकविकासाय शिक्षायाः विभिन्नेषु स्तरेषु पाठ्यचर्यायाः निर्धारणं कृतवान् । तस्य स्तरानुरूपं विवरणम्  दीयते – तद्यथा-

1) प्राथमिकी शिक्षा – मतृभाषा, आङ्ग्लभाषा, प्रैञ्चभाषा, गणितम्, सामाजिकाध्ययनम्, गणितं चित्रकला चेति ।

2) माध्यमिकी शिक्षा – मातृभाषा , आंग्लभाषा , फॅञ्चभाषा , गणितम्, सामाजिकाध्यानम् भौतिका , रसायनशास्त्रम् , जीवविज्ञानम्  , वचस्पतिविज्ञानम् स्वास्थविज्ञानम् , भूगर्भविज्ञानम् ,चित्रकला चेति ।

3) विश्वविद्यालयीया शिक्षा – भारतीयं पाश्चात्त्यञ्च दर्शानम्, मनोविज्ञानम्, समाजशास्त्रम् सभ्यतायाः इतिहासः , आंग्लसाहित्यम्, गणितम् , भौतिकशास्त्रम्, रसायनशास्त्रम्, जीविनविज्ञानम्, विज्ञानस्य इतिहासः, प्रैञ्चसाहित्यम्, अन्तराष्ट्रियसम्बन्धः विश्वैकीरणं चेति ।

महर्षिः अरविन्दःजीवनस्य स्रोत आद्यात्मिकतां तस्याऽधारञ्च भौतिकतां मनुते स्म । एतस्मादेव कारणात् स उभयोः द्वयोः एव उपेक्षां न कृतवान् । स मानसिकी , नैतिके , आध्यात्मिके चेति सर्वेषु क्षेत्रेषु मानवव्यक्तित्वस्य पूर्णं विकासं कामयते स्म । अत एव तेन सर्वेषां विषयणां समावेशं पाठ्यचर्यायां कृतम् । सः अध्यात्मिकसाधनायाः महत्वमवगत्यापि साहित्यिकविषयाणां वैज्ञानिकविषयानाञ्च समावेशस्य समर्थकः आसीत् , वस्तुतः सः सर्वतोभावेन मानवव्यक्तित्वस्य वाञ्चति स्म ।

**शिक्षणाविधिः** - श्री अरविन्दः शिक्षणस्य क्रमिकविधेः समर्थक आसीत् । अस्मिन् विधौ यथा हि साम्प्रातं प्रचलति यद् बालकाय एकस्मिन् काले अनेकेषां विषयाणां शिक्षा न दीयते । एतद्विपरीतं केवलमेकस्य विषयद्वयस्य वा शिक्षा तस्मै प्रदीयते। यदा स एतेषां विषयाणां ज्ञानं प्राप्नोति तर्हि तस्मै अन्येषां विषयाणां शिक्षा दीयते । महर्विः श्री अरविन्दः एनं विधिमेव सर्वतोपयुक्तं मनुते स्म ।

**श्री अरविन्दः स्वकीयं क्रमिकशिक्षणाविधिं केषुचन विशिष्टेषु सिद्धान्तेषु आधारितं कृतवान् -**

1. क्रियायाधिगमः
2. बालकस्य सहयोगः
3. बालक्स्य स्वतन्त्रता
4. स्नेहस्य सहानुभूत्यश्च प्रदर्शनम्

5. बालकस्य रुचीतामध्ययनम्
6. शिक्षायाः माध्यमः –मातृभाषा
7. बालकस्य स्वप्रयासस्य स्वानुभवस्य च प्रोत्साहनम्
8. विषयाणां प्रकृत्यनुसारं बालकस्य शक्तीनां प्रयोगश्चेति

श्री अरविन्दमहोदयमते एकस्य विषयस्य समग्रतया प्राप्तेन ज्ञानेन बालकः सन्तुष्टो जायते। एतास्मिन् विधौ स्मृतेरेतादृशं प्रशिक्षणं क्रियते येन छात्रः नूतनं विषयं प्रत्यावधानेनापि तस्य विस्मरणं न जायते। तन्मते विषयाणां विविधतया मनः शान्तिं नावगच्छति । एकस्मिन् रुचिकरे विषये छात्रः स्वकीयमवधानं सम्यक् तथा केन्द्रितं कर्तुं शक्नोति । तन्मते सर्वप्रथमं छात्रः माध्यमरूपे स्वीकृतायां भाषायां आधिकारं स्थापयेत् । भारतीयानां कृते स संस्कृतज्ञानमावष्यकं मनुते स्म । एतेन अन्येषां विषयाणामवगमे स सौकर्यमनुभविष्यति । ततः शिक्षकः छात्रस्य रुचिमन्येषु विषयेषु चातुर्येण नयेत्। श्री अरविन्दः कक्ष्यायां छात्रान् सक्रियकरणेन सह तस्य मास्तिष्कस्य निष्क्रियकरणस्यापि प्रशिक्षणं वाञ्चति स्म । स शिक्षणकाले विषये रुचेर्प्रादुर्भावं कमयते स्म । तन्मते गणितं व्याकरणमपि रुचिकरं विधाय शिक्षणीयम् । तन्मते शिक्षणेऽनुभवनिरीक्षणयोः प्रयोगो अधिकाधिकं विधेयः।

**शिक्षणस्य स्थानम् –** श्री अरविन्दमते शिक्षायां अध्यापकः निर्देशकेण सहायकेन च कार्यं सम्पादयेत्। स मौनेन बालकानां अभिरुचीनां अध्ययनं कृत्वा तेषामाभिरुच्यनुसारं शिक्षायाः सामग्रीणां सङ्कलनं प्रस्तुतीकरणञ्च कुर्यात् । सः स्वयमेव बालकानां ज्ञानाय यत्नं कुर्यात् । सः बाह्यज्ञानं तेषु न प्रक्षिपेत् ।स तु एतदृशं प्रयत्नं कुर्याद् येन बालकः स्वामिरुच्यनुसारं ज्ञानर्जनं कुर्वन् स्वशिक्षायाः पथि अग्रेसरो भवेत् । अनेन प्रकारेण श्री अरविन्दः शिक्षायाम् अध्यापकस्य गौणं स्थानं प्रदत्तवान् ।

श्री अरविन्दस्य कथनमासीत् यत् अध्यापकः अनुदेशकः स्वामी वा नास्ति स तु सहायकः पथप्रदर्शकञ्च वर्तते । तस्य कार्यं तु परामर्श एव वर्तते नतु ज्ञानप्रसारः। सः वस्तुतः बालकस्य मस्तिष्कं न प्रशिक्षयति । सः छात्रं केवलमिदं ज्ञापयति यत् सः आत्मनः ज्ञानसाधनाम् कथं समृद्धं कुर्यात् इति । सः छात्राय शिक्षणप्रक्रियायां सहायतां प्रेरणञ्च ददाति। स तु तमिदं ज्ञापयति यत् सः कथमात्मानं शिक्षितं कुर्यात् इति । स बालकस्य अन्तर्निहित ज्ञानं बहिर्नप्रसारयति तं केवलमिदं ज्ञापयति यत् ज्ञानं कुत्र वर्तते तच्च बहिर्निष्कासयितुं कथमभ्यसनं कर्तुं शक्नोति इति। शिक्षकःबालकानां स्वभावानुसारं विकासं कारयेत् । बालकानां स्वाभविकानां रुचीनां विकासाय शिक्षकः समुचितस्य वातावरणस्य अवसरस्य च सृष्टिं कुर्यात् । छात्राणामादर्शाः कदापि वैदेशिकाः न स्युः इत्येतस्य प्रयासो अध्यापकः एव कर्तुं शक्नोति ।

**बालकस्य स्थानम् -** श्री अरविन्दः शिक्षायाः व्यवस्थायां बालकस्य प्रमुखं स्थानं प्रदत्तवान् । तन्मते बालकस्य विकासस्तस्य प्रकृतेऽभिरुचेः स्वभावस्य धर्मस्य चानुकूल एव सम्पादनीयः । तेनानुसारं सा शिक्षा बालकस्य कृते निरर्थिका या पूर्वनिर्धारितैः गुणैरादर्शैः भावनाभिश्चानुसारं नायोऽज्यते । एतस्य कारणं यत् प्रतिबालके वैयाक्तिक क्षमता वैलक्ष्यण्यञ्च भवति चेत् एतेषां अवहेलनां विधाय क्रममनुसुत्य बालकेषु केषाञ्चन गुणाना मादर्शानाञ्च उद्भवस्य प्रयासो विधीयते। तर्हि कार्यमिदं बालकस्य कृते अन्याय पूर्वं अहितकरञ्च भवति । बालकेषु आत्मज्ञानस्यानुभूतिः तदैव भवितुं शक्नोति । यदा ते ब्रह्मचर्यं पालयिष्यन्ति अत एव ज्ञानार्जनाय ब्रह्मचर्यं पालनीयमेव ।

**********

# राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

# राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७१३९